Table of contents

अध्यात्मग्रन्थावलिः

# सूत्रभाष्यार्थतत्त्वविवेचनी

३

अध्यात्मप्रकाशकार्यालयः,
होळेनरसीपुरम्.

अध्यात्मग्रन्थावलिः

# सूत्रभाष्यार्थतत्त्वविवेचनी

तत्र

## शास्त्रयोनित्वाधिकरण – समन्वयाधिकरण-भाष्ययोर्व्याख्या

व्याख्याननिर्मातारः
श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः

क्रमाङ्कः १५२

प्रकाशनस्थानम्
अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.

१९७०

First Edition 1970
1000 Copies

©

All Rights Reserved
by
The Adhyatma Prakasha Karyalaya
Holenarsipur, Mysore State.

Registered under the Copy Right Act, 1957

Printed in India
by
Y. Narasappa
at
The Adhyatma Prakasha Press
Holenarsipur

## PUBLISHERS' NOTE

We are greatly rejoiced that we have been able to place this part of the Sūtra-Bhāshyārtha-Tattva-Vivecanī at long last.

There is very little to add to what we wrote in our Note to the second part of the Series except that we have ventured to undertake its publication just to complete the series, while we are fully aware of the limited sale that original Sanskrit works on Vedanta especially of the nature of the present publication, command in these days. At the same time we know that there are critical students of S'aṅkara's works who have been eagerly looking forward to the appearance of this instalment which contains perhaps the most interesting and important portion of S'aṅkara's Bhāshya on many a point of which Swamiji's new commentary sheds abundant light as was expected.

Holenarsipur.
10-9-1970

Y. NARASAPPA
*Chairman, Working Committee,*
*Adhyatma Prakasha Karyalaya.*

# INTRODUCTION

I am thankful to Bhagavan Narayana whose grace has spared me to complete this series of commentaries on Sri S'aṅkara's Bhāshya on the Vedanta Sūtras.

The present portion of my commentary relates to the Bhāshya on the third and the fourth Sūtras. The importance of the Bhāshya on these Sūtras, lies in its clarification of the concept of *S'āstra Pramāṇya* in particular. The Upanishads otherwise known by the name of Vedantas, are rightly considered by all orthodox interpreters as Vedas. Difference of opinion prevails, however, with regard to how this part of the Vedas, is to be regarded as a pramāṇa or valid means of knowledge with regard to Brahman, whose knowledge is taken to be a means of Summum Bonum. All schools of Vedanta, ancient or modern, advaitic or non-advaitic, are of the unanimous opinion that the Vedas can be regarded as pramāṇa only if they reveal truths beyond the ken of other pramāṇas like perception or inference, for if they merely expatiate upon what is known by perception or some other pramāṇas, the very appellation of pramāṇa–would be a misnomer. But Vedantins of S'aṅkara's tradition

stand alone in holding the Upanishads as Pramāṇa because they reveal an existent entity, Brahman or Atman, which does not come within the scope of perception or even the texts of Karmakāṇda.

Failing to realize that the Absclute Atman who is no object, cannot be objectified by any pramāṇa, the ancient Vedantins could not grasp the idea that Atman cannot be made subservient to any injunction. Many of them held that all Vedas teach some karma or things subservient to some injunction such as meditation. Even today all Vedantins hold that Brahman or the Highest God, has to be meditated upon as enjoined in the Vedas, and that the Highest Good or Moksha is to be experienced in a special Heaven.

An importantd octrine of S'āṅkara-Vedanta, is that the *Vedanta texts fall into two classes*, one set of them enjoining Upāsanas or meditations which performed yield fruits to be enjoyed in this life or lead to joys to be experienced in the other world. The second se of texts, however, teach the nature of Brahman which is the Self of all beings. The syntactical construction (समन्वय) of these texts, is such that they do not lead the enquirers to any action after understanding the meaning of the sentence. The right knowledge of the meaning of the text, leads to the immediate

intuition of Brahman as the Self of the whole universe as well as of the enquirer. When this intuition dawns, one would realize that Brahman or Atman is the All, the One without a second and therefore there is nothing else remaining to be known or done. This is what is called *Sadyomukti* in S'ānkara-Vedanta. In Sadyō-mukti where one's self is identified with the All, there are no pramāṇas (means of knowledge), nothing to be known, nor is there any knowledge distinct from either of these. Since the Vedanta-S'āstra teaches this fact, it is called a Pramāna, in that sense.

Another teaching convincingly brought to the forefront in the Sūtra, is that the *seemingly injunctive texts* about *S'ravaṇa* (study of texts), *Manana* (reflection) and *Nididhyāsana* (contemplation), are meant only to turn the seekers' mind inward unlike the genuine injunctions of Karmas or Upāsanas. Some of the subcommentators, and the Bhāshyakāras of other schools of Vedanta following the lead of these Post-S'ankaras, have misrepresented S'aṅkara as implying that for Jñāna, S'ravaṇa and other means are injunctions of some sort. I have made a sustained attempt in these pages to show that verbs in the imperative mood in the context of Jñāna, are intended only to recommend introspection and make the inquirer ready to study the import of the texts teaching the true nature of Atman.

A fourth teaching of Vedanta which follows as a corollary of the nature of *Samanvaya* taught here, demands a passing mention. I have already referred to this in connection with *Sāstra-Prāmāṇya*, but it bears a repetition to call the attention of the student of Vedanta. No word or sentence actually teaches Brahman as an object of knowledge, or meditation and Brahman can never be taught as an object expressible in words. The function of the texts, is only to negate all distincts so as to reveal the Atman as He is.

The method of *adhyāropāpavāda* is used throughout Vedanta in teaching the nature of Reality. This Method is so important that it deserves to be studied in all its bearings upon Vedantic teaching in a separate treatise.[1] But the reader's attention is specially invited to the Sanskrit Appendix to the present work, explaining how this method has been applied to all the first four Sūtras and the Bhāshya thereon. Sankara's arguments would lose their force for one who failed to understand the *modus operandi* of this traditional method.

---

1. I have written a book entitled '*How to recognize the method of Vedanta*' which is prefixed to my Sanskrit work 'वेदान्तप्रक्रियाप्रत्यभिज्ञा'. Another book on the subject is in active preparation.

I have not said anything here upon the criticisms to be found both in the body of the book as well as in the Appendix touching the post-S'aṅkara advaitins again and again. The reader is requested to make a careful study of the various interpretations of S'aṅkara, which have gained currency nowadays in the name of S'aṅkara. Unless one has succeeded in trying to get out of the morass created by these confusing post-S'aṅkara writings, one can never hope to get at the genuine teaching of the Sūtra-Bhāshya. I have to apologize for the misprints, errors of expression and thought that may be found in the book. My failing eye-sight and health combined with my unavoidable absence from the station in connection with pressing work elsewhere, have all contributed to these no less than my inherent lack of proficiency. The publishers will gladly receive any criticisms and make corrections in a second edition, if the work is destined at all to have one.

I have hereby completely made over all the rights of the work to the authorities of the Adhyatma Prakasha Karyalaya, Holenarsipur, as I have done in the case of my previous works.

Bangalore
10-9-1970

AUTHOR

# प्रास्ताविकी विज्ञप्तिः

—:~:—

## प्रकृतभाष्यभागस्य प्राधान्यं सूत्रभाष्ये

अथ समर्प्यते वाचकमहाशयानां करकमले शास्त्रयोनित्वसमन्वयाधिकरणयोर्भाष्यार्थतत्त्वविवेचनी । यद्यपि शुद्धशाङ्करप्रस्थानस्य तदादृतप्रक्रियायाश्चासाधारणं स्वरूपं विविच्य प्रदर्शितमेव जिज्ञासाधिकरण-जन्माद्यधिकरण-भाष्ययोर्विवेचन्याम्, तथापि प्रकृताधिकरणद्वयभाष्यार्थविवेचनमन्तरेण न परिपूर्णमियात् भाष्यार्थतत्त्वविवेक इति मे मतिः । यत्कारणं भाष्यप्रस्थानस्य विशिष्टा धर्माः – ये जिज्ञासाधिकरणभाष्यार्थतत्त्वविवेचन्यां प्रास्ताविकविज्ञप्तौ संग्रहेण दर्शितास्ते अत्रैव विशदतरं वाचकानां हृदयमागच्छेयुः ; भगवत्पादादृतप्रक्रियातत्त्वं च निष्कृष्टमिहैवाविष्क्रियते ॥

## शाङ्करप्रस्थानस्य वैलक्षण्यं प्रस्थानान्तरेभ्यः

यद्यपि संप्रति प्रचलितानि द्वैतविशिष्टाद्वैतशुद्धाद्वैतादिसिद्धान्तप्रधानानि प्रक्रियान्तराणि नैवासन् भाष्यकारसमये तत्प्राक्तनकाले वा, तथाप्यासन्नेवाद्वैतप्रस्थानविशेषावलम्बिनो बहवो वृत्तिकारास्तद्ग्रन्थाश्च । ते सूत्रभाष्ये तत्तत्परामर्शादवगम्यते । तथा हि–वाक्यार्थयुक्तिप्रसङ्ख्यानवादिनः (सू ४–१–२, पा. ४६१), प्रपञ्चप्रविलयवादिनश्चेत्येते (सू. भा. ३–२–२१, पा. ३६०) विशिष्टोल्लेखपूर्वकं परामृश्य निराकृता अत्र भाष्ये । तथानेकात्मकब्रह्मवादिनो भर्तृप्रपञ्चानुयायिनः परामृष्टा निराकृताश्च आरम्भणाधिकरणभाष्ये (सू. भा. २–१–१४, पा. १९७) । एवं निर्विशेषब्रह्मवादिन एव सन्तः केचिद् वृत्तिकारा उभयलिङ्गाधिकरणभाष्ये सत्ताबोधयोः कञ्चिद् विशेषमङ्गीकुर्वाणा इव ‘ स्थिते प्रत्यस्तमितप्रपञ्चत्वे किं सल्लक्षणं ब्रह्म. उत बोधलक्षणम्, उतोभयलक्षणम् ?–

इति संशयनिवारणायाधिकरणान्तरं कल्पयन्तः परामृष्टा (सू. भा. ३-२-२१, पा. ३६०) उपलभ्यन्ते । एवं बहवः प्राचीना मुक्तौ जीवब्रह्मणोरैक्यमभ्युपयन्तोऽपि¹ विशुद्धप्रस्थानप्रक्रियानैर्मल्यसिद्ध्यर्थं निराकृतास्तत्र तत्र भाष्यकारैः । तेषां सर्वत्र समानोऽयं दोषो यद् बन्धमोक्षयोर्वास्तविकत्वमात्मनः प्रज्ञानघनत्वविघातकयत्किञ्चिद्विशेषादरणं च । तत्रापि बहवः प्राचीनवृत्तिकाराः वेदान्तानां विधिपरत्वेनैव प्रामाण्यमभ्युपगच्छन्ति स्मेति । तेषु च वावदूकेषु ये भाट्टमतमनुसृत्य ब्रह्मणः स्वातन्त्र्येण वेदप्रमाणकत्वं सर्वथा निराचक्रिरे, सर्वस्यैव च वेदस्य कर्मविधिपरत्वं वेदान्तानां कथञ्चित् स्ववाक्यगतोपासनादिकर्मविधिपरत्वं चाग्रहपूर्वकमातस्थिरे, ये च प्राभाकरसिद्धान्तमनुरुन्धाना ब्रह्मणः शास्त्रप्रमाणकत्वमूरीकृत्यापि तस्य ध्याननियोगशेषत्वमेवाभिमेनिरे, तानेवं द्वेधा विभक्तान् वेदान्तिनो व्याजीकृत्य सर्वथाप्युपासनाशेषत्वं विशुद्धब्रह्मणो निराकृतमत्र भाष्यकृद्भिः । स्वमतं च स्वतन्त्रस्यैव ब्रह्मात्मनो वेदान्तशास्त्रप्रमाणकत्वम्, ब्रह्मात्मैकत्वावगतौ सत्यां सर्वथा बाध एव सर्वेषां शास्त्राणां प्रमाणप्रमेयादिव्यवहाराणां चेत्येतत् प्रतिष्ठापितमिति सकलवेदान्तार्थसारसंग्रहभूतमिदमधिकरणद्वयम् ॥

## नियोगवादिनिराकरणे विशेषादरः

विशिष्य च नियोगवादिवेदान्तिनिराकरणे एवादरो भगवतो भाष्यकारस्येत्यत्र सन्ति लिङ्गानि सूत्रभाष्ये एव । तद्यथा – धर्मब्रह्मवाक्ययोः प्रवृत्तिभेदं दिदर्शयिषुः प्रथमसूत्रस्थाथशब्दविचारावसरे लिखति स्म भगवानाचार्यः 'या हि चोदना धर्मस्य लक्षणम्, सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति । ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलम्, अवबोधस्य चोदनाजन्यत्वात् न पुरुषोऽवबोधे नियुज्यते ; यथाक्षार्थसंनिकर्षेणार्थावबोधे, तद्वत्' (१-१-१, पा. ५) इति । अत्र हि प्रवृत्तिनिवृत्त्यन्यतरप्रयोजनत्वादेव शास्त्रस्य

---

1. प्राचीनवेदान्तप्रस्थानभेदानधिकृत्य शुद्धशाङ्करप्रक्रियाभास्करे, वेदान्तप्रक्रियाप्रत्यभिज्ञायां च वितत्य विचारः कृतोऽस्तीति तत एवात्राधिकमधिगन्तव्यम्॥

शास्त्रत्वम्-इत्यातस्थुषां नियोगवादिनामेव वेदान्तिनां मतं कटाक्षितम् । एवं प्रपञ्चप्रविलयनियोगवादिनामपि वेदान्तिनां मतं विस्तरेण प्रत्याख्यातम् उभयलिङ्गाधिकरणभाष्ये ' एकनियोगप्रतीतेः प्रयाजदर्शपूर्णमासवाक्यवत् – इति चेत्, न । ब्रह्मवाक्येषु नियोगाभावात् ' (३-२-२१, पा. ३६१) इत्यारभ्य, आ सूत्रव्याख्यानपर्यवसानात् । अपि च केवलपूर्वमीमांसोक्तन्याय-मवलम्ब्यैव वेदान्तमीमांसाशास्त्रमपि व्याख्यन्तो व्यध्वना प्रस्थिताः परामृष्टा उपलभ्यन्ते पञ्चपादिकायां नैके वृत्तिकाराः[1] । तत्रैव च भाष्यकारपरामृष्ट-वृत्तिकारमतविमर्शनात् प्रागेव लिखितमस्ति – " यः पुनः 'तस्मात् प्रतिपत्ति-विधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यम् ' इति भाष्ये पूर्वपक्षोप-संहारः, तत्र प्रतिपत्तिशब्दः सर्व एव मनोव्यापारः प्रमाणात्मक इतरो वा ब्रह्मसंस्पर्शित्वेन विधेयः कैश्चित् कथञ्चित् कल्पितः तस्य सर्वस्य संग्रहार्थो द्रष्टव्यः ॥ " (पं. पा. पा. १०५०) इति ॥

तत्र विवरणकारस्य पातनिका च " तत्र नियोगमुखेन ब्रह्मणोऽवगति-मिच्छतो नियोगब्रह्मणी न प्रमाणेन प्रमातुं शक्येते इत्येतत् प्रथमं दर्शयति " (पं. पा वि. पा. १०५०) इति । अतोऽवगम्यते – पञ्चपादिकाप्रणयनकाले तद्द्वारापि नियोगफलमिच्छन्तो वृत्तिकाराः केचनाऽऽसन् ये नियोगापूर्वं साक्षात्कारे कारणमिति मन्यन्ते स्म – इति । तस्मात्, देवताविग्रहवत्वन्यायेन ब्रह्मणः शास्त्रप्रमाणकत्वमभ्युपगन्तुर्वृत्तिकारस्य योऽसौ निरासो दृश्यते समन्व-याधिकरणद्वितीयवर्णके, स सर्वनियोगवादिमतस्योपलक्षणत्वेनैवोपस्थापितो भाष्यकारेणेति ॥

अपि चात्रान्योऽपि निश्चायकहेतुरस्ति कार्यविधिवादिनां प्रत्याख्यानायैव स्वसंप्रदायागताध्यारोपापवादप्रक्रियानुसारेण शारीरकभाष्यं प्रणीतं भगवत्पादै-रित्यत्र । यतस्ते वृत्तिकारमतखण्डनान्ते समुद्घोषयन्ति ' तस्मान्न प्रतिपत्ति-विधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः सम्भवतीत्यतः स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकम्, वेदान्तवाक्यसमन्वयात् इति सिद्धम् । एवं च सति 'अथातो

1. एतेषां मतं संगृहीतमत्र परिशिष्टचिन्तायाम् ॥

ब्रह्मजिज्ञासा ' इति तद्विषयः पृथक्शास्त्रारम्भ उपपद्यते " (१-१-४, पा. २३) इति ॥

न च केवलं भाष्यकारवचनबलादभ्यूह्यमेतत्, अपि तु प्रत्यक्षत एव टीकाकारोदाहृतकार्यविधिजिज्ञासारम्भप्रकारभेदानामवलोकनेनापीदं दृढीक्रियते यन्नियोगवादिवृत्तिकारा अन्यथान्यथा ब्रह्मजिज्ञासारम्भं समर्थयमाना आसन्निति । कृत्स्नमेव हि पञ्चपादिकाद्वितीयवर्णकं कर्तव्यविधिवादिमतविमर्शने विनियुक्तं दृश्यते । " सिद्धैव ननु ब्रह्मजिज्ञासा, ' अथातो धर्मजिज्ञासा ' इति सकलवेदार्थविचारस्योदितत्वात् । ब्रह्मज्ञानस्य च चोदनालक्षणत्वेन धर्मस्वरूपत्वात् " (पं.पा. पा. ५३१-५३२) इत्युपक्रम्य नियोगवादिवृत्तिकारैरुपस्थापितजिज्ञासारम्भणप्रकारान् विविधानुपन्यस्य तद्व्युदासानन्तरम् उपसंहृतम् " अतः पूर्वोक्तेन न्यायेन कार्यनिष्ठ एव वेदभागो विचार्यतया प्रक्रान्तो विचारितश्च, न वस्तुनिष्ठः – इत्यतो वस्तुतत्त्वनिष्ठं वेदभागं विचारयितुम् इदमारभ्यते ॥ " (पं. पा. पा. ५८८-५८९) इति । तस्मादप्यवगम्यते कार्यविधिवादिनो वृत्तिकारा एव विशिष्य भाष्यकारस्य प्रतिपक्षत्वेन मनसि स्थिताः स्वप्रक्रियानिरूपणावसरे इति ॥

## उपासनावाक्यानां स्थानं भगवत्पादीयमतेन

यद्यपि शाङ्करवेदान्तसंप्रदायाध्वनापि ब्रह्मोपासनाविधिरङ्गीकृत एव, तथापि निर्विशेषब्रह्मवाक्यानुरोधेनैव ब्रह्मस्वरूपं निर्धारयितव्यम् उपासनावाक्येष्वपि – इति मन्यते भगवान् । यत आह –

(१) " 'अस्थूलमनण्वह्रस्वमदीर्घम्' (बृ. ३-८-८), ' अशब्दमस्पर्शमरूपमव्ययम् ' (का. ३-१५), ' आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म ' (छां. ८-१४-१), ' दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः '(मुं. २-१-२), ' तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः ' (बृ. २-५-१९) – इत्येवमादीनि वाक्यानि निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि नार्थान्तरप्रधानानि – इत्येतत्प्रतिष्ठापितं ' तत्तु समन्वयात् ' (१-१-४) इत्यत्र । तस्मात्, एवञ्जातीयकेषु वाक्येषु यथाश्रुतं निराकारमेव ब्रह्मावधारयितव्यम् ।

इतराणि त्वाकारवद्ब्रह्मविषयाणि वाक्यानि न तत्प्रधानानि । उपासनाविधिप्रधानानि हि तानि । तेष्वसति विरोधे यथाश्रुतमाश्रयितव्यम् ; सति तु विरोधे 'तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि भवन्ति ' इत्येष विनिगमनायां हेतुः, येनोभयीष्वपि श्रुतिषु सतीष्वनाकारमेव ब्रह्मावधार्यते, न पुनर्विपरीतमिति ॥

सू. भा. ३-२-१४, पा. ३५७

(२) " वस्तुमात्रपर्यवसायीनि हि ब्रह्मवाक्यानि न नियोगोपदेशीनि – इत्येतत् विस्तरेण प्रतिपादितं 'तत्तु समन्वयात्' इत्यत्र ॥ "

सू. भा. ३-२-२१, पा. ३६१.

## व्याख्याने स्फुटीकृताः भाष्योपदेशाः

पूर्वपक्षनिरसनव्याजेन भाष्ये समुपस्थापिता वेदान्तदर्शनोपदेशविशेषास्तत्त्वनिर्णयाभ्यां स्फुटीकृताश्चात्र संगृह्यन्ते जिज्ञासूनामवधानार्थम् –

(१) वेदान्तशास्त्रमेकमेव सर्वज्ञस्य सर्वशक्तेर्जगज्जन्मस्थितिलयकारणस्याद्वितीयस्य ब्रह्मणोऽवगमने कारणम् ॥

(२) तस्य च शास्त्रस्य शास्त्रत्वं न विधिप्राधान्येन, नियोगोपदेशित्वेन वा; किं तर्हि ? कूटस्थनित्यस्य भूतस्य ब्रह्मात्मवस्तुन उपदेशेनैव ॥

(३) प्रवृत्तिनिवृत्तिविधिशेषभूतवस्तुव्यतिरेकेण केवलवस्तुवादी वेद एव नास्तीति केचित् वृत्तिकारा मन्यन्ते । तदसत् , ब्रह्मापराभिधानः स्वप्रकरणस्थोऽनन्यशेषश्च पुरुषः ' स एष नेति नेत्यात्मा ' इति सर्वस्यात्मत्वेनोपदिश्यमानो लभ्यते वेदान्तेषु । स चात्मत्वादेव नैव प्रत्याख्यातुं शक्यते कार्यशेषतया वा अवगन्तुम् ॥

(४) सोऽयं पुरुषः, अहंप्रत्ययविषयस्य कर्तुर्भोक्तुश्च सतो जीवस्य साक्षी सन् तद्व्यतिरेकेण सर्वभूतस्थः, समः, एकः, कूटस्थनित्यः, – इत्युपनिषत्स्वेवोपदिष्टत्वात् औपनिषद् इत्याख्यायते । आत्मत्वादेव च न हेय उपादेयो वा सः, येन कार्यशेषः स्यात् ॥

(५) तदीदृशं ब्रह्मात्मतत्त्वं वेदान्तशास्त्रैकगम्यमिति निश्चीयते, सर्ववेदान्तवाक्यानां तत्स्थपदानां च तस्मिन्नेव समन्वयात् ॥

(६) समन्वयस्तु वाक्यानां पदानां वा ब्रह्मणि न साक्षादभिधानाभिधेयसंबन्धमूलकःथावसेयः, ब्रह्मणोऽशाज्ञनसगोचरत्वात् । अध्यारोपापवादप्रक्रियया वेदान्तैर्बोधितस्त्वधिकारी शास्त्रवाक्यानां तत्स्थपदानां च ब्रह्मात्मावगमने सामर्थ्यं निश्चिनोति ॥

(७) मोक्षाख्यमशरीरत्वं ब्रह्मविद्याफलं स्वात्मनि स्वभाव एवेति जीवतैव विदुषा अवगन्तुं शक्यते ॥

(८) वेदान्तवाक्योपदेशजन्यब्रह्मात्मावगतेः फलं मोक्षः । स च प्रतिबन्धभूताविद्यानिवृत्तिमात्रलभ्यः न तु वाक्यार्थज्ञानोदयानन्तरमपि ब्रह्मसाक्षात्कारार्थं प्रयत्नमपेक्षते ॥

(९) वेदान्तवाक्यजन्यं ज्ञानं प्रत्यक्षादिप्रमाणजन्यज्ञानवदवगतिरूपमेवेति वस्तुतन्त्रं प्रमाणानुगुणं च, न तु पुरुषतन्त्रं चोदनातन्त्रं वा, वेदविहितध्यानक्रियावत् । नापि विधिक्रियासलक्षणम् । अत एव वेदान्तवाक्यजनितज्ञानगम्यमपि न विधिक्रियाविषयभूतं नाप्युपासनक्रियाविषयभूतं तदिति वेदान्ता वदन्ति ॥

(१०) वेदान्तवाक्यजन्यं ज्ञानं वस्तुतन्त्रत्वादेव न विध्यर्हम् । ज्ञानोपायत्वेन वेदान्तोपदिष्टानि श्रवणादीन्यपि न कर्तव्यतया विधीयन्ते । विधिच्छायान्यपि 'श्रोतव्यः' इत्यादीनि वचनानि मुमुक्षुं प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति ; तत्रापि प्रणिधानमात्रमेव कुर्यादित्युपदिश्यते न पुनः श्रवणादिज्ञानमेव, अविधेयत्वादेव ज्ञानस्य ॥

(११) अन्तर्मुखस्य पुरुषस्य कस्यचिच्छ्रवणमात्रेणाप्यवगतिर्जायते । पदार्थज्ञाने प्रतिबन्धे सति तु तदपनयनाय मनननिदिध्यासने अपि कर्तव्यत्वेनोपदिश्येते अवगत्यर्थत्वेनैव ; न पुनरवगतं ब्रह्म मननादौ विनियुज्यते मननाद्युपदेशवाक्यैः ॥

(१२) यथैव ब्रह्मणि वेदान्तवाक्यानां तात्पर्यपदानां च समन्वयः, तथैव ब्रह्मणो जिज्ञास्यत्वं जगज्जन्मादिकारणत्वं शास्त्रकारणत्वं च अध्यारोपापवादप्रक्रिययैवोपदिश्यते वेदान्तेषु ॥

(१३) ब्रह्मात्मैकत्वनिश्चयावसानमेव विधिप्रतिषेधशास्त्रस्य वेदान्तशास्त्रस्य च शास्त्रत्वं प्रामाण्यं च प्रत्यक्षादिवत् । निश्चयमनु सर्वस्यैव व्यवहारस्य बाध एव स्यात् ॥

## व्याख्यानप्रस्थानानां विमर्शः

यथैव सुगमायां जिज्ञासाधिकरण-जन्माद्यधिकरणविवेचन्योश्च भाष्यार्थनिर्णयो व्याख्यानप्रस्थानप्रक्रियाणां विमर्शपूर्वकमेव कृतः, एवमेवात्रापि तत्र तत्र व्याख्याग्रन्थशरीरे परिशिष्टचिन्तायां च पुनरुक्तिभयं परित्यज्यैवाकारि, भाष्यानुसारिवेदान्तार्थनिर्णये निरातङ्को भूयात् जिज्ञासूनां पन्था इति । विशिष्य च परिशिष्टचिन्तायाम् (१) अधिकरणभाष्यार्थसारः, (२) समन्वयसतत्त्वविचारः, शास्त्रप्रामाण्यसतत्त्वविचारश्च, (३) अध्यारोपापवादप्रक्रिया, (४) श्रवणादीनां स्वरूपकृत्यादिगता चिन्ता, (५) ब्रह्मात्मसाक्षात्कारवादपरीक्षा च – इत्येते विषयाः पञ्चपादिकाविवरणभामतीप्रस्थानरीत्या वार्तिककारमतरीत्या च सविस्तरं निरूप्य विशुद्धभाष्यप्रस्थानरीत्या विनिर्णीताः ॥

नन्वेवं श्रुत्यनुभवपूर्णानां कथं विनियोगो ब्रह्मात्मावगतौ जनयितव्यायाम्, किं वा तत्र वैलक्षण्यं भाष्यकारमतस्य अन्यान्तराचार्यप्रकारेभ्यः ? – इत्येतन्निस्संशयं निर्धारितं व्याख्यानग्रन्थशरीरे परिशिष्टचिन्तायां च । अर्वाचीनभाष्याण्यद्वैतेतरसिद्धान्तप्रधानान्यसांप्रदायिकानीति कृत्वा नातीव तेषां विमर्शेऽभिनिवेश आस्थितोऽत्र । वेदान्तविचारधारेतिहासदर्शनेन वेदान्ताऽसाधारणप्रक्रियानिर्धारणार्थमेव प्रवृत्तायां प्रक्रियाप्रत्यभिज्ञायामेव तु ते स्थानं भजेरन्निति युक्तम् । तथापि तु साक्षाद्वाराद्वा उपासनारूपज्ञानविधिध्याननियोगान्यतरपक्षपातीनि तान्यपीति दृष्ट्या तेषामपि विमर्शः कृत एव भवति प्रकृतभाष्यार्थतत्त्वविवेचन्या इत्येव मतिर्मम ॥

# उपसंहारः, कृतज्ञताप्रकटनं च

तदित्थं भगवत्पादीयसम्प्रदायागतप्रस्थानप्रक्रियाभक्तिप्रणुन्नोऽहं भाष्यार्थतत्त्वविवेचन्या विभागान्तरमिवेममपि विभागं यथामति निर्माय जगद्गुरुभ्यो भगवत्पादाचार्येभ्यः सप्रश्रयं समर्पयामीत्येतावतैव सन्तुष्टोऽहम् । यदि पुनः सहृदया विद्वांसः संपरिशीलयेमां व्याख्यां भाषादोषान् विचारसरणिदोषांश्चात्रोपलभ्यमानान् मह्यं निर्दिशेयुः सकार्तज्ञ्यप्रकटनमुत्तरसंस्करणे तेषामपमार्जने प्रयतेयम् ॥

इमं ग्रन्थं यथालिखितं सकृदवलोक्य संशोधने सहायीभूतस्य (१) वेदान्तशिरोमणीत्यादिबिरुदाङ्कितस्य ब्र. श्री. परकूजे सुब्रह्मण्यभट्टस्य, (२) मुद्रणस्खालित्यापसरणादौ सहायीभूतयोः (1) कार्यालयपण्डितः लक्ष्मीनरसिंहमूर्तिशास्त्री, अध्यात्मविद्याप्रवीणः, (2) के. जि. सुब्रह्मण्यशर्मा, विद्यार्थी चेत्येतयोरुपकृतिं भगवन्नारायणस्मरणपूर्वकमिहोल्लिखामि । ग्रन्थप्रकाशनधूर्वहानाम् अध्यात्मप्रकाशकार्यालयाधिकारिणामुपकृतिश्च यथापूर्वं संस्मरणीयेति शम् ॥

होळेनरसीपुरम्<br>
श्रीसाधारणसंवत्सरे<br>
भाद्रपदकृष्णद्वितीयायाम्

**श्रीसच्चिदानन्देन्द्रसरस्वतीभिक्षुः**<br>
व्याख्याननिर्माता.

# विषयानुक्रमणिका

पृष्ठानि

## शास्त्रयोनित्वाधिकरणभाष्यम् — १–३

### १. सूत्रसङ्गतिः

ग्रन्थसंबन्धप्रकाशनार्थं वृत्तानुद्रवणम् (१) – वर्तिष्यमाणग्रन्थार्थः (२) — ४–६

### २. सूत्रार्थः

शास्त्रस्य महत्त्वम् (३) – शास्त्रस्य सर्वज्ञकल्पत्वम् (४) — ६–८

### ब्रह्मणो निरतिशयसर्वज्ञत्वे युक्तिः

ब्रह्मणो निरतिशयसर्वज्ञत्वम् (५) – ब्रह्मणः सर्वशक्तिमत्त्वम् (६) – ब्रह्मणः सर्वज्ञत्वं किंरूपम् ? (७) – एकदेशीयव्याख्यानं तद्विमर्शश्च (८) – उपसंहारः (९) — ९–१६

## प्रथमवर्णके परिशिष्टम्

### १. अधिकरणभाष्यार्थः

अधिकरणे विचारविषयः (१०) – संशयः निर्णये प्रयोजनं च (११) – एकीयमतेन पूर्वपक्षः, सिद्धान्तश्च (१२) – एकीयमतविमर्शः (१३) भाष्यकारसंमतः सिद्धान्तः (१४) — १७–२१

### २. ईश्वरस्य सर्वज्ञत्वसंभवविषये आक्षेपपरिहारौ

सर्वज्ञत्वविषये शङ्का (१५) – अत्र केषाञ्चिन्मतम्, तद्विमर्शश्च (१६) – सर्वज्ञत्वविषये सिद्धान्तः (१७) — २१–२५

पृष्ठानि

## शास्त्रयोनित्वाधिकरणे द्वितीयं वर्णकम्


### ३. सूत्रार्थः

द्वितीयवर्णकरीत्या अधिकरणसंबन्धः (१८) – एकीयमतेनाधिकरणसङ्गतिः, तद्दूषणं च (१९) – सूत्राक्षरयोजना (२०) २६–२७

### ४. ब्रह्मणो जगज्जन्मादिकारणत्वे शास्त्रम्

जगत्कारणवादीनि शास्त्रवाक्यानि (२१) २७–२८

### ५. पृथक्सूत्रणावश्यकता

एकीयमतेन सूत्रसङ्गतिः, तद्विमर्शश्च (२२) – भाष्यसम्मता सूत्रसङ्गतिः (२३) – शास्त्रयोनित्वसूत्रम् उत्तरार्थमपि (२४) २८–३२


## समन्वयाधिकरणम्

### ( प्रथमं वर्णकम् )


भाष्यम् ३३–३५

### १. ब्रह्मणः शास्त्रप्रमाणकत्वे आक्षेपः

सूत्रसङ्गतिः (२५) ३६–३७

### २. भाट्टमतेन वेदान्तानां विनियोगः

वेदान्तानां प्रामाण्याय क्रियार्थत्वं क्रियाविधिशेषत्वं वा अभ्युपगन्तव्यम् (२६) – शास्त्रस्य क्रियापरत्वे जैमिनिवचनं प्रमाणम् (२७) ३७–४१

### ३. भाट्टमतोपसंहारः

भाट्टाक्षेपोपसंहारः (२८) ४२–४३

### ४. सूत्रार्थः

वेदान्तशास्त्राद् ब्रह्मावगतिः (२९) – सूत्रस्थपदार्थव्याख्यानम् (३०) – वेदान्तशास्त्रप्रामाण्ये उपपत्तिः (३१) – छान्दोग्ये वाक्यसमन्वयः (३२) – ऐतरेयवाक्योदाहरणम् (३३) – बृहदारण्यकवाक्यम् (३४) – मुण्डकवाक्यानां ब्रह्मणि समन्वयः (३५) – अत्र सर्वत्रोदाहृतानि

पृष्ठानि

कारणब्रह्मवाक्यान्येव (३६) – वेदान्तवाक्यानाम् एकरूप एव ब्रह्मणि समन्वयः (३७) – वाक्यगतपदानां समन्वयः (३८) – वेदान्तानां न क्रियार्थत्वम् (३९) – वेदान्तानामक्रियार्थत्वेऽपि नानर्थक्यम् (४०) ४३–५६

५. भाट्टयुक्तीनां निरासः

वेदान्तानां न कर्तृस्वरूपप्रतिपादनपरत्वम् (४१) – ब्रह्मणः परिनिष्ठित-वस्तुत्वेऽपि न प्रमाणान्तरवेद्यता (४२) – फलवदर्थावबोधकत्वेनापि वेदान्तानां प्रामाण्यम् (४३)–वेदान्तानां न देवतादिप्रतिपादनद्वारा क्रियाविधिशेषत्वम् (४४) – निर्गुणब्रह्मणो न विधिशेषत्वं संभवति (४५)–द्वैतविज्ञानोपमर्द एवानुपपन्न इति मतम्, तद्विमर्शश्च (४६) – कर्मकाण्डवाक्यनिदर्शनानयनमयुक्तम् (४७) ५६–७०

६. उपसंहारः

शास्त्रैकगम्यं ब्रह्म इति कोऽर्थः ? (४८) ७०–७१

## समन्वयाधिकरणभाष्यम् ७२–८९

### ( द्वितीयं वर्णकम् )

१. (पूर्वपक्षः) प्रतिपत्तिविधिशेषतया शास्त्रप्रमाणकं ब्रह्म

उत्तरग्रन्थसङ्गतिः (४९) – अत्रत्यपूर्वपक्षस्य भाट्टपूर्वपक्षाद् वैलक्षण्यम् (५०) – पूर्वपक्षानुवादः (५१) – शास्त्रस्य शास्त्रत्वान्यथानुपपत्त्या विधिशेषत्वं ब्रह्मण अङ्गीकर्तव्यम् (५२) – भूतवस्तूपदेशः कार्य-शेषतया (५३) ९०–९७

२. (पू.) मुमुक्षुर्ब्रह्मोपासने नियुज्यते

ज्ञानकाण्डे को नियोगविषयः, को नियोज्यश्च ? (५४) – ज्ञानकाण्डे जिज्ञास्यस्य ब्रह्मणः कर्मशेषभूतवस्तुसमानयोगक्षेमता (५५) ९७–१०२

३. (पू.) वस्तुमात्रकथने वेदानामानर्थक्यम्

वस्तुमात्रकथनं निष्प्रयोजनम् (५६) – ब्रह्मवस्तुमात्रोपदेशश्रवण-ज्ञानेनाविद्यानिवृत्तिः स्यादिति शङ्का (५७) १०२–१०५

पृष्ठानि


४. सिद्धान्तः – कर्मब्रह्मविद्याफलयोर्वैलक्षण्यम्

उत्तरग्रन्थसंबन्धः (५८) – धर्माधर्मयोर्जिज्ञास्यत्वं पूर्वतन्त्रे (५९) – धर्माधर्मफलतारतम्यप्रपञ्चनम् (६०)– कर्मब्रह्मविद्याफलयोर्वैलक्षण्यम् (६१) – सशरीरत्वमेव संसारित्वम्, अशरीरत्वं तु मोक्षः - इत्यत्र श्रुतिप्रमाणम् (६२) १०६–११५

५. मोक्षाख्यस्याशरीरत्वस्य स्वाभाविकत्वम्

अशरीरत्वं न कार्यम् (६३) – अशरीरत्वं कूटस्थनित्यम् (६४) – कर्मब्रह्मविद्याफलवैलक्षण्योपसंहारः (६५)– काण्डयोर्जिज्ञास्यवैलक्षण्यमपि निराबाधम् (६६) – कार्यविधिवादिमते दोषः (६७) – फलजिज्ञास्यवैलक्षण्यचिन्तोपसंहारः (६८) ११६–१२४

६. विद्यानन्तरमेव मोक्षः, न स कार्यान्तरापेक्षः

ज्ञानानन्तरमेव मोक्षं दर्शयन्त्यः श्रुतयः (६९) – अविद्याबाधनमात्रं ब्रह्मज्ञानकृत्यम् (७०) – विद्यानिवर्त्याविद्यास्वरूपम् (७१) – मिथ्याज्ञाननिवृत्तिमात्रेण सर्वसंसारदुःखनिवृत्तिरित्यत्र दर्शनान्तरसम्मतिः (७२) १२४–१३३

७. ब्रह्मात्मैकत्वज्ञानं न संपदादिरूपम्

उत्तरग्रन्थसंबन्धः (७३) – ब्रह्मात्मैकत्वविज्ञानस्य संपदादिरूपत्वे किं बाधकम् ? (७४) १३४–१३९

८. ब्रह्मणस्तज्ज्ञानस्य च न कार्यानुप्रवेशः शक्यकल्पनः

ब्रह्मज्ञानस्य वस्तुतन्त्रत्वम् (७५) – ब्रह्मणो न विदिक्रियाकर्मत्वम् (७६) – उपास्तिक्रियाकर्मत्वमपि नास्ति ब्रह्मणः (७७) १३९–१४६

९. अविषयस्य ब्रह्मणः शास्त्रयोनित्वं कथम् ?

ब्रह्मणोऽविषयत्वे शङ्का (७८) – बाह्यप्रमेयेष्वपि न प्रमाणव्यापारविषयत्वमस्ति (७९) – अविद्याकल्पितत्वं वेद्यवेदितृवेदनादिभेदाना-

पृष्ठानि

मिति कथम् ? (८०) – ब्रह्मणः सर्वथाप्यविषयत्वे शास्त्रं प्रमाणम् (८१) – अविद्याकृतभेदापनयनमेव शास्त्रकृत्यमित्यभ्युपगमे प्रयोजनान्तरम् (८२) १४६–१५२

**१०. क्रियानुप्रवेशाभावे मोक्षस्योत्पाद्यत्वाद्यभावोऽपि हेतुः**

अत्र मोक्षस्योत्पाद्यत्वादिनिराकरणे प्रयोजनम् (८३) – मोक्षे नोत्पाद्यत्वविकार्यत्वाप्यत्वानि संभवन्ति (८४) – संस्कार्यत्वपक्षे विशेषः (८५) – न चानात्मसंस्कारेणात्मा संस्क्रियते (८६) – अहंप्रत्ययविषय आत्मा संस्कार्यः तत्साक्षी तु शुद्धः (८७)–अहंप्रत्ययविषयस्याऽऽत्मनः कर्तृत्वं कथम् ? (८८) – उत्पाद्यादिचतुष्टयव्यतिरिक्तं क्रियानुप्रवेशद्वारं नास्ति (८९) १५२–१६८

**११. ब्रह्मात्मज्ञानं न क्रिया**

(क्रियावादि) पूर्वपक्षस्य किमुत्थानम् ? (९०)–व्याख्यातृविशेषमतेन पूर्वपक्ष्याशयः (९१) – ध्यानज्ञानयोर्वैलक्षण्यम् (९२)– ज्ञानं क्रियेति व्याख्यानकारमतं भाष्यविरुद्धम् (९३) – ज्ञानं प्रमाणजन्यमिति कथम् ? (९४) १६८–१७७

**१२. ब्रह्मज्ञानविषये श्रूयमाणानां लिङादीनां गतिः**

ब्रह्मात्मज्ञानं न चोदनातन्त्रम् (९५) – द्रष्टव्यादिवचनानां गतिः (९६) – द्रष्टव्यादिश्रुतीनामविधिपरत्वं वाक्यशेषेणापि गम्यते (९७) १७७–१८३

**१३. आत्मज्ञाने सर्वकर्तव्यताहानिः कृतकृत्यता च**

वस्तुमात्रबोधकस्यापि शास्त्रस्य सप्रयोजनत्वमस्ति (९८) – उपसंहारः (९९) १८४–१८७

**१४. केवलवस्तुवाद्यपि वेदभागोऽस्ति**

औपनिषदः पुरुषोऽप्रत्याख्येयः (१००) – उपनिषत्प्रतिपाद्य आत्मा नाहंप्रत्ययविषयः (१०१) – पुरुषे क्रियासाध्यातिशयाभावादेव न

पृष्ठानि

विधिशेषता (१०२) – अनन्यशेषः पुरुषः श्रुत्यैकसमधिगम्य इत्यत्र गमकम् (१०३) – उपसंहारः (१०४) १८७–१९७

१५. भूतवस्तूपदेशोऽत्र पूर्वतन्त्र इवोपपन्नः

भूतवस्तूपदेशस्य नैकान्तेनानर्थक्यम् (१०५) – ब्रह्मवस्तूपदेशोऽपि सप्रयोजनः (१०६) १९७–२०१

१६. निवृत्त्युपदेशानामिव ब्रह्मवस्तूपदेशस्यापि सार्थक्यम्

क्रियातत्साधनव्यतिरिक्तोपदेशस्यानर्थक्यमिति शङ्का पूर्वपक्षिणः स्वाभ्युपगमविरुद्धा (१०७) – अक्रियार्थानामानर्थक्यं कुत्र ? (१०८) २०१–२०४

१७. वस्तुमात्रकथनेऽपि सप्रयोजनत्वं दृष्टम्

वाक्यश्रवणमात्रादवगतब्रह्मात्मभावस्य तावतैव कृतार्थत्वम् (१०९) – अत्र व्याख्यानप्रस्थानीयैरानीतः साक्षात्कारवादो भाष्याक्षरानारूढः, अप्रकृतश्च (११०) – प्रस्थानान्तरावलम्बिनां प्रक्रिया, साक्षात्कारविषये (१११) २०५–२१०

१८. जीवतोऽपि विदुषोऽशरीरत्वम्

शरीरसंबन्धो जीवस्य मिथ्याज्ञाननिमित्तः (११२) – सशरीरत्वं न कर्मनिमित्तमात्मनः (११३) – आत्मनः कर्तृत्वमेव तावन्नास्ति (११४) आत्मनः शरीरादौ अहंप्रत्ययो मिथ्यैव (११५) – अत्र व्याख्यानप्रस्थानीयानां कल्पनाविशेषाः (११६) – जीवतोऽपि विदुषोऽप्यशरीरत्वे प्रमाणम् (११७) – श्रवणमात्रादवगतब्रह्मात्मभावस्यापि संसारित्वं बाध्यते (११८) २१०–२२६

१९. श्रवणवन्मनननिदिध्यासनयोरपि अवगत्यर्थत्वमेव

उत्तरग्रन्थसंगतिः (११९) – मनननिदिध्यासनयोरप्यवगत्यर्थत्वमित्यस्य कोऽर्थः ? (१२०) – श्रवणादीनां विनियोगो व्याख्यानप्रस्थानरीत्या तद्विमर्शश्च (१२१) – प्रकृतचिन्तोपसंहारः (१२२) २२६–२३३

पृष्ठानि

२०. ब्रह्मविषयकपृथक्शास्त्रारम्भान्यथानुपपत्त्यापि शास्त्रप्रमाणकत्वं ब्रह्मणः

पृथक्शास्त्रारम्भान्यथानुपपत्तिरपि प्रमाणं स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकमित्यत्र (१२३) २३३-२३६

२१. ब्रह्मज्ञानानन्तरं सर्वव्यवहाराभावाच्च न विधिशेषत्वं ब्रह्मणः

धर्मब्रह्मज्ञानयोर्विरुद्धस्वभावत्वादपि वृत्तिकारमतं हेयम् (१२४) – ब्रह्मात्मत्वावगतेरूर्ध्वमपि प्रमाणाद्यननुवृत्तौ उपपत्तिः (१२५) – अधिकरणार्थे सांप्रदायिकोक्तिसंवादः (१२६) – गौणमिथ्यात्मनोऽसत्त्वे-इत्यादिश्लोकस्यार्थः (१२७)-अन्वेष्टव्यात्मविज्ञानात् - इत्यादिश्लोकस्याभिप्रायः (१२८) – देहात्मप्रत्ययो यद्वत्-इत्यादिश्लोकस्यार्थः (१२९)– तृतीयश्लोकाभिप्रायवर्णनं व्याख्यानप्रस्थानीयरीत्या(१३०) – पूर्वाचार्योक्तेर्निर्गलितार्थः (१३१) २३६-२४९

## समन्वयाधिकरणे परिशिष्टचिन्ता

१. अधिकरणभाष्यार्थसारः (प्रथमवर्णकरीत्या)

अधिकरणे विचारविषयः (१३२) – विषयवाक्यानि, तद्विषये संशयश्च (१३३) – पूर्वः पक्षः (१३४) – सिद्धान्तः (१३५) २५०-२५२

२. द्वितीयवर्णकरीत्या अधिकरणसारः

ग्रन्थसंबन्धः (१३६)– विषयवाक्यानि (१३७)– तत्र संशयः (१३८) पूर्वः पक्षः (१३९) – सिद्धान्तः (१४०) – पूर्वपक्षीययुक्तिः तत्परिहारश्च व्याख्यानप्रस्थानरीत्या (१४१) २५२-२५७

३. समन्वयसतत्त्वविचारः, शास्त्रप्रामाण्यसतत्त्वविमर्शश्च

भाष्ये विमर्शनीयांशः (१४२) – समन्वयपदार्थविवेचनं प्राचीनटीकाकारमतेन (१४३) – टीकाकारमतपरिशीलनम् (१४४)– ब्रह्मसिद्धिकार-

पृष्ठानि

मतं तद्विमर्शश्च (१४५) – ब्रह्मसिद्धिकारस्य कल्पनान्तरं तद्विमर्शश्च (१४६) – व्याख्यानप्रस्थानीयानां मतभेदाः, तद्विमर्शश्च (१४७)– पदवाक्यसमन्वयवाचोयुक्त्या किं विवक्षितं भाष्ये ? (१४८) – तत्त्वमसीत्यादिवाक्यानां ब्रह्मणि प्रमाणत्वं कथम् ? (१४९) २५७–२७४

४. अध्यारोपापवादप्रक्रिया

प्रक्रियास्वरूपम् (१५०) – विद्याविद्याविभागभाष्ये प्रकृतप्रक्रियाश्रयणम् (१५१) – ब्रह्मजिज्ञासासूत्रेऽपि समादृतेयं प्रक्रिया (१५२) – जन्मादिसूत्रेऽपि स्वीकृतेयं वेदान्तप्रक्रिया (१५३) – कार्यस्य जगतोऽनिर्वचनीयत्वं प्रतीत्या, कारणानन्यत्वं तु वस्तुतः (१५४) – शास्त्रयोनित्वाधिकरणेऽपीयं प्रक्रिया स्वीकृता (१५५)–वेदान्तवाक्य-समन्वयोऽप्यध्यारोपदृष्ट्यैव, वेदान्तशास्त्रप्रामाण्यवाचोयुक्तिरपि तथैव (१५६) – प्रक्रियासतत्त्वविचारोपसंहारः (१५७) २७४–२८८

५. श्रवणादीनां स्वरूपकृत्यादिगता चिन्ता।

वृत्तिकारमतम् (१५८) – पञ्चपादिकाकारमतम् (१५९) – भामतीकार-मतम् (१६०) – विवरणप्रस्थानरीत्या वृत्तिकारमतम् (१६१) – श्रवणादीनां स्वरूपं कृत्यं च (१६२) – श्रवणादिविषये पञ्चपादिकाभि-प्रायः (१६३) – भामतीकारमतं श्रवणादिविषये (१६४) – विवरणकारमतम् (१६५) – वार्तिकप्रस्थानम् (१६६) २८८–३११

६. उपसंहारः ३११–३१२

# सङ्केताक्षरविवरणम्

**विशेषः** – उपनिषदस्तत्तन्नामप्रथमाक्षरेणैव सूचिताः, सङ्केताक्षरानुबद्ध 'पा.' इति पत्रपार्श्वसंख्यासूचकः सङ्केतः ; 'भा.' इति तु तत्तद्भाष्यसूचकः । अवशिष्ट-सङ्केतास्तु इह विव्रीयन्ते –

| **सङ्केतः** | **विवरणम्** |
|---|---|
| **ऐ. ब्रा.** | एतरेयब्राह्मणे |
| **खं.** | खण्डे |
| **गी.** | भगवद्गीतासु |
| **गौ. का.** | गौडपादीयकारिकासु |
| **जन्म.** | जन्माद्यधिकरणभाष्यार्थतत्त्वविवेचन्याम् |
| **जि.** | जिज्ञासाधिकरण |
| **जै.** | जैमिनीयसूत्रेषु |
| **तं. वा.** | तन्त्रवार्तिके |
| **तै. सं** | तैत्तिरीयसंहितासु |
| **पं. (पं. पा.)** | पञ्चपादिकायाम् |
| **पं. वि. (पं.पा. वि.)** | पञ्चपादिकाविवरणे |
| **बृ. वा.** | बृहदारण्यकवार्तिके |
| **भा. (वा. भा.)** | भामत्यां वाचस्पतिमिश्रविरचितायाम् |
| **मां. भा.** | माण्डूक्यभाष्ये |
| **शा. भा.** | शाबरभाष्ये |
| **सु.** | सुगमायाम् |
| **सू. भा.** | ब्रह्मसूत्रभाष्ये |
| **सू. सं.** | सूतसंहितायाम् |

# अशुद्धिशोधनम्

अ = अधरोत्तरं गणने

| पृष्ठे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| ७ | ३ | प्रमाणेन | प्रमाणत्वेन |
| २४ | अ. १ | करणादिवृत्ति | करणवृत्त्युत्पत्ति |
| ३० | २ | इत्युक्तम् । | इत्युक्तम् , |
| ४५ | ५ | प्रमाणान्तरेण | प्रमाणान्तरात् |
| ४५ | ५ | कर्मपरवाक्यैर्वा | कर्मपरवाक्येभ्यो वा |
| ४९ | ४ | ब्रह्मणि | ब्रह्मात्मनि |
| ५२ | ९ | अवगम्यते | अवगम्यते ब्रह्म |
| ५३ | अ. २ | ... | (संयोजनीयम्) वाक्यगतपदानां समन्वयः |
| ५४ | २ | प्रतिवाक्यम् | प्रत्येकं वाक्यं |
| ५८ | अ. ८ | ब्रह्मणो | ब्रह्मणः |
| ५९ | ४ | भाव्यत्वम् | भव्यत्वम् |
| ५९ | ८ | निराकृतम् | तत्र निराकृतम् |
| ६३ | ८ | इत्यादिषु | इत्याद्यासु |
| ६७ | अ. १ | सुषुप्तौ, | सुषुप्तौ, तत्र |
| ६७ | अ. ६ | बद्धकङ्कणोऽसि- | बद्धकङ्कणोऽस्ति |
| ७० | अ. १ | इति | पं. पा. |
| १०४ | ७ | शङ्का | शङ्का तत्परिहृतिश्च |
| १०९ | ९ | ाधर्मजिज्ञासा | ऽधर्मजिज्ञासा |
| ११७ | ८ | आचष्टे | आचष्टे श्रुतिः |
| १३० | ६ | इति | इत्यर्थः । |
| १४८ | ६ | ब्रह्मण्यधिगते | ब्रह्मण्यवगते |

| पृष्ठे | पङ्क्तौ | स्थाने | पठितव्यम् |
|---|---|---|---|
| १५० | ३ | धीनतया | धीनया |
| १५० | ६ | इति | (भा. १२५) इति |
| १६३ | १० | देहेनासंहत | देहेन संहत |
| १९३ | ३ | मन्यन्ते । | मन्यन्ते । अतस्तर्क |
| १९६ | ३ | पुरुषो | पुरुषः |
| २१४ | अ. २ | यद्यपि | ( त्यक्तव्यमेतत् ) |
| २१५ | अ. ७ | इति | ,, |
| ,, | अ. ६ | तत्र | (संयोजना) स्मृतिरपीति |
| ,, | अ. ५ | इत्याद्या | .... इत्याद्या |
| २१६ | अ. ६ | लोके | लोकेऽपि |
| २१६ | अ. १ | दर्शनात् | योर्विधिदर्शनात् |
| २१७ | अ. ६ | मननिदिध्यासनयोर्द | मननिदिध्यासनयोर्विधिद... |
| २१९ | अ. १ | यदेव | यथैव |
| २३३ | अ. ५ | ब्रह्मविषय | ब्रह्मविषयक |
| २३८ | ७ | प्रमाणाद्यनुवृत्ती | प्रमाणाद्यननुवृत्तौ |
| २४५ | अ. १० | इतिश्लोक.... | इत्यादिश्लोक.... |
| २५६ | अ. ८ | दर्पकिंनाद्यव | किंच दर्पाद्यवः |
| ,, | अ. ८ | सिद्धि | सिद्ध |
| ,, | अ. १ | न शक्या | शक्या |
| २५८ | अ. १ | ञ्चो.... | प्रपञ्चो.... |
| २७२ | ८ | इति | इत्यादि |
| २९५ | ४, ५, ६ | अन्यथा .... इति | (परित्यक्तव्यं वाक्यम्) |

॥ ॐ ॥

श्रीशङ्करभगवत्पादविरचितं

# शारीरकमीमांसाभाष्यम्

## प्रथमाध्याये प्रथमः पादः

तत्र

## ३. शास्त्रयोनित्वाधिकरणम्

( प्रथमं वर्णकम् )

### सूत्रसङ्गतिः

१. जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्म – इत्युपक्षिप्तम् । तदेव द्रढयन् आह –

## शास्त्रयोनित्वात् ॥ ३ ॥

### सूत्रार्थः

२. शास्त्रयोनित्वात् इति । महतः ऋग्वेदादेः शास्त्रस्य अनेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्वार्थावद्योतिनः, सर्वज्ञकल्पस्य, योनिः कारणं ब्रह्म ॥

## ब्रह्मणो निरतिशयसर्वज्ञत्वे युक्तिः

३. न हि ईदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोऽस्ति । यद्यद्विस्तरार्थं शास्त्रं यस्मात् पुरुषविशेषात् संभवति – यथा व्याकरणादि पाणिन्यादेः – ज्ञेयैकदेशार्थमपि, स ततोऽप्यधिकतरविज्ञान इति प्रसिद्धं लोके, किमु वक्तव्यम् अनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोः, ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्य, अप्रयत्नेनैव लीलान्यायेन पुरुषनिःश्वासवद्, यस्मान्महतो भूताद्योनेः संभवः, 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' (बृ. २–४–१०) इत्यादिश्रुतेः, तस्य महतो भूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्त्वं च ? – इति ॥

इति शास्त्रयोनित्वाधिकरणभाष्ये प्रथमं वर्णकम् ॥

( अथ द्वितीयं वर्णकम् )

## सूत्रार्थः

४. अथवा यथोक्तम् ऋग्वेदादिशास्त्रं योनिः कारणं प्रमाणम् अस्य ब्रह्मणो यथावत्स्वरूपाधिगमे । शास्त्रादेव प्रमाणात्, जगतो जन्मादिकारणं ब्रह्माधिगम्यते इत्यभिप्रायः ॥

## ब्रह्मणो जगज्जन्मादिकारणत्वे शास्त्रम्

५. शास्त्रम् उदाहृतं पूर्वसूत्रे 'यतो वा इमानि भूतानि जायन्ते' इत्यादि ॥

## पृथक्सूत्रणावश्यकता

६. किमर्थं तर्हीदं सूत्रम्, यावता पूर्वसूत्र एवैवञ्जातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितम् ? उच्यते । तत्र पूर्वसूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानात् जन्मादि[1] केवलमनुमानम् उपन्यस्तम् इत्याशङ्क्येत, तामाशङ्कां निवर्तयितुम् इदं सूत्रं प्रववृते, 'शास्त्रयोनित्वात्' इति ॥

इति शास्त्रयोनित्वाधिकरणभाष्ये द्वितीयं वर्णकम् ॥

1. 'जन्मादि' इत्यस्य 'अनुमानम्' इत्यनेनान्वयानुपपत्तेः 'जन्मादौ' इति, 'जन्मादीति' इति वा पाठो युक्तः – इति भाति । 'जन्मादिसूत्रेण' इति कुत्रचित पाठः ; तत्र तु 'जन्मादिसूत्रेण' इति सर्वमपि त्यक्तुं शक्यम् ॥

॥ ॐ ॥

# सूत्रभाष्यार्थतत्त्वविवेचनी

यस्य निःश्वसितं वेदो यो वेदेभ्योऽखिलं जगत् ।
अकर्तारमविज्ञेयमव्ययं तमहं भजे ॥

## १. सूत्रसङ्गतिः

जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्म इत्युपक्षिप्तम् । तदेव द्रढयन् आह

१. ग्रन्थसंबन्धप्रकाशनार्थं वृत्तानुद्रवणम् – नमो बादरायणाय ! नमः शङ्कराय ! प्रत्यस्तमितसमस्तप्रपञ्चे नित्यशुद्धबुद्धमुक्तस्वभावे परमात्मनि सर्वथाप्यविद्यासंस्पर्शस्यासंभवेऽपि तत्स्वरूपानिर्धारणात् सत्यानृतयोरात्मानात्मनोर्मिथुनीकरणेन अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारो दरीदृश्यते । तमेतम् अध्यासम् अविद्याख्यम् आत्मनि सिद्धवत्कृत्य आत्मैकत्वविद्यां प्रतिपादयितुं सर्वे वेदान्ता आरभ्यन्ते – इति प्रतिज्ञातं शास्त्रोपोद्घातरूपेऽध्यासभाष्ये (सू. पा. ९५) । तमेतम् अध्यासं तत्त्वोपदेशार्थमध्यारोपदृष्ट्या उररीकृतम् उपजीव्यैव जिज्ञासोरात्मभूतेऽपि ब्रह्मणि जिज्ञास्यत्वमध्यारोपितं प्रथमसूत्रे वेदान्तमीमांसाशास्त्रारम्भोपपादनार्थम् । तथा हि तत्रोपसंहारभाष्यम् 'तस्मात्, ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्य-

मीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते '(जि.१०-खं४०) इति। एवमेव निरस्तनिखिलविशेषे ब्रह्मणि कार्यकारणविभागस्य सर्वथाप्यसंभवेऽपि जगज्जन्मादिकारणत्वमध्यारोपितम्, जिज्ञास्य-ब्रह्मलक्षणसमर्पणेन साङ्ख्याद्यभिमतकारणनिराकरणार्थं द्वितीयसूत्रे। वेदान्तोदितजगज्जन्मादिकारणस्वरूपनिर्धारणेन हि ब्रह्मात्मावगम इति। तथा चोक्तं तत्र भाष्ये 'वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्माव-गतिः, नानुमानादिप्रमाणान्तरनिर्वृत्ता' (जन्म.खं.२१, पा.३७) इति॥

२. वर्तिष्यमाणग्रन्थार्थः – अथेदानीं यदर्थविचारणा-ध्यवसाननिर्वर्त्या ब्रह्मावगतिः, तेषु वेदान्तेषु किंलक्षणं ब्रह्म निर्वर्णितम्, कथं वा तेषां ब्रह्मणि प्रामाण्यम्? – इत्येतन्निरूपयितव्यम्। तत्र प्रामाण्यचिन्ता परस्तात् भविष्यति। ब्रह्मलक्षणमधिकृत्यैव तु ताव-देतच्चिन्त्यते। जिज्ञास्यब्रह्मास्तित्वप्रसिद्धिं सम्भावयन् भाष्यकारोऽ-वोचत् प्रथमसूत्रार्थव्याख्यानावसरे 'अस्ति तावद् ब्रह्म नित्यशुद्ध-बुद्धमुक्तस्वभावम्, सर्वज्ञम्, सर्वशक्तिसमन्वितम्। ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते, बृंहतेर्धातोरर्थानु-गमात्' (जि. पा. ७२) इति। द्वितीयसूत्रभाष्येऽपि विशेषण-चतुष्टयविशिष्टस्य जगतो जन्मस्थितिभङ्गं यतः 'सर्वज्ञात् सर्वशक्तेः कारणाद् भवति तद् ब्रह्म' इति सर्वज्ञत्वं सर्वशक्तित्वं च ब्रह्मविशेषणत्वेन पुनरुपात्तवान्। तत्र सर्वज्ञत्वमेव तावत् कथमवगम्यत इति? अत्रोच्यते। यद्यपि जिज्ञासासूत्रे जन्मादिसूत्रे वा सर्वज्ञत्व-सूचकान्यक्षराणि नोपलभ्यन्ते, तथापि ब्रह्मशब्दव्युत्पत्तिबलादेव प्रथम-

सूत्रे सर्वज्ञत्वादि लभ्यत इति प्रत्यज्ञास्त भाष्यकारः । द्वितीयसूत्रे तु 'न यथोक्तविशेषणम् ईश्वरं मुक्त्वा, अन्यतः प्रधानादचेतनात्, अणुभ्यः, अभावात्, संसारिणो वा उत्पत्त्यादि संभावयितुं शक्यम्'(जन्म. १३, पा. २३) इति जन्मादिकारणत्वान्यथानुपपत्त्यैव सर्वज्ञत्वम् असात्सीत् । श्रुतिषु च जगत्कारणवादिनीषु कण्ठरवेणैव सर्वज्ञशब्द उपादीयते 'यः सर्वज्ञः सर्ववित्' (मुं. २-२-७) इत्याद्यासु । तदेतत् सर्वमभिसन्धायाऽऽह भाष्यकृत् 'जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्' इति । 'तत्तु सम्भावनामात्रमित्युक्तमस्माभिः' इति शेषः । इह पुनरधिकरणे किमधिकं क्रियते ? – तत्राऽऽह **'तदेव द्रढयन्नाह'** इति । अत्र तु शास्त्रकारणत्वात् सर्वज्ञं ब्रह्म – इति कण्ठरवेणैव हेतुरुच्यते ; तथा च यत्तत्रार्थाल्लब्धम्, तदिह हेतूपस्थापनेन दृढीकृतं भवति – इत्यभिप्रायः ॥

## २. सूत्रार्थः

( भाष्यम् )

**'शास्त्रयोनित्वात्' इति । महतः ऋग्वेदादेः शास्त्रस्य, अनेकविद्यास्थानोपबृंहितस्य, प्रदीपवत् सर्वार्थावद्योतिनः, सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म ॥**

३. **शास्त्रस्य महत्त्वम्** – तत्र कारणे सर्वज्ञत्वं तावदुपपादयितुं कार्ये शास्त्रे सर्वज्ञगुणान्वयं प्रदर्शयति–**'महतः ऋग्वेदादेः शास्त्रस्य'** – इत्यादिना । तत्र कथं महत्त्वं शास्त्रस्य ? तत्राह – **'अनेक-**

विद्यास्थानोपबृंहितस्य ' इत्यादि । चतुर्दश वा अष्टादश वा विद्यास्थानानि – इत्यभियुक्ताः । यथोक्तं भट्टपादैः – ' परिमितान्येव हि चतुर्दशाष्टादश वा विद्यास्थानानि धर्मप्रमाणेन शिष्टैः परिगृहीतानि – वेदोपवेदाङ्गोपाङ्गाष्टादशधर्मसंहितापुराणशास्त्रशिक्षादण्डनीतिसंज्ञकानि ' (तं.वा.पा.२०१) इति[1]। तैरेभिः सर्वैरपि प्रातिस्विकवेद्यैकदेशप्रकाशकैः उपबृंहितत्वात् महत्त्वम् इति भावः । अस्तु नामानेकाङ्गोपाङ्गैरुपबृंहितत्वम् ; किं तावतैव महत्त्वम् ? नेत्याह–'प्रदीपवत् सर्वार्थावद्योतिनः' इति । यथा दीपः स्वयंज्योतिः, स्वरूपेणावस्थित एवाव्याप्रियमाणोऽपि स्वप्रकाशक्षेत्रे स्थितान् सर्वान् पदार्थान् अवद्योतयति, एवमिदमपि शास्त्रं शब्दार्थसंबन्धनित्यत्वात् स्वविषयान् सर्वान् धर्माधर्मादीन्, भूतभव्यभवद्वस्तूनि च सर्वाणि – इति प्रदीपेन साम्यमस्य । एके तु व्याचक्षते-पुराणन्यायमीमांसादयो दशविद्यास्थानानि; तैः तया तया द्वारा उपकृतत्वकथनं समस्तशिष्टजनोपप्रदर्शनेनाप्रामाण्यशङ्कानिवारणार्थम् । ' प्रदीपवत् सर्वार्थावद्योतिनः ' इति तु, अनवबोधकत्वान्यथाबोधकत्वयोर्वारणार्थम् – इति । भवेदेवमपि यदि शास्त्रस्य प्रामाण्यमिह प्रतिपिपादयिषितं स्यात्, न त्वेतदस्ति । निरूपयिष्यते च शास्त्रस्य प्रामाण्यम् उत्तरस्मिन् अधिकरणे । अतो नावसरोऽयं तत्परीक्षणस्य । अतो यथाव्याख्यात एव प्रकृतग्रन्थाभिप्रायः – इत्यस्मन्मतिः ॥

---

1. अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः ।
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव ताः ॥ वि.पु. ३-६-२८, २९.

४. **शास्त्रस्य सर्वज्ञकल्पत्वम्** – अस्तु शास्त्रस्य महत्त्वं सर्वविद्यास्थानोपबृंहितत्वात्, सर्वार्थावद्योतकत्वाच्च। ततः किं फलति ? तत्राह – **'सर्वज्ञकल्पस्य'** इति। न हि वेदेनाप्रकाशितोऽर्थोऽवशिष्यते। येन ज्ञेयैकदेशप्रकाशत्वमेव स्यात् तस्यापि प्रत्येकं विद्यास्थानानामिव – इत्यभिप्रायः। सर्वज्ञेनेषदसमाप्तमिति सर्वज्ञकल्पं शास्त्रम्। ईषदसमाप्तिवचनं तु ईदृशस्यापि शास्त्रस्य कारणभूतस्य ब्रह्मणो निरतिशयसर्वज्ञत्वसंभावनार्थमित्यनुपदमेव स्फुटीभविष्यति। अत्र तु प्रश्नबीजम् उपन्यस्यति – **'तस्य योनिः कारणं ब्रह्म'** इति

## ब्रह्मणो निरतिशयसर्वज्ञत्वे युक्तिः

( भाष्यम् )

**न हि ईदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोऽस्ति। यद्यद्विस्तरार्थं शास्त्रं यस्मात् पुरुषविशेषात् संभवति–यथा व्याकरणादि पाणिन्यादेः – ज्ञेयैकदेशार्थमपि, स ततोऽप्यधिकतरविज्ञान इति प्रसिद्धं लोके, किमु वक्तव्यम्, अनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्यवर्णाश्रमादिप्रविभागहेतोः, ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्य, अप्रयत्नेनैव लीलान्यायेन पुरुषनिःश्वासवद् यस्मान्महतो भूताद् योनेः संभवः 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' (बृ. २–४–१०) इत्यादिश्रुतेः, तस्य महतो भूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेति ?**

५. **ब्रह्मणो निरतिशयसर्वज्ञत्वम्** – अस्त्वेवं वेदस्य सर्वज्ञकल्पत्वम्, एतेन ब्रह्मणः किमायातम् ? तत्राह – '**न हीदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोऽस्ति**' – इति । कार्यं हि कारणगुणान्वितं दृष्टं लोके ; यथा तैलं स्नेहगुणान्वितं स्नेहगुणेभ्यस्तिलादिभ्यः संभवति, न तु सिकतादिभ्यः स्नेहगुणवर्जितेभ्यः । सर्वज्ञगुणान्वितं च शास्त्रम् इत्यतस्तस्य सर्वज्ञादीश्वरात् संभवो नान्यत इति संभाव्यत इत्यर्थः । अपि च न केवलम् उपादानकारणं ब्रह्म वेदानाम्, किं तर्हि निमित्तकारणमपीत्यतोऽपि सर्वज्ञं भवितुमर्हति ; एवं लोके दृष्टत्वात् इत्यभिप्रेत्य तत्र निदर्शनं तावदाह – '**यद्यद्विस्तरार्थं शास्त्रम्**' इत्यादिना । व्याकरणशास्त्रं साधुशब्दानुशासनार्थं पाणिनेः संभूतम्, छन्दःशास्त्रं पिङ्गलाचार्येण – इत्येवं सर्वं शास्त्रं स्वस्वविषयभूतज्ञेयैकदेशप्रतिपादनार्थं प्रवृत्तमपि न तदप्येकदेशं कार्त्स्न्येन प्रतिपादयतीति, तन्न्यूनतापरिहाराय तदर्थप्रतिपादकवार्तिकभाष्यादिग्रन्थजातप्रादुर्भावादेवावगम्यते । तदेवं ज्ञेयैकदेशमात्रप्रतिपादकशास्त्रसंभूतिकारणभूतः पुरुषविशेषः पाणिन्यादिः स्वकृतव्याकरणादिविषयक्षेत्रमात्रपरिसीमितज्ञान इति तु न कोऽपि मन्यते, प्रत्युताष्टाध्याय्यादिपरिदीपकज्ञानादपि अधिकतरविज्ञान एवेति तु सर्वेऽपि वयमध्यवस्यामः – इत्यर्थः ॥

अथैतस्माँल्लोकसिद्धाद् दृष्टान्तात् किं सिध्यति ? तत्राह – '**किमु वक्तव्यम्**' – इत्यादि । यदा चैवम् एकदेशविषयस्यापि शास्त्रस्य कारणभूतपुरुषविशेषः, ततोऽपि शास्त्रादधिकतरविज्ञान

इति निश्चितम्, तदा किमु वक्तव्यं सर्वविषयप्रकाशकवेदकारणभूते सर्वजगत्कारणे ब्रह्मणि निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्त्वं चास्तीत्यत्र? पाणिन्यादेः खलु केवलं शब्दादिविषये स्वोपज्ञव्याकरणादिसकाशादधिकतरं विज्ञानम्, यस्य विषयस्यैकदेशमात्रं तत्राष्टाध्याय्यादौ विस्तृतम्, न कृत्स्नमपि तत्तच्छास्त्रकर्तृविज्ञानं तत्तच्छास्त्रेऽभिव्यक्तम्। तत्रैवं महता प्रयत्नेन विरचितमपि शास्त्रं नालमभूत् स्वप्रणेतृविज्ञानेयत्ताप्रकटनाय; न च तत्र तत्र शास्त्रे प्रकटितं कर्तुर्विज्ञानम् ईषदपि तत्तत्कर्तुर्मनसि शक्तिरूपेण प्रागनवस्थितं प्रादुर्भूतम्। प्रकृतं तु ऋग्वेदादिलक्षणं शास्त्रं **'सर्वज्ञानाकरम्'**; न हि तत्र बीजरूपेणासूचितं किमपि शास्त्रान्तरमस्ति। अतस्तत्कारणभूतेन ब्रह्मणा सर्वज्ञानाश्रयत्वेन भाव्यमिति व्यक्तम्, पाणिन्यादिदृष्टान्तादेव। अयं त्वत्र विशेषो, यदृग्वेदाद्यनेकशाखाभेदभिन्नं देवतिर्यङ्मनुष्यादिविभागहेतुः, सर्वज्ञानाकरं च सदपि शास्त्रम् अप्रयत्नेनैव लीलान्यायेन पुरुषनिःश्वासवन्महतो भूतस्य ब्रह्मणो योनेः सकाशात् समभूत् इति। न हि पुरुषो निःश्वासक्रियायां कमपि प्रयत्नविशेषमातनुते जातुचित्, 'इदं निःश्वसितं मम यत्नेन विनिश्चरति' इति वा जातुचित् सञ्जानीते। अत्र दृष्टान्तान्तरमप्यादत्ते श्रुतिः 'स यथाऽऽर्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः ....' (बृ. ४–५–११) इति। आर्द्रैधोभिरिद्धोऽग्निः, आर्द्रैधोऽग्निः, तस्मादभ्याहितादग्नेः नानाप्रकारा धूमविस्फुलिङ्गादयः पृथक् पृथक् यथा विनिर्गच्छन्ति स्वयमेव, न तु तत्राग्नेः कश्चित् तेषां

निर्गमने व्यापारविशेषः समुपलभ्यते ; एवमेव ब्रह्मणः स्वरूपेणावस्थितादेव शास्त्रं ऋग्वेदादिव्याख्यानान्तं विविधं विभक्तं विनिर्गच्छति, तत्प्रकाश्यमर्थजातं च इष्टहुतादिसर्वभूतान्तं च – इत्यर्थः । अतस्तस्य महतो भूतस्य सर्वज्ञकल्पशास्त्रकारणत्वात्, शास्त्रप्रकाश्यसर्वार्थकारणत्वाच्च निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्त्वं च सिद्धमेवेति न पृथग्वक्तव्यमित्यभिप्रायः ॥

६. **ब्रह्मणः सर्वशक्तिमत्त्वम्** – यद्यप्युपक्रमे 'जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्' इत्युक्तम्, शास्त्रयोनित्वान्निरतिशयसर्वज्ञत्वमेव प्राधान्येन सिध्यतीत्यभिप्रेत्य, तथापि शब्दनिःश्वासेनैव लोकार्थनिःश्वासोऽपि सामर्थ्यादुक्तो भवतीति । अथवा उपनिषच्चतुर्थाध्यायस्य पञ्चमे ब्राह्मणे अर्थनिःश्वासोऽप्युल्लिख्योक्त एवेति कृत्वा इह सर्वशक्तिमत्त्वमपि पृथगुच्यते । जगत्कारणत्वप्रदर्शनेन हि सर्वशक्तित्वमप्युपक्षिप्तमेव । 'सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्' इति तु प्रदर्शनार्थमित्यास्तां तावत् ॥

७. **ब्रह्मणः सर्वज्ञत्वं किंरूपम्?** – अलं प्रसक्तानुप्रसक्तचिन्तया । भाष्येऽत्रोपात्तां सर्वज्ञत्वचिन्तामेवानुवर्तयामः । अत्र सिषाधयिषितं सार्वज्ञ्यं कीदृशमिति तावद् विवेचनीयम् । अधिगतं तावत् सकलार्थावद्योतिशास्त्रापेक्षया अधिकतरविज्ञानवद्ब्रह्म, तत्कारणत्वादिति । तच्च विज्ञानं न ब्रह्मणो धर्मो भवितुमर्हति । पुरुषविशेषस्य पाणिन्यादेर्व्याकरणादिज्ञेयैकदेशविषयशास्त्रप्रणेतुरिव, न हि तत् पुरुषस्येव मनोवृत्त्युत्पत्तिमपेक्षते विषयज्ञानार्थम् ;

मनोरहितत्वाद्ब्रह्मणः, 'अप्राणो ह्यमनाः शुभ्रः' (मुं. २–१–२) इति श्रुतेः। सर्वभावानां च तेनाविभक्तदेशकालत्वात्, जगदन्तःपातिकालाकाशादीनामपि तत्कार्यत्वात्, स्वरूपतो निरतिशयसूक्ष्मत्वाच्च न तस्यान्यदविज्ञेयं सूक्ष्मं व्यवहितं विप्रकृष्टं भूतं भवद् भविष्यद्वा अस्तीति न कारणान्तरसापेक्षं तस्य ज्ञानं भवितुमर्हति। न च शास्त्रजन्यं विज्ञानं ब्रह्मणोऽन्यत्, येन विज्ञानान्तरलक्षणवस्तुपरिच्छिन्नत्वं तस्य शङ्क्येत। शास्त्रस्यापि हि योनिर्ब्रह्म। ब्रह्मणः सकाशाल्लब्धात्मनो हि शास्त्रस्य सर्वज्ञानाकरत्वव्यपदेशो व्यावहारिकः – इत्यन्यदेतत्। स्फुटीकरिष्यते चेदं सर्वज्ञत्वस्वरूपमग्रे भाष्यकारेणैव साङ्ख्यचोद्यपरिहारप्रसङ्गेन 'यस्य हि सर्वविषयावभासनक्षमं ज्ञानं नित्यमस्ति सोऽसर्वज्ञ इति विप्रतिषिद्धम्' (सू. भा. १–१–५, पा. २७) इति। तस्मात्, सर्वज्ञत्वं नाम न कारणान्तरसापेक्षो ब्रह्मणो धर्मः, किं तु स्वरूपभूतमेव सवितुरिव प्रकाशः – इति ज्ञेयम्। अत एव हि श्रुतिः 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २–१), 'विज्ञानमानन्दं ब्रह्म' (बृ. ३–९–२८) इति च॥

**८. एकदेशीयव्याख्यानम्, तद्विमर्शश्च** – अत्र व्याख्यानप्रस्थानीया भाष्यग्रन्थभागमिमम् अन्यथान्यथा व्याचक्रुः। कथम्? 'सर्वज्ञकल्पस्य सर्वज्ञसदृशस्य' – इत्यर्थः। सर्वज्ञस्य हि ज्ञानं सर्वविषयम्, शास्त्रस्याप्यभिधानं सर्वविषयम् इति सादृश्यम्– इत्येके। कल्पप्प्रत्ययो वेदस्याचेतनत्वात् – इत्यपरे। सर्वकारणत्वं ब्रह्मलक्षणं सूत्रयता प्रधानादौ अतिव्याप्तिनिरासाय तद्बललब्धसर्वज्ञत्व-

मर्थादुक्तम्, तदेवात्र साध्यते – इत्यपि त एव । तत्र ' जगत्कारणत्व-प्रदर्शनेन' इत्यत्र न केवलं जगत्कर्तृत्वं विवक्ष्यते भाष्यकारेणेति स्पष्टम् । जन्मादिसूत्रे हि न केवलं जगज्जनयितृत्वं प्रदर्शितम्, येन 'यो यत्कर्ता स तज्ज्ञः, यथा कुलालः' इति युक्त्या लब्धं सर्वज्ञत्वं वेदकर्तृत्वहेतुनात्र द्रढयति – इत्युच्येतापि । जगज्जन्मस्थितिभङ्गकारणत्वं तु सूत्रितं तत्र । तस्मात् नामरूपाभ्यां व्याकृतस्य कृत्स्नस्यैव जगतो जन्मादेः कारणत्वात् सर्वज्ञं ब्रह्मेत्युपक्षिप्तम् इत्येव भाष्यकृदभिप्रायः–इत्यभ्युपगन्तव्यम् । तत्र यद्यपि जन्मादिसूत्रे 'अस्य' इति नामरूपाभ्यां व्याकृतस्य कृत्स्नस्यैव जगतः परामर्शेन नामप्रपञ्चान्तर्भूतशास्त्रकारणत्वमप्युक्तमेव, तथापि सर्वार्थावद्योतनस्वभावस्यापि शास्त्रस्य कारणत्वेन निरतिशयसर्वज्ञत्ववद् ब्रह्मेत्येतदप्युल्लिख्य निर्दिदिक्षयात्र शास्त्रयोनित्वं हिरुक् सूत्र्यत इति विशेषः । यः पुनर्वेदस्य नित्यत्वाद् ब्रह्मणः सर्वहेतुता नास्तीत्याक्षेपसङ्गत्या वेदहेतुत्वमुच्यत इत्यभ्यूहः, स तु वेदनित्यत्वाधिकारे एव वक्तव्य इति नात्र प्रकृतः – इत्यस्मन्मतिः ॥

किं च ' यद्यद्विस्तरार्थं शास्त्रं यस्मात् पुरुषविशेषात् संभवति यथा व्याकरणादि पाणिन्यादेः ज्ञेयैकदेशार्थमपि स ततोऽप्यधिकतर-विज्ञान इति प्रसिद्धं लोके ' इति भाष्यग्रन्थस्य शास्त्रकर्तरि शास्त्रा-पेक्षया अधिकतरविज्ञानाश्रयत्वं प्रसिद्धम् – इति ऋजुव्याख्याने सर्वसंप्रतिपन्नेऽवस्थितेऽपि यद् व्याख्यानं केषाञ्चित्–'वक्तॄणां वाक्याद् ज्ञानम् अधिकविषयम्, न हि ते ते असाधारणधर्माः अनुभूयमाना अपि शक्या वक्तुम् । न खल्विक्षुक्षीरगुडादीनां मधुररसभेदाः शक्याः

सरस्वत्याप्याख्यातुम्' इति। तदपि न धन्यं मन्यामहे। न खलु यत्र वाचः कुण्ठीभवन्ति, तत्रापि ज्ञानं प्रभवतीत्युपपिपादयिषयेदं भाष्यवाक्यं प्रवृत्तम्, किं तर्हि यद्यत् शास्त्रकृता विज्ञातं तत्सर्वमपि तत्प्रणीते शास्त्रे प्रकाशितमेव भवतीति नायमेकान्तः, यतः शास्त्रप्रणेतुर्विज्ञानं शास्त्रेणाविर्भावितादप्यधिकतरं भवतीति लोके प्रसिद्धम् – इत्येतावांस्तु भाष्याशय इत्यविवादम्। इक्षुक्षीरादिमाधुर्यविज्ञाननिदर्शनसाम्यमाग्रहेणातस्थुषां तु वेदकर्त्रापि स्वेनानुभूयमानाः सर्वेऽपि विषया न शक्या वेदद्वारा अन्यथा वा वक्तुम् – इत्यनिष्टाभिधानप्रसक्तिर्दुर्वारा स्यादित्यलमतिसूक्ष्मेक्षिकया॥

एवम् 'ऋग्वेदाद्याख्यस्य सर्वज्ञानाकरस्य अप्रयत्नेनैव लीलान्यायेन पुरुषनिःश्वासवद् यस्मान्महतो भूताद् योनेः सम्भवः' इति भाष्यस्य यद्व्याख्यानम्–"अप्रयत्नेनैवेति अल्पप्रयत्नेन ; यथा 'अलवणा यवागूः' इति। देवर्षयो हि महापरिश्रमेणापि यत्राशक्ताः, तदयम् ईषत्प्रयत्नेन लीलयैव करोतीति निरतिशयम् अस्य सर्वज्ञत्वं सर्वशक्तित्वं चोक्तं भवति। अप्रयत्नेनास्य वेदकर्तृत्वे श्रुतिरुक्ता 'अस्य महतो भूतस्य' इति" इति, तदपि न समञ्जसं मन्महे वयम्। कुतः? न हि परमात्मन ईषदपि प्रयत्नोऽस्ति कृत्स्नस्यापि जगत अभिव्यञ्जने, प्रागेव जगदन्तर्भावितवेदस्य। तथा हि वक्ष्यति भाष्यकार एवोदर्के – 'यद्यप्यस्माकमियं जगद्बिम्बविरचना गुरुतरसंरम्भेवाऽऽभाति, तथापि परमेश्वरस्य लीलैव केवलेयम्, अपरिमितशक्तित्वात्' (२–१–३३, पा. २१७) इति। तुल्यन्यायेन यद्यपि पाणिन्यादिमुनीनां प्रयत्न-

साम्यमेव व्याकरणादिशास्त्रप्रणयनम्, तथापि सर्वकारणत्वात् सर्वार्थप्रकाशनसमर्थज्ञानस्वरूपस्य सर्वज्ञानाकरस्यापि वेदस्य प्रादुर्भावनं भगवतो लीलैव केवला इति सेत्स्यति । अतो नात्रास्तीषदपि प्रयत्नस्यापेक्षा इति मन्तव्यम् । एतेन 'पूर्वक्रमज्ञानमात्रेणाध्येतृवत्, विचित्रगुणमायासहायः, अनावृतानन्तस्वप्रकाशचिन्मात्रः परमेश्वरः स्वकृतपूर्वकल्पीयक्रमसजातीयक्रमवन्तं वेदराशिं तदर्थांश्च युगपज्ज्ञानन्नेव करोतीति सर्वज्ञः' इत्यपि व्याख्यानं प्रत्याख्यातम्; न हि पूर्वानुपूर्वीज्ञानपूर्वकं वेदाविर्भावनमिह शास्त्रयोनित्वं विवक्षितम् इत्यत्र गमकं सूत्रे भाष्ये वा पश्यामः । प्रत्युत पुरुषनिःश्वासधूमविनिश्चरणदृष्टान्तानुरोधात्तु ज्ञानपूर्वककर्तृत्वं विनैवेति विवक्षितमित्येव युज्यतेऽध्यवसातुम् । उच्छ्वासप्रश्वासादयो हि स्वभावादेव केवलं सम्भवन्ति, न ज्ञानपूर्वकमिति । 'वेदः, स्वार्थादधिकार्थज्ञानवत्पुरुषकारणकः, वाक्यत्वात्, पाणिन्यादिवाक्यवत्' – इति स्वतन्त्रानुमानोपन्यासस्तु, सर्वथा न सर्वज्ञत्वसाधकं भवेत्, जगज्जन्मादिकारणत्वस्यानुमानसाध्यत्वकल्पनायाः पूर्वाधिकरणे एव भाष्यकृता निराकृतत्वात्; जगदेकदेशभूतवेदस्य पुरुषकर्तृकत्वानुमानस्य तत एव निराकृतत्वेनानुमानस्येह पुनरुत्थानायोगात् इत्यलमतिविस्तरेण ॥

९. **उपसंहारः** – तस्मात्, वेदस्य सर्वज्ञकल्पत्वम् इतरग्रन्थापेक्षया महत्तरत्वेन स्वक्षेत्रगतसर्वार्थमात्रावद्योतकत्वम् । ब्रह्मणश्च निरतिशयं सर्वज्ञत्वं तादृशशास्त्रस्यापि सत्तास्फुरत्ताप्रदायकज्ञानस्वरूपत्वं सर्वस्यापि नामरूपात्मकस्य जगतो जन्मादिकारणत्वं च, न तु जगतो

विचित्ररचनां वेदाभिनेयसर्वार्थान् वा ज्ञात्वा तत्करणम् – इति स्थितम् ॥

एतेन सर्वशक्तिमत्त्वमपि व्याख्यातं वेदितव्यम्। यथैव हि जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्, तथैव सर्वशक्तिमदित्यपि। न हि सर्वशक्तिमत्त्वं विना सर्वकारणत्वमवकल्पते। ताश्च शक्तयः ब्रह्मणो ज्ञानवदेव न कारणभूतब्रह्मणो व्यतिरिक्ता भवितुमर्हन्ति; कारणाव्यतिरिक्तस्य तदन्यस्य वा तच्छक्तित्वकल्पने हेत्वभावात्। वक्ष्यति च भाष्यकारोऽन्यत्र 'तस्मात् कारणस्यात्मभूता शक्तिः, शक्तेश्च आत्मभूतं कार्यम्' (२–१–१८, पा. २०४) इति। तस्मात्, 'सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्' इति भाष्यं सर्वज्ञानाकरस्य शास्त्रस्य ब्रह्मकार्यत्वाद् ब्रह्मणः सर्वज्ञत्वम् प्राधान्येनोपपादनार्थम् उपक्रान्तम् इति विज्ञेयम्। अत एवेहोपसंहारे 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' इति श्रुतिं चतुर्थाध्यायपञ्चमब्राह्मणे स्थिताम् 'अयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैव निःश्वसितानि' इत्येतदन्ताम् अनुसन्धायाऽऽह भाष्यकृत् 'निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेति' इत्यनवद्यम् ॥

# अथ प्रथमवर्णके परिशिष्टम्

* * *

## १. अधिकरणभाष्यार्थसारः

१०. अधिकरणे विचारविषयः – अथाधिकरणस्य विषयाद्यङ्गानि विचार्यन्ते । तत्र 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' (बृ. २–४–१०, ४–५–११) इत्यादिवाक्यं **विषयः ।** इदं वाक्यं ब्रह्मणः सार्वज्ञ्यं साधयति वा न वा ? तत्रापि पूर्वाधिकरणे सूचितं सर्वज्ञत्वं साधयद् हेतुं समर्पयति वा न वा ? – इति संशयः ॥

यद्यपि पूर्वसूत्रे अत्र वा सर्वज्ञशब्दो नोपात्तः, यथोक्तवेदान्तवाक्यविचारश्चिकीर्षित इत्यत्रापि गमकं नोपलभ्यते, तथापि 'जन्माद्यस्य यतः, तद्ब्रह्म' इति यथाश्रुतादपि पूर्वसूत्रात् 'अस्ति किमपि जगत्कारणं ब्रह्मसंज्ञितम्, यज्जिज्ञासा तत्पूर्वतनसूत्रे कर्तव्यत्वेनोपन्यस्ता' – इत्येतावानर्थो लभ्यते । अत्र पुनः 'शास्त्रयोनित्वात्' इति –'शास्त्रस्यापि कारणं तद्ब्रह्म यतः' इति, हेतूपस्थापनेन किमपि वृत्तं सिषाधयिषितम् इति गम्यते । प्रकृतसूत्रस्य द्वितीयवर्णकोक्तं शास्त्रप्रमाणकत्वं मनसि कृत्वैव च जिज्ञासासूत्रं प्रवृत्तम् इति 'ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा .... प्रस्तूयते' (जि. १०–खं. ४०) इति भाष्ये

स्फुटीकृतम् । तथा 'जन्मादिसूत्रं नानुमानोपन्यासार्थम्, किं तर्हि, वेदान्तवाक्यप्रदर्शनार्थम्' (जन्म. ८–३०) इत्युपसंहृत्य, 'यतो वा इमानि भूतानि जायन्ते' इत्यादिवाक्यं लक्षणवाक्यत्वेनोदाहृत्य तस्य च 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इति लक्ष्यविशेषस्वरूपे पर्यवसानं दर्शयित्वा 'अन्यान्यप्येवञ्जातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाणि उदाहर्तव्यानि' (जन्म. ९–४०) इत्युपसंहरता भाष्यकारेण पूर्वाधिकरणेऽपि वेदान्तवाक्यमेव विचारविषयत्वेनाध्यवसितम् । तत्र च क्वचित् कारणवाक्ये सर्वज्ञत्वमपि स्पष्टमेवोल्लिखितम्, बहुत्र तु सर्वज्ञत्वमर्थाल्लभ्यत इत्यतो जन्मादिसूत्रे सर्वज्ञत्वं नोल्लिखितम् । अत एवाह भाष्यकारोऽत्रावतरणिकायाम् 'जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्' इति । तस्मात्, यथोदाहृतजातीयकमेव विषयवाक्यमित्यवगम्यते ॥

**११. संशयः, निर्णये प्रयोजनं च** – कुतः पुनरेतद्वाक्यार्थे संशयः इति । उच्यते – 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः' इति सर्वज्ञानाकरस्य शास्त्रस्य कारणं ब्रह्मेति वचनात् ब्रह्मापि सर्वज्ञं स्यादिति प्रतीयते, कार्यस्य सर्वज्ञगुणान्वितत्वात्, तत्कारणस्यापि सर्वज्ञत्वं स्यादिति हि संभाव्यते । वेदस्य केवलं ब्रह्मनिःश्वसितत्वोक्तेः, निःश्वसिते पुरुषज्ञानपूर्वकत्वस्यानैकान्त्याच्च नैतद् वाक्यं ब्रह्मणः सार्वज्ञ्यसाधकम् इत्यपि भाति । अतः संशयः ॥

किमतो भवति यदि ब्रह्म सर्वज्ञमिति निश्चीयते, यदि वा नेतीति ? अत्रोच्यते । यदि ब्रह्म सर्वज्ञमेव, ततो ब्रह्मैव चेतनरूपं

जगतः कारणमिति यत् प्रतिज्ञातम्, 'जन्माद्यस्य यतः' इति सूत्रेण, तद्दृढीकृतं भवति ; यदि तु न निश्चीयते ब्रह्मणः सर्वज्ञत्वम्, तदा प्रधानाद्यचेतनानामपि जगत्कारणत्वं प्रसक्तं न वार्यते, जगत्कारणबोधकानां वाक्यानां कथञ्चित्तत्परत्वेनापि शक्ययोजनत्वात् । अतोऽयं संशयो विचारपूर्वकं परिहर्तव्यः ॥

१२. **एकीयमतेन पूर्वपक्षः, सिद्धान्तश्च** – अत्रैके वर्णयन्ति-व्याकरणादिवद् वेदस्य पौरुषेयत्वे मूलप्रमाणसापेक्षत्वेन अप्रामाण्यापातात् यथोदाहृतं वाक्यं ब्रह्मणः सर्वज्ञत्वं न साधयतीति **पूर्वपक्षः** । यथा अध्येतारः पूर्वं क्रमं ज्ञात्वा वेदं कुर्वन्ति, तथा विचित्रगुणमायासहायोऽनावृतानन्तस्वप्रकाशचिन्मात्रः परमेश्वरः स्वकृतपूर्वकल्पीयक्रमसजातीयक्रमवन्तं वेदराशिं तदर्थांश्च युगपज्ज्ञानेनैव करोतीति न वेदस्य पौरुषेयता । एवंज्ञानत्वादेव च तस्य सर्वज्ञत्वम् । अतो यथोदाहृतं वाक्यं ब्रह्मणः सर्वज्ञत्वं साधयत्येवेति **सिद्धान्तः** – इति ॥

१३. **एकीयमतविमर्शः** – नायं पूर्वपक्षसिद्धान्तविवेकः साधुरित्यस्मदभिप्रायः । न हि सापेक्षत्वेन वेदस्य पौरुषेयत्वापत्तिरिति पूर्वपक्षो वा पूर्वकल्पीयसजातीयक्रमवद्वेदकरणेन न पौरुषेयत्वं वेदतदर्थयोर्युगपज्ज्ञानेन ब्रह्मणः सर्वज्ञत्वमिति सिद्धान्तवर्णनं वा अत्र सूत्राक्षरैः सूच्यते, भाष्याक्षरारूढं प्रकृताधिकरणसंगतं वा इति शक्यकल्पनं कथञ्चित् । निरस्तश्चायमेकीयवादो विवेचनीशरीरे एवेति न किञ्चिदत्र पृथग्वक्तव्यमवशिष्यते ॥

१४. भाष्यकारसम्मतः सिद्धान्तः — अथ कोऽसौ भाष्यकाराभिमतः सिद्धान्त इति ? अत्रोच्यते । निःश्वसितशब्देनात्र वेदकर्तृत्वप्रकारो न चिन्त्यते ; न च वेदपौरुषेयत्वापौरुषेयत्वविचारो वेदनित्यत्वानित्यत्वविचारो वात्र प्रकृतः । सर्वज्ञानाकरं वेदं प्रत्यपि ब्रह्मणोऽभिन्ननिमित्तोपादानकारणत्वमेव त्विह ब्रह्मणि प्रदिदर्शयिषितम् । वेदस्य सर्वज्ञानगुणान्वितत्वोपलब्धेस्तदुपादानकारणस्य ब्रह्मणोऽपि सर्वज्ञत्वम्, तन्निमित्तकारणत्वादेव चास्य वेदादप्यधिकतरविज्ञानवत्त्वं च संभाव्यत इत्येतावानेवात्र सिद्धान्तः ॥

वेदकर्तृत्वेनैव परमेश्वरस्य सर्वज्ञत्वे सिषाधयिषिते हि, कर्तृत्वाङ्गीकारादेव विकारित्वमनित्यत्वं चाऽऽगमेनाप्यङ्गीकर्तव्यं भवेत् । अपि च अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्ताश्रयत्वेनाङ्गीकृतस्यापि जगतः परमेश्वरः कुर्वत्कारणमित्यङ्गीकारे कार्यकारणयोर्न कश्चिद्विशेषः स्यादिति ब्रह्मणोऽपि जगत्कुक्षिनिक्षेपणमेव प्राप्तमिति बह्वसमञ्जसं कल्पितं स्यात् । किञ्चान्यत्, वेदस्य सर्वेष्वपि कल्पेषु समानाकारेण परमेश्वरेणाविनाभावे, ब्रह्मणो वस्तुवृत्तेनैव सद्वितीयत्वं प्रपञ्चितं भवेत्, तथा च निर्विशेषब्रह्मवादप्रतिज्ञा हीयेत । अपि च पाणिन्यादिदृष्टान्तावलम्बनेन तत्तच्छास्त्रप्रणेतुस्ततोऽप्यधिकतरविज्ञानवत्त्वमित्येतावत एवार्थस्य परमेश्वरेऽप्यतिदेशे तस्य सर्वज्ञानाश्रयत्वं नाम वेदापेक्षया अधिकतरविज्ञानाश्रयत्वमित्येव प्रसज्येत । तथा च यथैव शास्त्रप्रणेतॄणां परस्परापेक्षया ज्ञानातिशये तारतम्यम्, तथैव परमेश्वरेऽपि वेदकर्तरि लौकिकग्रन्थकर्तॄणामपेक्षया सर्वातिशायि-

ज्ञानाश्रयत्वमित्येतावदुपपादितं स्यात्, न त्वात्यन्तिकं सर्वज्ञत्वमिति साध्यविकलतापि स्याद् हेतोः । अतो नायं पन्थाः ॥

यथा तु भगवतः सर्वज्ञत्वं दर्शनान्तरेष्वभ्यूहितसर्वज्ञत्वात् सर्वथापि विलक्षणम्, तथा भाष्यकारेणैव स्फुटीकरिष्यते ईक्षत्यधिकरणे इत्यलमिहातिप्रपञ्चनेन ॥

## २. ईश्वरस्य सर्वज्ञत्वसंभवविषये आक्षेपपरिहारौ

१५. सर्वज्ञत्वविषये शङ्का – अत्राधिकरणार्थम् अवतारयन्नाह भाष्यकारः 'जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्, तदेव द्रढयन्नाह' इति । तत्रेदं निरूपणीयम्, ब्रह्मणि सर्वज्ञत्वमेव तावत् कथं सङ्गच्छते? यावता जीववत्तस्यान्तःकरणसंबन्धाभावेन ज्ञातृत्वस्यैवायोगः – इति ॥

१६. अत्र केषाञ्चिन्मतम्, तद्विमर्शश्च (१) – अत्रैके वदन्ति–सर्ववस्तुविषयकसकलप्राणिधीवासनोपरक्ताज्ञानोपाधिक ईश्वरः; अतस्तस्य सर्ववस्तुविषयवासनासाक्षितया सर्वज्ञत्वम् इति ॥

तत्र मानं न पश्यामः । प्रत्युत जन्मादिसूत्रभाष्ये ब्रह्मण एवेश्वरत्वेन निर्देशः प्रत्यक्षत उपलभ्यते । तथा अन्यत्रापि 'यथाभूतो ह्येकस्मिन् वेदान्ते सर्वज्ञः, सर्वेश्वरः, सर्वात्मा, एकोऽद्वितीयः कारणत्वेन व्यपदिष्टः, तथाभूत एव वेदान्तान्तरेष्वपि व्यपदिश्यते' (सू. भा. १–४–१४, पा. १६२) इत्यद्वितीयब्रह्मण एवेश्वरत्वेन निर्देशः । न च अविद्योपाधिकत्वमीश्वरत्वम् इति मतं भाष्यानुगुणम्; 'एवमविद्याकृत-

नामरूपोपाध्यनुरोधी ईश्वरो भवति व्योमेव घटकरकाद्युपाध्यनुरोधि, .... तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्य ईश्वरत्वम्, सर्वज्ञत्वं सर्वशक्तित्वं च ' (सू. २-१-१४, पा. २०१) इत्यारम्भणाधिकरणे सर्वज्ञत्वस्याविद्याकल्पितोपाधिव्यवहारापेक्षत्वाभिधानाच्च । अतो जीवधीवासनोपरक्ताज्ञानोपाधिकत्वमीश्वरस्येति मतं भाष्यबहिर्भूतम् । युक्तिविरुद्धं चेदं मतम् । कथम्? ' कूटस्थब्रह्मात्मवादिन एकत्वैकान्त्यात्, ईशित्रीशितव्याभावे ईश्वरकारणत्वप्रतिज्ञाविरोधः ' इत्याक्षेपपरिहारार्थं ब्रह्मण ईश्वरत्वं निर्वोढव्यं निर्विशेषब्रह्मवादिना; इह तु तमेवेश्वरेशितव्यविभागमुपजीव्य, ईश्वरत्वं जीवोपाधिभूतधीवासनोपरक्ताज्ञानोपाधिमत्त्वमित्युच्यत इति कथं नात्माश्रयदोषप्रास इति? किं च ' एष सर्वेश्वर एष सर्वज्ञः ' (मां. ६) इति प्राज्ञवर्णने प्रवृत्तायामुपनिषद्यपि निरस्तसर्वविशेषदर्शनायामेव सुषुप्तौ स्वरूपावस्थित एवाऽऽत्मा सर्वज्ञत्वेनोपवर्णितः । तत्र सर्वज्ञत्वमेवं व्याख्यातं भाष्ये ' अयमेव हि सर्वभेदावस्थो ज्ञाता इति सर्वज्ञः ' इति । तदपि भाष्यं विरुणद्धि धीवासनासाक्षितया सर्वज्ञत्वनिर्वाहको वादः । अपि च तत्रैव प्राज्ञत्वनिर्वचनप्रसङ्गेन भाष्ये समुद्घोषितम् ' भूतभविष्यज्ज्ञातृत्वं सर्वविषयज्ञातृत्वमस्यैवेति प्राज्ञः; सुषुप्तोऽपि हि भूतपूर्वगत्या प्राज्ञ उच्यते । अथवा प्रज्ञप्तिमात्रत्वमस्यैवासाधारणं रूपम् इति प्राज्ञः । इतरयोर्विशिष्टमपि विज्ञानमस्तीति । ' (मां. भा. ५, पा. १८१) इति । न च धीवासनासाक्षित्वं विवक्षितमिति युक्तं कल्पयितुम्; न हि तदा भूतपूर्वगत्या प्राज्ञत्ववाचोयुक्तिः, प्रज्ञप्तिमात्रलक्षणत्वकथनं वा

आञ्जसं स्यात् । तस्मात्, सर्वथा भाष्यबाह्यं युक्तिविरुद्धं चेदं सर्वप्राणिधीवासनोपरक्ताज्ञानोपाधित्वेन ब्रह्मणः सर्वज्ञत्वमित्यलमतिप्रपञ्चेन ॥

अन्ये तु ब्रुवते (२) – 'यथा जीवस्य स्वोपाध्यन्तःकरणपरिणामाश्चैतन्यप्रतिबिम्बग्राहिण इति तद्योगात् ज्ञातृत्वम्, एवं ब्रह्मणोऽपि स्वोपाधिमायापरिणामाश्चित्प्रतिबिम्बग्राहिणः सन्तीति तत्प्रतिबिम्बितैः स्फुरणैः कालत्रयवर्तिनः प्रपञ्चस्यापरोक्ष्येणाऽऽकलनात् सर्वज्ञत्वं ब्रह्मणः – इति । अत्र मायायाः परिणामलक्षणवृत्तिमत्त्वे, तत्र चित्प्रतिबिम्बग्रहणसामर्थ्ये वा किं मानम् अन्यत्राभिनिवेशादिति तु न ज्ञायते ॥

अपरं मतम् (३) – यथोक्तनीत्या ब्रह्मणो विद्यमाननिखिलप्रपञ्चसाक्षात्कारसम्भवात् तज्ज्ञस्य तत्संस्कारसत्तया च स्मरणोपपत्तेः, अतीतसकलवस्त्ववभाससिद्धेः, सृष्टेः प्राङ्मायायाः सृज्यमाननिखिलपदार्थस्फुरणरूपेण जीवादृष्टानुरोधेन विवर्तमानत्वात्, तत्साक्षितया तदुपाधिकस्य ब्रह्मणोऽपि तत्साधकत्वसिद्धेः, अनागतवस्तुविज्ञानोपपत्तिरिति सर्वज्ञत्वमुपपन्नमिति । इदमपि मतं मायावृत्तितत्प्रतिबिम्बितचैतन्याभ्युपगमेन लब्धजीवनमिति द्वितीयपक्षदूषणेनैव दूषितप्रायमिति नाधिकमत्र वक्तव्यमवशिष्यते ॥

एवमाद्याः सर्वाः प्रक्रियाः अविद्यावृत्तितत्संस्काराद्यभित्तिचित्रसमाश्रयाः परमात्मनः सर्वज्ञत्वं नाम सर्वज्ञानकर्तृत्वमिति मृषाभ्युपगममूलाः स्वेष्टसिद्ध्यर्थमुत्प्रेक्षिताः, न वस्तुस्थित्यवलम्बना इत्युपेक्ष्याः ।

न हि व्याकृतनामरूपलक्षणजगज्जन्मादिकारणत्वं श्रुत्युक्तं ब्रह्मणो जगज्जन्मादिकर्तृत्वं तावत्, ततः परं स्थितिकर्तृत्वम्, तत ऊर्ध्वं च कालान्तरे तद्ध्वंसकर्तृत्वम् इत्यभ्यूहितुं शक्यम् । जगदन्तःपातिक्रियाकारककलानां कालदेशादीनां च जगद्व्यतिरिक्तेऽपि ब्रह्मणि सम्भावयितुमशक्यत्वात् ॥

ये त्वभ्यूहन्ते 'तदैक्षत', 'सोऽकामयत', 'तदात्मानं स्वयमकुरुत' इत्यादिश्रुतिभ्यो न्यायमते इव कार्यानुकूलज्ञानचिकीर्षाकृतिमत्त्वस्वरूपमेव कर्तृत्वमीश्वरस्येति । ते न पश्यन्ति आत्मन ईदृशकर्तृत्वेऽङ्गीकृते तस्यापि कुम्भादिकर्तृकुलालादिवत् काले सत्त्वम्, तज्ज्ञानकरणचिकीर्षाकृतीनां च कालावच्छिन्नत्वं दुर्वारं स्यादिति, उत्पन्नस्य जगतो दर्शनान्तरे इव कार्यत्वाङ्गीकारे जगतोऽपि कालाधारकत्वं दुर्निवारणं स्यादिति च । तत एव कालावच्छिन्नस्य परमेश्वरस्य कालावच्छिन्नेन जगता सद्वितीयत्वं महदनिष्टं प्रसजेत् इत्यपि ते न पश्यन्तीत्यास्तां तावत् ॥

तस्मात्, जगज्जन्मादीनां शास्त्रप्रादुर्भावस्य च कालाश्रितघटनाविशेषरूपत्वं तद्विषयकज्ञानतत्कर्तृत्वयोरीश्वरे व्यावहारिकज्ञानादिसदृशत्वं वा न समाश्रयणीयं वेदान्तसंप्रदायानुसारिभिः । प्रागेव न जगद्रूपेण परिणामो ब्रह्मणः, 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्' (श्वे. ६–१९), 'स बाह्याभ्यन्तरो ह्यजः' (मुं. २–१–२) इत्यादिश्रुत्यनुपरोधात् इत्यन्यदेतत् ॥

**१७. सर्वज्ञत्वविषये सिद्धान्तः** – तस्मात्, सर्वज्ञत्वं प्राज्ञत्वं च ब्रह्मणः नान्तःकरणादिवृत्तिसापेक्षज्ञानकर्तृत्वात्, कथं तर्हि,

सर्वविषयप्रकाशनसमर्थकूटस्थनित्यज्ञानस्वरूपत्वादेवेत्यवगन्तव्यम् । तथा हि वक्ष्यति भाष्यकृत् स्वयमेव सुषुप्त्युत्क्रान्त्यधिकरणे 'प्राज्ञः, परमेश्वरः, सर्वज्ञत्वलक्षणया प्रज्ञया नित्यम् अवियोगात्' (१-३-४२, पा. १४३) इति । यद्यपि च ब्रह्म प्रत्यस्तमितसर्वविशेषात्मना स्वरूपेणाद्वितीयमेव, वाङ्मनसातीतं च-तथा च तस्मिन् सर्वज्ञत्वादिकं न घटत इव - तथाप्यविद्याकल्पिताव्याकृतनामरूपलक्षणोपाध्यपेक्षया 'ईश्वरः, सर्वज्ञः, सर्वशक्तिमांश्च' इति व्यपदेशभागपि भवति स्वरूपेण स्थितमेव सत्, सवितेव प्रकाश्यापेक्षया तप्यापेक्षया च 'प्रकाशकः', 'तापकः' इति चेति न विरोधः । स्फुटीकरिष्यते चेदमारम्भणाधिकरण-भाष्ये इति सर्वं शिवम् ॥

# सूत्रभाष्यार्थतत्त्वविवेचनी

( शास्त्रयोनित्वाधिकरणे द्वितीयं वर्णकम् )

* * *

## ३. सूत्रार्थः

( भाष्यम् )

**अथवा यथोक्तम् ऋग्वेदादिशास्त्रं योनिः कारणं प्रमाणम् अस्य ब्रह्मणो यथावत्स्वरूपाधिगमे । शास्त्रादेव प्रमाणात् , जगतो जन्मादिकारणं ब्रह्म अधिगम्यते इत्यभिप्रायः ॥**

१८. **द्वितीयवर्णकरीत्या अधिकरणसंबन्धः** – एवं तावत् पूर्वस्मिन् वर्णके ब्रह्मणः शास्त्रकारणत्वोपप्रदर्शनेन लक्षणसूत्रोपक्षिप्तं सर्वज्ञत्वादिकं दृढीकृतम् । अत्र पुनस्तस्यैव ब्रह्मणः शास्त्रप्रमाणैकगम्यत्वं कण्ठरवेणोपन्यस्य जन्मादिसूत्रोक्तकारणे प्रमाणान्तरविषयत्वाशङ्कां व्युदस्यतीति विशेषः ॥

१९. **एकीयमतेनाधिकरणसङ्गतिः, तद्दूषणं च** – अत्र **केचित्** लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति तन्त्रान्तराभ्युपगतं न्यायमनुरुन्धानाः जन्मादिसूत्रे लक्षणकथनेन सम्भावितास्तित्वस्य ब्रह्मण इह प्रमाणेनास्तित्वनिर्णयः क्रियत इत्याहुः । तदसत् , ब्रह्मात्मनः सर्वथाप्यविषयत्वात् । स्वयंसिद्धस्वरूपत्वाच्च तस्य साध्यत्वकथाया अनवसर-

दुःस्थत्वात् । शास्त्रैकप्रमाणकत्वं तूच्यते अस्मिन्नधिकरणे प्रमाणवेद्यत्व-निरसनायैवेति भाष्ये एवाग्रे स्फुटीकरिष्यत इत्यलमिहास्थाने तन्त्रान्तराभ्युपगमानयनप्रयासेन ॥

२०. **सूत्राक्षरयोजना** – अथ सूत्राक्षराणि व्याचष्टे, 'अथवा' इति वर्णकान्तरसूचनार्थम्, न तु अर्थविकल्पविवक्षया, पूर्वव्याख्याने अस्वरससूचनार्थं वा – इति ध्येयम् । वस्तुवृत्ते विकल्पासम्भवात् ॥

'**यथोक्तम् ऋग्वेदादिशास्त्रम्**' इति 'अनेकविद्यास्थानोप-बृंहितत्वम्, प्रदीपवत् सर्वार्थावद्योतित्वम्' इत्यादिपूर्वोक्तं विशेषणजातं सर्वमपीहानुसन्धेयम् । ईदृशं 'शास्त्रं योनिः कारणं प्रमाणम् अस्य ब्रह्मणो यथावत्स्वरूपाधिगमे' । 'प्रमाणम्' इति अवगतिपर्यन्तज्ञानजनने कारणम् इत्यर्थः । शास्त्रस्य तत्कारणत्वं कथम् इत्येतदेवाक्षिप्य समाधास्यतेऽनुपदमेवेति नेह प्रपञ्चनीयम् ॥

# ४. ब्रह्मणो जगज्जन्मादिकारणत्वे शास्त्रम्

( भाष्यम् )

**शास्त्रम् उदाहृतं पूर्वसूत्रे 'यतो वा इमानि भूतानि जायन्ते' (तै. ३–१) इत्यादि ॥**

२१. **जगत्कारणवादीनि शास्त्रवाक्यानि** – किं तत् प्रमाणभूतं शास्त्रं यद्बलात् ब्रह्मयाथात्म्यमधिगम्यत इति ? तत्राऽऽह –

'शास्त्रम् उदाहृतं पूर्वसूत्रे' इति । अत्र 'इत्यादि' इत्यादिशब्दात् न केवलमिदमेकमेव शास्त्रवाक्यं प्रमाणमत्र, किं तर्हि सन्ति वाक्यान्तराण्यप्येतादृशानि-इति हृदि स्थितं सूच्यते । तदेव हृदि स्थितमुद्घाटयितुमाक्षेपभाष्ये 'एवञ्जातीयकम्' इति विशेषणमुपात्तम् । उक्तमेव हि जन्मादिसूत्रभाष्योपसंहारेऽपि 'अन्यान्यप्येवञ्जातीयकानि वाक्यानि, नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाण्युदाहर्तव्यानि'(जन्म. पा. ६४) इति ॥

## ५. पृथक्सूत्रणावश्यकता

( भाष्यम् )

**किमर्थं तर्हीदं सूत्रम्, यावता पूर्वसूत्र एवैवञ्जातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितम्? उच्यते। तत्र पूर्वसूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानात् जन्मादि[1] केवलमनुमानम् उपन्यस्तम् इत्याशङ्क्येत ; तामाशङ्कां निवर्तयितुमिदं सूत्रं प्रववृते शास्त्रयोनित्वादिति ॥**

२२. **एकीयमतेन सूत्रसङ्गतिः, तद्विमर्शश्च** – सूत्रान्तरारम्भवैयर्थ्यं शङ्कते 'किमर्थं तर्हीदं सूत्रम्?' इति । तत्र परिहारः 'उच्यते' इति । भाष्यार्थो निगदव्याख्यातः ॥

अत्रैकेषां व्याख्यानम्–" 'शास्त्रं शास्त्रकर्तृत्वे सत्यसर्वज्ञत्वानधिकरणकर्तृकम्, कार्यत्वात्, घटवत्' इत्यनुमानात् वेदस्य

1. इह पाठान्तरविषये पुरस्ताद् दत्तं (पा. ३) टिप्पणमनुसन्धेयम् ॥

सर्वज्ञकर्तृकता—इत्युक्तम् । इदानीं जगद्धेतुत्वेन लक्षिते ब्रह्मणि मानविशेषचिन्तायै वर्णकान्तरमवतारयति 'अथवा' इति" इति । अधिकरणविषयसंशयादिकं च एवं वर्णयन्ति " 'तं त्वौपनिषदं पुरुषम्' इत्यादिवाक्यं ब्रह्मणः शास्त्रैकगम्यत्वं समर्थयेत्, न वा ? इति कार्यलिङ्गस्य हेतुविशेषावसानानवसानाभ्यां संशये 'विमतं सकर्तृकम्, कार्यत्वात्, घटवत्' इति सिद्धे कर्तरि तदेकत्वानेकत्वसन्देहे लाघवात् तदैक्यम् । स च ज्ञात्वैव सर्वं करोतीति सर्वज्ञः, सर्वशक्तिश्च – इत्यनुमानमेव विचार्यम् इति प्राप्ते प्रत्याह – 'यथोक्तमिति' । न तावदप्रत्यक्षं ब्रह्म वह्निवद्विशेषतोऽनुमेयम्, कार्यमात्रस्य कर्तृमात्रावगमकत्वात् । न च लाघवात् तदैक्यधीः, विचित्रप्रासादादेरनेककर्तृकस्यापि दर्शनेन अनिर्णयात् । तथा च कर्तुर्न सर्वज्ञत्वादि अनुमानलभ्यम् । शास्त्रे तु 'यतः' इत्येकवचनात् कर्त्रैक्यसिद्ध्या सर्वज्ञत्वादिसिद्धेः शास्त्रैकगम्यं ब्रह्म–इति भावः" इति ॥

वयं तु पश्यामः –' नेदं भाष्यार्थव्याख्यानम्, सूत्रार्थव्याख्यानं वा–इति । कस्मात् ? 'तं त्वौपनिषदं पुरुषं पृच्छामि' इति हि वाक्यं न तावत् सूत्रोपस्थापितम्, नापि भाष्यकृता समुदाहृतम् । सूत्रकारो हि ब्रह्म शास्त्रप्रमाणकम्–इत्येतावदाह । भाष्यकारस्तु 'शास्त्रमुदाहृतं पूर्वसूत्रे' इति सुस्पष्टमाह । अपि च ' पूर्वसूत्रे जगज्जन्मादिकारणत्वेन लक्षितं ब्रह्म कथमधिगम्यते ?' इति ब्रह्मणः प्रमाणमेव खल्विहाऽऽकाङ्क्षितं दर्शनीयम्, न त्वप्रकृतं यत्किञ्चित् । न च 'तं त्वौपनिषदम्' इति वाक्यं पूर्वसूत्रे सूचितम्, भाष्यकारेण परामृष्टं वा । ' अनुमानादेव लाघवानुगृहीताद् ब्रह्मस्वरूपधीसंभवात्, न तत्र शास्त्रमेव

मानम्' इत्याक्षेपोऽपि नात्र संगतः । न हि पूर्वसूत्रे शास्त्रैकगम्यं ब्रह्म इत्युक्तम् । येन तदाक्षिप्येह प्रतिसमाधीयेत । न च ' विमतं सकर्तृकम्, कार्यत्वात्, घटवत्' इत्यनुमानमत्र क्रमते । यत्कारणं ' प्रतिनियत-देशकालनिमित्तक्रियाफलाश्रयस्य' खलु जगतः कार्यत्वमिह साधनीयम् । न तु तत् शक्यसाधनम् । यथोक्तविशेषणस्य जगतः कालाधारकत्वा-भावेन तन्नियतपूर्वकालवर्तिकर्तुरुपादानकारणस्य वा केनापि तार्कि-केणाभ्यूहितुमप्यशक्यत्वात् । न च केवलं सकर्तृकत्वं जगतः प्रतिज्ञातं जन्मादिसूत्रे, येन ' विमतं सकर्तृकम्' इत्याद्यनुमानं लब्धावकाशं भवेदत्र । जगज्जन्मस्थितिभङ्गकारणत्वमेव हीश्वरस्य लिलक्षयिषितमत्र । तच्चाभिन्ननिमित्तोपादानकारणत्वम्, ' यत्प्रयन्त्यभिसंविशन्ति' (तै. ३-१), ' तत्र चैवापि यन्ति' (मुं. २-१-१) इत्यादिश्रुतिभ्यः । न च घटादिकर्ता इत्थंभूतं कारणमिति । स्फुटीकृतं चेदं भाष्यकृता ' न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वा अन्यतः प्रधानादचेतनात्, अणुभ्योऽभावात् संसारिणो वा उत्पत्त्यादि संभाव-यितुं शक्यम्' इत्युद्घोषयता । अपि च प्रमाणान्तरविषयत्वं ब्रह्मणः पूर्वमेव निरस्तं भाष्यकृता—" सति हीन्द्रियविषयत्वे ब्रह्मणः 'इदं ब्रह्मणा संबद्धं कार्यम्' इति गृह्येत ; कार्यमात्रमेव तु गृह्यमाणं किं ब्रह्मणा संबद्धम्, किमन्येन केनचिद् वा संबद्धम्? – इति न शक्यं निश्चेतुम् । तस्मात्, जन्मादिसूत्रं नानुमानोपन्यासार्थम्" इति । अतोऽपि नात्र एकीयोद्भावितपूर्वपक्षस्य सिद्धान्तस्य वा अवकाशोऽस्तीति मन्तव्यम् ॥

२३. **भाष्यसम्मता सूत्रसङ्गतिः** – कथं तर्हि सूत्रसङ्गतिरत्र स्वीकार्या ? स एष प्रश्नो भाष्यकृतैव कण्ठरवेणापाकृतः – " पूर्वसूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानात्, जन्मादिकेवलमनुमानमुपन्यस्तम् इत्याशङ्क्येत ; तामाशङ्कां निवर्तयितुं इदं सूत्रं प्रववृते, 'शास्त्रयोनित्वात्' इति" इति। एतदुक्तं भवति-जिज्ञासासूत्रे वा जन्मादिसूत्रे वा स्पष्टं शास्त्रम् अनुदाहृतं सूत्रकृता, यद्यपि तत्रापि वेदान्तवाक्यमीमांसैव तस्य हृदि स्थिता ; तथापि ब्रह्मजिज्ञासा कर्तव्या ; यस्मात् जगज्जन्मादि, तद् ब्रह्म – इत्येतावत्तु तत्राभिहितम् । कथं तर्हि तद्ब्रह्म जगत्कारणं समधिगमनीयम् ? न ह्यलौकिकः पदार्थः प्रत्यक्षादिगम्यः, न च जगतः कृत्स्नस्यापि कारणं सामान्यतोदृष्टेनानुमानेन शक्याधिगमम् – इत्याशङ्कायाम् इदमुच्यते कण्ठरवेण ' शास्त्रैकवेद्यं ब्रह्म ' – इति । तत्र किं तद् ब्रह्म चोदनालक्षणशास्त्रगम्यम्, आहोस्वित् वस्तुमात्रसमर्पकशास्त्रगम्यम् ? कथं वा प्रत्यक्षाद्यविषयत्वे ब्रह्मवस्तुनः शास्त्रप्रमाणकत्वम् ?– इत्यादिविशेषविचारस्तु इहैव प्रवर्तयितव्य इति प्रप्रथमं तावत् प्रतिज्ञामात्रेण ब्रह्मणः शास्त्रैकसमधिगम्यत्वमुच्यते । तस्मात्, इहानुमानादिप्रमाणसंभवशङ्का तन्निरासो वा नास्ति प्रकृत इति विज्ञेयम् ॥

२४. **शास्त्रयोनित्वसूत्रम् उत्तरार्थमपि** – अत एवेदं सूत्रं न तात्पर्येण ब्रह्मणः प्रमाणान्तरागोचरत्वकथनार्थं प्रवृत्तम् ; जगज्जन्मादिकारणत्वप्रतिज्ञानादेव तत्सिद्धेः । यथैव हि सर्वकर्तृभोक्तृसंयुक्तं प्रतिनियतदेशकालनिमित्तक्रियाकारकफलाश्रयं च सदिदं जगत्,

लोकप्रसिद्धकुलालादिस्थानीयं कर्तारं मृदादिस्थानीयमुपादानकारणं वा स्वव्यतिरिक्तं नापेक्षितुमर्हति ; एवमेवेदं सर्वप्रमातृसंयुक्तं प्रमाणप्रमेय-प्रमितिव्यवहाराश्रयं च सत् स्वकारणस्य ब्रह्मणः स्वान्तर्गतप्रमाणगोचरत्व-मापादयितुमपि नार्हति प्रभवति वेति युक्तम् । तस्मात्, सर्व-प्रमाणागोचरत्वमनूद्यैव ब्रह्मणः शास्त्रैकसमधिगम्यत्वं ज्ञापयितुमिदं सूत्रं प्रवृत्तमिति ज्ञेयम् । अन्यथा हि ब्रह्मणः सर्वप्रमाणानधिगम्यत्वे सति शशविषाणाद्यविशिष्टत्वमप्युत्प्रेक्ष्येत । तथा च वेदान्तवाक्यमीमांसा व्यर्थप्रयासैवेति स्यात् । किञ्चान्यत्, सर्वस्याप्याम्नायस्य क्रियैकार्थत्वं मन्यन्ते वीरमीमांसकाः । तदभिप्रायेण चोदनालक्षणो धर्म एवैको वेदार्थः, अथवा तच्छेषभूतो भूतार्थोऽपि कश्चिद् देवादिवद् विवक्षितोऽस्त्विति स्यात्, न त्वनन्यशेषभूतं ब्रह्मलक्षणं स्वतन्त्रं वस्तु—इत्यतः शारीरकमीमांसाया अनारम्भणीयत्वमेव प्रसज्येत । तद्वारणाय ब्रह्मवस्तुप्रतिपादनमपि वेदप्रमाणगम्यम् इति स्थापयितव्यम् । तदर्थमपि पृथक्सूत्रणमावश्यकम्, पूर्वसूत्राक्षरेण शास्त्रस्यानुपादाना-देवायमप्यर्थो विवक्षितस्तत्र इति स्फोरणाय । विवरिष्यते चेदमनुपद-मेव स्वयं भाष्यकारेण इति सर्वं शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवत्पादचरणस्मरण-परिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्येण सच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां सूत्रभाष्यार्थतत्त्वविवेचन्यां शास्त्रयोनित्वाधिकरणभाष्यार्थतत्त्वविवेकः समाप्तः

ओं तत्सत्

॥ ॐ ॥

श्रीशङ्करभगवत्पादविरचितं

# शारीरकमीमांसाभाष्यम्

तत्र

## ४. समन्वयाधिकरणम्

( प्रथमं वर्णकम् )

### ब्रह्मणः शास्त्रप्रमाणकत्वे आक्षेपः

१. कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते, यावता 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै. १-२-१) इति क्रियापरत्वं शास्त्रस्य प्रदर्शितम्?

### भाट्टमतेन वेदान्तानां विनियोगः

२. अतो वेदान्तानाम् आनर्थक्यम्, अक्रियार्थत्वात् (१), कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वम् (२), उपासनादि-क्रियान्तरविधानार्थत्वं वा (३)। न हि परिनिष्ठितवस्तुप्रतिपादनं संभवति, प्रत्यक्षादिविषयत्वात् परिनिष्ठितवस्तुनः। तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात्। अत एव 'सोऽरोदीत्' (तै.सं. १-५-१-१) इत्येव-

मादीनाम् आनर्थक्यं मा भूदिति 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः' (जै. १–२–७) इति स्तावकत्वेनार्थवत्त्वम् उक्तम् । मन्त्राणां च 'इषे त्वा'( तै.सं. १-१-१-१) इत्यादीनां क्रियातत्साधनाभिधायित्वेन कर्मसमवायित्वमुक्तम् । न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टा, उपपन्ना वा । न च परिनिष्ठिते वस्तुस्वरूपे विधिः संभवति, क्रियाविषयत्वाद् विधेः ॥

## भाट्टमतोपसंहारः

३. तस्मात्, कर्मापेक्षितकर्तृदेवतादिस्वरूपप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानाम् । अथ प्रकरणान्तरभयान्नैतदभ्युपगम्यते, तथापि स्ववाक्यगतोपासनादिकर्मपरत्वम् । तस्मात् न ब्रह्मणः शास्त्रयोनित्वम् । इति प्राप्ते उच्यते –

# तत्तु समन्वयात् ॥ ४ ॥

## सूत्रार्थः

४. तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । तद् ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेवावगम्यते । कथम् ? समन्वयात् । सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि । 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां. ६–२–१), 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ. १–१–१), 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः' (बृ. २–५–१९), 'ब्रह्मैवेदममृतं पुरस्तात्' (मुं. २–२–११)

इत्यादीनि । न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वये अवगम्यमाने अर्थान्तरकल्पना युक्ता, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् ॥

## भाट्टयुक्तिनिरासः

५. न च तेषां कर्तृस्वरूपप्रतिपादनपरता अवसीयते, 'तत्केन कं पश्येत्' (बृ. २–४–१४, ४–५–१५) इत्यादिक्रियाकारकफल-निराकरणश्रुतेः । न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः, 'तत्त्वमसि' (छां. ६–८–७) इति ब्रह्मात्मभावस्य शास्त्र-मन्तरेणानवगम्यमानत्वात् । यत्तु हेयोपादेयरहितत्वात् उपदेशानर्थक्य-मिति ; नैष दोषः, हेयोपादेयशून्यब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात् पुरुषार्थसिद्धेः । देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेऽपि, न कश्चिद् विरोधः । न तु तथा ब्रह्मण उपासनाविधिशेषत्वं संभवति, एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः । न हि एकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः संभवोऽस्ति, येनोपासनाविधिशेषत्वं ब्रह्मणः प्रतिपद्येत । यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टम्, तथापि, आत्मविज्ञानस्य फलपर्यन्तत्वान्न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम् । न चानुमानगम्यं शास्त्रप्रामाण्यम्, येनान्यत्र दृष्टं निदर्शनम् अपेक्षेत ॥

६. तस्मात् सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वम् ॥

इति समन्वयाधिकरणभाष्ये प्रथमं वर्णकम् ॥

॥ ॐ ॥

# सूत्रभाष्यार्थतत्त्वविवेचनी

अपदार्थमवाक्यार्थमवाङ्मनसगोचरम् ।
वेदान्तशास्त्रविज्ञेयमद्भुतं ब्रह्म संदधे ॥

## १. ब्रह्मणः शास्त्रप्रमाणकत्वे आक्षेपः

( भाष्यम् )

कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते । यावता आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम् ' ( जै. १–२–१) इति क्रियापरत्वं शास्त्रस्य प्रदर्शितम् ?

२५. सूत्रसङ्गतिः – ओं नमो बादरायणाय, नमः शङ्कराय ! एवं तावत्, अविद्याध्यारोपदृष्ट्या ब्रह्मणो जिज्ञास्यत्वम्, तज्ज्ञानस्य निःश्रेयसफलकत्वं च प्रथमसूत्रे सूचितम्, ब्रह्म च सर्वज्ञं सर्वशक्तियुक्तम् ईश्वरापराभिधानं जगज्जन्मादिकारणम् इति ब्रह्मलक्षण-मुक्तम्, अध्यारोपदृष्ट्यैव द्वितीयसूत्रे । सर्वज्ञकल्पवेदकारणत्वात्, तज्जगत्कारणं ब्रह्म सर्वज्ञम् – इति हेतूपस्थापनेन सर्वज्ञत्वोपबृंहणं कृतं तृतीयसूत्रप्रथमवर्णके, तयैवाध्यारोपदृष्ट्या । तच्च जगतो जन्मादि-कारणं ब्रह्म शास्त्रादेव प्रमाणादधिगम्यते इत्युक्तं प्रतिज्ञामात्रेण तत्रैव द्वितीयवर्णके । एतच्च ब्रह्मणो जिज्ञास्यत्वादिशास्त्रप्रमाणकत्वान्तं

भवेऽप्यध्यारोपदृष्ट्यैवोच्यते वेदान्तेष्विति न प्रस्मर्तव्यम् । अस्मिंस्तु सूत्रे शास्त्रस्य प्रमाणत्वमेव कथम् ? – इत्येतत् प्रदर्श्यते । तदेतत् सर्वं विशदयितुकामो भगवान् भाष्यकारः भाट्टमतं प्राभाकरानुयायि-वेदान्तिमतं च समाश्रित्य शास्त्रप्रमाणकत्वमेवाक्षिप्य तत्परिहारव्याजेन शास्त्रस्य ब्रह्मणि प्रामाण्यमुपपादयितुमारभते ॥

तत्र वेदान्तशास्त्रस्य क्रियार्थत्वाभावे प्रामाण्यमेव न घटेत, कुतो ब्रह्मणि प्रामाण्यप्रत्याशा ? – इति भाट्टाक्षेपं तावदुत्थापयति – **कथं पुनरिति ॥**

आक्षेपे हेतुमाचष्टे भाट्टः –" यावता 'आम्नायस्य क्रियार्थत्वा-दानर्थक्यमतदर्थानाम् ' इति क्रियापरत्वं शास्त्रस्य प्रदर्शितम् " इति । यद्यपीदं पूर्वपक्षसूत्रम्, तथाप्याम्नायस्य क्रियार्थत्वमङ्गीकृत्यैव सिद्धान्त-सूत्रं प्रवर्तिष्यत इति क्रियार्थत्वं जैमिनिसम्मतमेवेत्याशयेन ' क्रियापरत्वं शास्त्रस्य प्रदर्शितम्' इति पूर्वपक्ष्याशयो वर्णितः । वस्तुनो हि प्रमाणान्तर-विषयत्वेन तत्प्रतिपादनेऽनुवादकत्वेनाप्रामाण्यमेव स्यात् इत्याशयेनेह 'आनर्थक्यमतदर्थानाम्' इति सूत्रभागोऽप्युदाहृतः पूर्वपक्षिणा । अप्रयोजनवत्त्वं वा आनर्थक्यं विवक्षितम् । प्रवृत्तिनिवृत्तिलक्षणक्रिया-साध्यं हि प्रयोजनम् । न तु तद् वस्तुज्ञानमात्रनिष्पाद्यमिति भावः ॥

## २. भाट्टमतेन वेदान्तानां विनियोगः

( भाष्यम् )

अतः, वेदान्तानामानर्थक्यम् , अक्रियार्थत्वात् । कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वम्

**उपासनादिक्रियान्तरविधानार्थत्वं वा । न हि परिनिष्ठितवस्तुप्रतिपादनं सम्भवति, प्रत्यक्षादिविषयत्वात् परिनिष्ठितवस्तुनः । तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात् ॥**

२६. **वेदान्तानां प्रामाण्याय क्रियार्थत्वं क्रियाविधिशेषत्वं वा अभ्युपगन्तव्यम्** – इदानीम् एतमेव हृदि स्थितमाशयम् उद्घाटयति – '**अतः, वेदान्तानामानर्थक्यम्**' इति । यदि वस्तुपरत्वमेव वेदान्तानामभिनिविश्यते, तर्हि स्वासाधारणाभिधेयाभावात्, अप्रयोजनत्वाच्च तेषाम् अप्रामाण्यमेव प्रसज्येतेति भावः । ननु वेदान्तानां वेदान्तर्गतत्वं भवतोऽपि संप्रतिपन्नम्; तत्कथं वैयात्येन तेषामानर्थक्यं चोद्यते ? तत्राऽऽह – '**कर्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वम्**' इति । कर्ता, देवता, आदिशब्दसंग्राह्यफलं च इत्येतेषां परम्परया क्रियार्थत्वेन क्रियापरत्वमप्येवं स्याद् वेदान्तानाम्; अन्यथा हि कर्त्रादिसंबन्धरहितब्रह्मपरत्वेऽङ्गीक्रियमाणे यथोक्तं पारमर्षं सूत्रमनादृतं स्यादिति भावः ॥

ननु प्रकरणान्तरमिदम्, 'ब्रह्मविदाप्नोति परम्' (तै. २–१) इति ब्रह्मविद्याधिकारात्; तत्कथमीदृशवेदान्तवाक्यानां क्रियाविधिशेषत्वं शक्योहनम् ? – इति शङ्कामुत्प्रेक्ष्याऽऽह '**उपासनादिक्रियान्तरविधानार्थत्वं वा**' इति । यदि स्वप्रकरणेनैव सङ्गतिर्वक्तव्या इति व्यसनितया रोचयसे, तर्हि, एतत्प्रकरणेऽप्यस्त्येवोपासनालक्षणमानसक्रियाविधिः; तदर्थत्वमेवास्तु वेदान्तानां, तच्छेषत्वेन ब्रह्मवस्तु-

प्रकाशनमपि । एवं मन्थादिक्रियान्तरमप्यस्ति निरूपितमत्रैव, तद्विधिशेषत्वं वा भवतु, न तु क्रियाविधिसंस्पर्शरहितं निर्विशेषब्रह्मरूपं वस्तु वेदार्थ इत्येतन्नः प्रापयितव्यम् इत्यभिप्रायः ॥

ननु किमित्येवं सर्वत्र क्रियापरत्वाभिनिवेशः, ब्रह्मवस्त्वेव स्वातन्त्र्येणेह प्रतिपाद्यते इत्येव ऋजुबोधे संभवत्यपि ? एवं हि शास्त्रान्तरारम्भोऽप्यनुगृहीतो भवेत् इत्याशङ्कायामाह – '**न हि परिनिष्ठितवस्तुप्रतिपादनं संभवति**' इति । तत्प्रतिपादनं न संभवति । कुतः पुनरेतत् ? तत्राऽऽह – '**प्रत्यक्षादिविषयत्वात् परिनिष्ठितवस्तुनः**' इति । यद्यपि ब्रह्मणो प्रमाणान्तरगोचरत्वं जन्माद्यधिकरणभाष्ये एव प्रत्युक्तम्, 'ननु भूतवस्तुत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणा अनर्थिकैव प्राप्ता' (जन्म. ८–२९, ३०) इति शङ्कामुत्थाप्य, तथापि प्रकारान्तरेणापि प्रतिवक्तव्या शङ्का इत्याशयेन सा पुनरप्युत्थाप्यत इत्यदोषः । अभ्यधिकां शङ्कामप्याह पूर्वपक्षी '**तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात्**' इति । पुरुषार्थो हि नाम इष्टप्राप्तिः, अनिष्टनिवृत्तिर्वा ; स च क्रियासाध्य एव न वस्तुज्ञानमात्रसाध्य इति भावः ॥

( भाष्यम् )

**अत एव 'सोऽरोदीत्' (तै. सं. १-५-१-१) इत्येवमादीनाम् आनर्थक्यं मा भूदिति 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः' (जै. १–२–७) इति स्तावकत्वेनार्थवत्त्वम् उक्तम् । मन्त्राणां च 'इषे त्वा' (तै.सं. १–१–१–१) इत्यादीनां क्रियातत्साधनाभि-**

धायित्वेन कर्मसमवायित्वम् उक्तम् । न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेण अर्थवत्ता दृष्टा, उपपन्ना वा । न च परिनिष्ठिते वस्तुस्वरूपे विधिः संभवति, क्रियाविषयत्वाद् विधेः ॥

२७. शास्त्रस्य क्रियापरत्वे जैमिनिवचनं प्रमाणम् – अत्राभियुक्तवचनं प्रमाणमित्यभिप्रेत्याऽऽह – अत एवेति । क्रियाविधितच्छेषप्रतिपादनमन्तरेण शास्त्रस्यानर्थक्यमिति हेतोरेवेत्यर्थः । 'सोऽरोदीत्' (तै. सं. १–५–१–१) इति वाक्यस्य स्वतो हेयोपादेयप्रतिपादनाभावेऽपि 'तस्माद्रजतं हिरण्यमदक्षिण्यम् .... तस्माद्बर्हिषि न देयम्' (तै. सं १–५–१–१) इति सफलनिन्दाशेषत्वम् । यदाह भाष्यकारः 'सोऽरोदीदिति कस्य विधेः शेषः? तस्माद् बर्हिषि रजतं न देयमित्यस्य' (शा. भा. १–२–१, पा. १२४) इति । एवम् अन्येऽपि 'वायुर्वै क्षेपिष्ठा देवता' (तै.सं. २–१–१–१) इत्यादयोऽर्थवादाः 'वायव्यं श्वेतमालभेत भूतिकामः' (तै. सं. २–१–१–१) इत्यादिविहितक्रियास्तुत्यर्थत्वेनार्थवन्तः स्युरित्युक्तम् इत्यर्थः । ननु विधिनिषेधार्थवादमन्त्रनामधेयात्मको वेदः, तत्र केवलम् अर्थवादानामेवोदाहरणं कुतः ? इत्याशङ्क्याह 'मन्त्राणां च' इति । प्रमाणलक्षणे अर्थवादचिन्तानन्तरं मन्त्रगता चिन्ता अवतारिता । 'इषे त्वा' (तै. सं. १–१–१–१) इत्यादिमन्त्राणाम् उच्चारणमात्रेणाप्यर्थवत्त्वं स्यादिति शङ्कावारणाय छिनद्मीत्यध्याहारात् शाखाच्छेदनादिप्रतीतेः, दृष्टद्वारेणैव क्रियातत्साधनज्ञापनेनार्थवत्त्वमुक्तम् । तदाह – 'क्रियातत्साधनाभिधायित्वेन कर्मसमवायित्वमुक्तम्' इति ।

'इत्यादीनाम्' इत्यादिशब्दात्, 'अग्निर्मूर्धा' (तै.सं. ४-४-४) इत्यादिषु क्रियातत्साधनदेवतादिप्रकाशकत्वप्रतीतेः कर्मसंबद्धत्वं ज्ञेयम्। एवं निषेधस्थलेऽपि क्रियासंबद्धत्वमूह्यमित्याशयेनाह। **'न क्वचिदपि'** इति। सर्वत्र विधिनिषेधतत्संबन्धप्रकाशनात्मके वेदे साक्षादाराद्वा क्रियासंबन्धित्वेनैवार्थवत्त्वदर्शनात्, वेदान्तानामपि वेदत्वसामान्यात् कथञ्चित् क्रियासंबन्धित्वेनैवार्थवत्त्वं कल्पनीयम् इति भावः। ननु कर्मकाण्डे जैमिन्यादिभिर्मीमांसिते विधिसंस्पर्शमन्तरेणार्थवत्ताया अदर्शनेऽपि वेदान्तविषये कथञ्चित् अन्यथाप्यर्थवत्त्वं समस्तीत्यनुमानेन अर्थापत्त्या वा संभावयिष्यामः इत्याशङ्क्येत, तन्मा शङ्कीत्यत आह **'उपपन्ना वा'** इति। यस्मादेव साऽर्थवत्ता नान्यथा दृष्टा, तत एव नोपपद्यतेऽत्रापीति युक्तम् इति भावः। तस्मात् हेयोपादेयरहितस्य परिनिष्ठितस्य वस्तुनो ब्रह्मरूपस्य वेदप्रतिपाद्यत्वकल्पने पुरुषार्थाभाव इति यदस्माभिरुक्तम्, तत्तथैव स्थितम् इत्यभिप्रायः॥

ननु भवतु नाम क्रियाविधिसंस्पर्शमन्तरेण वेदवाक्यानाम् अर्थवत्ता अनुपपन्ना इत्यपि, तथापि वेदान्तेषु साक्षाद् ब्रह्मैव विधीयत इति कल्प्यताम्, तत्र को दोषः! – इत्याशङ्क्याह – **'न च परिनिष्ठिते वस्तुस्वरूपे विधिः संभवति, क्रियाविषयत्वाद् विधेः'** इति। क्रिया हि अनुष्ठेयेति तत्र विधिः सम्भवति, पुरुषतन्त्रत्वादनुष्ठानस्य; ब्रह्म तु कूटस्थं वस्त्विति भवतां मतम्, वेदान्ताश्च बोधयन्त्येव केवलम् इति च। न च ब्रह्म, वेदान्तवाक्यजन्यबोधो वा शक्यविधानः, अननुष्ठानरूपत्वेन तयोः पुरुषतन्त्रत्वाभावात् इति भावः॥

# ३. भाट्टमतोपसंहारः

( भाष्यम् )

तस्मात्, कर्मापेक्षितकर्तृदेवतादिस्वरूपप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानाम् । अथ प्रकरणान्तरभयान्नैतदभ्युपगम्यते, तथापि स्ववाक्यगतोपासनादिकर्मपरत्वम् । तस्मान्न ब्रह्मणः शास्त्रयोनित्वम् ॥

२८. भाट्टाक्षेपोपसंहारः – तदेवं शास्त्रस्य क्रियार्थत्वात् वेदान्तानामपि शास्त्रत्वाविशेषात् तथैवार्थवत्त्वं युक्तम् – इति यदादौ प्रतिज्ञातम्, तज्जैमिनिवचनप्रामाण्येन युक्त्या च सविस्तरमुपपाद्य स्वमतेन वेदान्तानां विनियोगमुक्तमुपसंहरति – 'तस्मात्' इति । क्रियासंस्पर्शमन्तरेण वेदप्रामाण्यस्यादृष्टत्वादनुपपन्नत्वाच्च कर्मापेक्षितकर्तृस्वरूपं प्रकाश्यते आत्मस्वरूपनिरूपणेन वेदान्तेषु – इत्यभ्युपगन्तव्यम् । अथवा देवतादिस्वरूपं प्रकाश्यते 'ब्रह्मविदाप्नोति परम्' इत्यादिभिर्वाक्यैः । अथ पूर्वकाण्डस्थकर्मशेषत्वम् अयुक्तम्, तेषां कर्मणाम् असन्निधानात् इति मतिः, तथापि अत्रस्थितोपासनादिकर्मपरत्वमेव कल्प्यम् एतेषां वाक्यानाम् । सर्वथापि तु कर्मासंपृक्तब्रह्मपरत्वं न कल्पनीयम् इति भाट्टाभिप्रायः । उक्तं हि **तन्त्रवार्तिके** – 'एतेन क्रत्वर्थकर्तृप्रतिपादनद्वारेणोपनिषदां नैराकाङ्क्ष्यं व्याख्यातम्' (तं. वा. १–२–१, पा. ११४) इति । 'आत्मज्ञानं हि संयोगपृथक्त्वात् क्रत्वर्थपुरुषार्थत्वेन ज्ञायते, तेन विना परलोकफलेषु कर्मसु प्रवृत्तिनिवृत्त्यसंभवात्' (तं. वा. १–३–८, पा. २८८) इति च ॥

परमप्रकृतम् उपसंहरति – '**तस्मात्, न ब्रह्मणः शास्त्रयोनित्वम्**' इति । सर्वथापि वेदान्तानां क्रियाविधिशेषत्वमेवोचितमभ्युपगन्तुं यस्मात्, तस्मान्न ब्रह्मप्रतिपादकत्वं तेषाम् । अतोऽसाध्विदं प्रतिज्ञायते यद् ब्रह्मणः शास्त्रयोनित्वमिति – इत्यभिप्रायः ॥

# ४. सूत्रार्थः

( भाष्यम् )

**इति प्राप्ते उच्यते –**

## तत्तु समन्वयात् ॥ ४ ॥

२९. **वेदान्तशास्त्राद् ब्रह्मावगतिः** – शास्त्रयोनित्वं **ब्रह्मणो न संभवति**, परिनिष्ठिते वस्तुनि शास्त्रस्य प्रामाण्यासंभवात् **इति पूर्वपक्षः** । तद्व्युदासेन शास्त्रप्रमाणकत्वं ब्रह्मणोऽवधारयितुं **सूत्रम् 'तत्तु समन्वयात्' इति** । तदाह '**इति प्राप्ते उच्यते**' **इति** ॥

( भाष्यम् )

**तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः** । तद् ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणम्, वेदान्तशास्त्रादेवावगम्यते । कथम् ? समन्वयात् । सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि । 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां. ६–२–१), 'आत्मा वा इदमेक एवाग्र

आसीत्' (ऐ. १-१-१), 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः' (बृ. २-५-१९), 'ब्रह्मैवेदममृतं पुरस्तात्' (मुं. २-२-११) - इत्यादीनि। न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वये अवगम्यमाने अर्थान्तरकल्पना युक्ता, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् ॥

३०. सूत्रस्थपदार्थव्याख्यानम् - पूर्वपक्षव्यावृत्तिस्तु सूत्रस्थतुशब्देन प्रतिज्ञाता । तदाह - 'तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः' इति । 'तत्र पूर्वपक्षं (१) ब्रह्मणि वेदान्तानां प्रामाण्यासंभवप्रतिज्ञा, (२) तत्र साधकयुक्त्युपन्यासः - इति द्वेधा विभज्य, प्रामाण्यसाधनस्यैव तावदभ्यर्हितत्वात्, तदर्थं सूत्रस्थपदानामर्थं व्याकर्तुमारभते । 'तद् ब्रह्म' इत्यादिना । 'सर्वज्ञं सर्वशक्ति' इति विशेषणद्वयं तु जन्मादिसूत्रादर्थाल्लब्धम् । तथा हि तत्र भाष्यम् - 'अस्य जगतः .... जन्मस्थितिभङ्गं यतः सर्वज्ञात्, सर्वशक्तेः, कारणाद् भवति तद् ब्रह्म इति वाक्यशेषः' (जन्म. खं. २) इति । यदेव हि निर्विशेषम् अद्वितीयं ब्रह्म जिज्ञास्यत्वेन सूत्रितम् 'अथातो ब्रह्मजिज्ञासा' (१-१-१) इति, तदेव तु जगज्जन्मादिकारणत्वेन सर्वज्ञं सर्वशक्ति चेति व्यवह्रियमाणम् ईश्वरशब्दवाच्यमपि - इत्यभिप्रायेण 'जन्माद्यस्य यतः' इति द्वितीयसूत्रे लक्षितम् इति स्मारयितुं 'सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणम्' इत्युल्लेखः। यदेव हि निरस्तसर्वविशेषं ब्रह्म 'अथ परा यया तदक्षरमधिगम्यते, यत्तदद्रेश्य-

मग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रम्' (मुं. १-१-५, ६) इत्यादिना जगत्कारणत्वेनाप्युपदिश्यते श्रुतौ ; एतदेव च तृतीयसूत्रे 'शास्त्रयोनित्वात्' इति वेदान्तशास्त्रप्रमाणकत्वेन प्रतिज्ञातम् इत्याकूतवानाह– 'वेदान्तशास्त्रादेवावगम्यते' इति। 'वेदान्तशास्त्रादेव' इत्यवधारणं तु न पुनः प्रमाणान्तरेण, कर्मपरवेदवाक्यैर्वा – इत्युभयविधप्रमाणनिवारणपूर्वकं शास्त्रस्य ब्रह्मावगमने असाधारणकारणत्वनियमनार्थम्। यथैव प्रत्यक्षादीनां विधिनिषेधचोदनात्मकवेदवाक्यानां च प्रमाणान्तरानधिगताबाधितार्थबोधनलक्षणं प्रामाण्यं स्वस्वविषये, एवमेव च वेदान्तानामपि ब्रह्मणि–इत्यभिप्रायः ॥

३१. वेदान्तशास्त्रप्रामाण्ये उपपत्तिः – ननु वेदान्तानां ब्रह्मण्यप्रामाण्यमुपपादितं मया। तत्र किंनैवोपपादकयुक्तिं कथं शास्त्रस्य परिनिष्ठितवस्तुनि ब्रह्मणि प्रामाण्यं प्रतिज्ञायते ? – इत्याक्षिपति पूर्वपक्षी। 'कथम् ?' इति ॥

सिद्धान्ती सूत्राक्षरैरेव प्रत्याह – 'समन्वयात्' इति। संग्रहवाक्यस्य विवरणम् 'सर्वेषु हि' इत्यादि 'श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्' इत्यन्तम्। अत्र हेतुं त्रेधा विभज्य प्रदर्शयति। तत्र प्रप्रथमं तावत् सर्ववेदान्तसमन्वयः। सर्वेषु हि वेदान्तेषु ब्रह्मरूपं चेतनमेकमेव वस्तु जगत्कारणत्वेन प्रतिपाद्यते, न जातुचिदचेतनं किञ्चिदन्यत्। यादृशो हि एकस्मिन् वेदान्ते सर्वज्ञः सर्वशक्तिः सर्वात्मा एकोऽद्वितीयो जगदुत्पत्त्यादिकारणत्वेन व्यपदिश्यते, तादृश एवान्येष्वपि वेदान्तेषु व्यपदिश्यते। तस्मात् सर्वत्र वेदान्तवाक्यानि अस्यैवैतस्यैवार्थस्य

प्रतिपादकत्वेन समनुगतानि । अत एतत्प्रतिपादकत्वेनैवार्थवन्तः सर्वे वेदान्ता इति गम्यते । तथा च सूत्रयिष्यति – 'गतिसामान्यात्' (१–१–१०) इति । यत्रापि कारणत्वपरामर्शशून्यं ब्रह्मवाक्यं 'स पर्यगाच्छुक्रम्....' (ई. ८), 'श्रोत्रस्य श्रोत्रम्' (के. १–२), 'एवमोङ्कार आत्मैव' (मां. १२), 'स एष नेतिनेत्यात्मा' (बृ. ३–९–२६) – इत्यादिस्थले, तत्रापि तदेव ब्रह्म स्वेन निरुपाख्येन निर्दिश्यते, न तु कारणवाक्यगतविलक्षणम् इति, 'सर्वेषु वेदान्तेषु' इति प्रतिज्ञानुपरोधः । स एष सर्ववेदान्तसमन्वयो नाम यत् समानगतित्वं सर्वेषां वेदान्तानां ब्रह्मणि ॥

अथ प्रतिवेदान्तं वाक्यसमन्वयः प्रदर्श्यते – '**वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि**' इति । प्रतिवेदान्तं वाक्यानि ब्रह्मैव निर्विशेषमद्वितीयं जगत्कारणम् इत्यस्यैवार्थस्य तात्पर्येण प्रतिपादकत्वेन समन्वितानि । ततश्च शब्दानुगमात् ब्रह्मैव वेदान्तशास्त्रप्रमेयमित्यवगम्यते – इत्यभिप्रायः ॥

तमिमं प्रतिज्ञातार्थम् एकैकशो वाक्यान्युदाहृत्य स्फुटयितुमारभते । तत्र 'सदेव सोम्य' इति सामवेदान्तर्गतं छान्दोग्यवाक्यम्, 'आत्मा वा इदम्' इति च ऋग्वेदान्तर्गतम् ऐतरेयवाक्यम्, 'तदेतद्ब्रह्म' इति यजुर्वेदान्तर्गतं बृहदारण्यकवाक्यम्, 'ब्रह्मैवेदम्' इति त्वाथर्वणमुण्डकोपनिषद्वाक्यम् । तदेवं सर्वेष्वपि वेदेषु समानमेव तत्तदन्तर्गतोपनिषदि ब्रह्मणस्तात्पर्येण प्रतिपाद्यत्वमिति सर्वेष्वपि वेदान्तेषु वाक्यानि सर्वज्ञसर्वशक्तिस्वरूपस्य जगदुत्पत्तिस्थितिलय-

कारणस्य ब्रह्मणः प्रतिपाद्यत्वेन समनुगतानीत्येतत् प्रदर्शितं भवति । 'इत्यादीनि' इत्यादिशब्दात् 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २-१) इत्यादीन्यपि शाखान्तरगतानि वाक्यानि ग्रहीतव्यानि ॥

३२. छान्दोग्ये वाक्यसमन्वयः – अत्र कथमेतेषु वेदान्तेषु वाक्यानामेतस्यैवार्थस्य प्रतिपादकत्वेन समन्वयः ? – इत्येतज्जिज्ञासूनां सुखावबोधार्थं प्रदर्शयामः । तत्र छान्दोग्ये तावत् 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां. ६-२-१) इत्यस्तितामात्रं निर्विशेषं ब्रह्मोच्यते । इदं जगत् अग्रे सदेवैकमद्वितीयमासीत् – इत्युपक्रम्य, 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो'(६-८-७) इत्यद्वितीयब्रह्मप्रतिपादनेनैवोपसंह्रियते । तत एव ब्रह्मण ईक्षणपूर्वकं तेजःसृष्टिरभिधीयते । तेजोऽबन्नानामुत्तरोत्तरस्य ईक्षणपूर्वकमेव पूर्वस्मात् पूर्वस्मात् सृष्टिं दर्शयन् सर्वत्रापि चेतनस्यैव कारणत्वमनुगतं दर्शयति । तदेतत् कारणत्वं साङ्ख्यादिसम्मतपरिणामिधर्मः इति मा शङ्कीति सर्वत्राप्यग्न्यादिषु त्रिवृत्कृतेषु 'अपागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्' (छां. ६-४-१) इत्यादिना सर्वस्यापि कार्यस्य प्रतीतरूपेणानृतत्वं कारणरूपेणैव च सत्यत्वं प्रदर्श्य–यदादौ प्रतिज्ञातं सदृष्टान्तं 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्, यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (६-१-३, ४) इति–तदानुगुण्येनैव सर्वस्यापि सृष्टस्य जगतः प्रतीतरूपेणासत्त्वं स्वरूपेण सद्ब्रह्माव्यतिरिक्तत्वं च दृढीकरोति । एवं यथैवोपन्यस्तमादौ जीवस्यापि

सद्ब्रह्मात्मनैवाऽऽत्मवत्त्वम् 'अनेन जीवेनाऽऽत्मनानुप्रविश्य नामरूपे व्याकरवाणि' (छां. ६–३–२) इति, तदेवोत्तरत्र 'सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति'(छां. ६–८–१). 'अन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनं हि सोम्य मनः' (छां. ६–८–२) इति चानुभवारूढं कुर्वन् सत्कार्यसृष्ट्यनुप्रवेशस्य सद्ब्रह्मावगत्येकप्रयोजनत्वं दर्शयन् 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छां. ६–८–४) इति चाभ्यासेन सद्व्यतिरेकमेव सर्वासां प्रजानामवधारयन् एतदेव द्रढयति। पुनरपि तत्तदाशङ्कापरिहाराय मधुनद्यादिदृष्टान्तैः सद्ब्रह्मसंपन्नानामपि तदा तथात्वाविज्ञाने तदैक्यमेव कारणम् इत्युक्त्वा परमकारणस्य ब्रह्मणोऽतिसूक्ष्मत्वेऽपि, न्यग्रोधबीजकणादतिसूक्ष्मान्महान् न्यग्रोध इव, नामरूपरहितादपि सद्ब्रह्मणो नामरूपाभ्यां व्याकृतमिदं स्थूलं जगज्जायत इति नासम्भावनीयमिदमिति सत्कारणवादे श्रद्धामुत्पाद्य, अतीन्द्रियमपि सद्ब्रह्म आचार्योपदेशाद्युपायेन शक्याधिगममिति जलविलीनलवण-तस्करापहृतगन्धारदेशीयजन-दृष्टान्तपूर्वकं मनःप्रत्ययमादधानः, पुनः पुनः 'स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' (छां. ६–१०–३, ११–३, १२–३, १३–३, १४–३, १५–३) इति सर्वस्यापि जगतो सर्वेषामपि जीवानां परमार्थात्मात्मत्वं तस्यैवैकस्यात्मनः परमार्थसत्यत्वं चोपदिशति। अन्ते च तस्करदृष्टान्तेन सत्याभिसन्धस्यात्मनिष्ठस्य मोक्षम्, अनृतजगदभिसन्धस्य च बन्धं निदर्शयन् 'तद्धास्य विजज्ञौ' (छां. ६–१६–३) इत्याचार्योपदेशेन निश्चितविज्ञानोत्पत्तिं तत एव च पुरुषार्थप्राप्तिं दर्शयति ॥

३३. **ऐतरेयवाक्योदाहरणम्** – छान्दोग्यषष्ठप्रपाठके इतरोपनिषदपेक्षया स्फुटतरं सर्वाणि ब्रह्मलिङ्गानि दर्शयन्त इति तद्गतान्येव वेदान्तवाक्यानि प्रथममुपन्यस्तानि । अथैतरेयोपनिषद्वाक्यान्युपन्यस्यति, तेषामपि ब्रह्मणि समन्वयमभिप्रयन् । तत्रापि खलु सद्वाक्येष्विव 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ. १–१–१) इति प्रागुत्पत्तेः सर्वस्यापि जगत आत्मरूपेणैवावस्थितिरवधार्यते । सृष्टे जगति जीवात्मना प्रवेशश्चोपदिश्यते 'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत' (ऐ. १–३–१२) इति । प्रविष्टस्य च जीवस्य 'स एतमेव पुरुषं ब्रह्म ततममपश्यत्' (ऐ. १–३–१३) इति ब्रह्मात्मत्वदर्शनमुच्यते । अन्ते च 'एष ब्रह्मैष इन्द्रः' इति समस्तभेदजातमनुक्रम्य 'सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म' (ऐ. ३–१–३) इति सर्वत्रापि प्रज्ञानरूपेण तस्यैवात्मनोऽनुगतत्वमुक्त्वा कारणे एव ब्रह्मणि वाक्यानां समन्वयः कृतः ॥

३४. **बृहदारण्यकवाक्यम्** – अथ शुक्लयजुर्वेदीयबृहदारण्यकमधुब्राह्मणवाक्यमुदाहृतम् । तत्रेयं पूर्णा कण्डिका - 'इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच । तदेतदृषिः पश्यन्नवोचत् । रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय । इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेति । अयं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम्' (बृ. २–५–१९) इति ।

अत्र—स एव परमेश्वरो व्याकुर्वन् रूपं रूपं प्रति तत्तदनुगुणं रूपं भेजे। एवं नामरूपव्याकरणं तत्तद्रूपानुगुणरूपभाक्त्वं चास्य प्रतिचक्षणाय स्वरूपप्रतिख्यापनाय । इत्थंस्वरूपोऽयमिति कथं नाम प्रख्यायेतेति। स एष परमेश्वरः, एक एव सन् मायाभिः अविद्याकृतप्रज्ञाभिर्बहुरूपत्वेन गम्यते । इन्द्रियतदर्थबाहुल्यादेव बहुरूप इव प्रतीयते; स्वरूपेण तु प्रज्ञानघनैकरस एव । सृष्टानामपीन्द्रियाणामेतस्मादनन्यत्वमेव । एष एव कार्यकारणवर्जितं बाह्यान्तरविभागरहितं च ब्रह्म । अयं जीवात्मा द्रष्टा श्रोता मन्ता चेत्यादिरूपेण विभाव्यमानो ब्रह्मैव परमार्थतः। ब्रह्मैव च सर्वात्मना सर्वमनुभवतीति विभाव्यते। एतदेव सर्ववेदान्तानुशासनम् – इति वाक्यार्थः । अत्रापि ब्रह्मणो नामरूपव्याकरणव्याजेन सर्वात्मना प्रतीयमानत्वेऽपि सृष्टस्य इन्द्रियतदर्थविभागेन विभक्तस्य कारणभूतब्रह्मात्मनोऽनन्यत्वमेव; प्राणभृतामपि विशेषात्मनां ब्रह्मानन्यत्वमेवेति प्रतिपादयतां वाक्यानां जगत्कारणे ब्रह्मण्येव तात्पर्येण समन्वय इति स्पष्टम् ॥

३५. **मुण्डकवाक्यानां ब्रह्मणि समन्वयः** – अथाथर्वणान्तर्गतमुण्डकोपनिषद्यपि वाक्यानां जगज्जन्मादिकारणभूते ब्रह्मण्येव समन्वयो यथा तथा प्रदर्श्यते । 'ब्रह्मैवेदममृतं पुरस्तात्' (मुं. २–२–१२) इति तत्रैव वाक्यानां तात्पर्यं दर्शयितुमुदाहरणम् । अत्र हि 'अथ परा यया तदक्षरमधिगम्यते । यत्तदद्रेश्यम् ....' (१–१–५, ६) इत्यादिना अक्षरशब्दनिर्देश्यं निर्विशेषमद्वितीयं ब्रह्म परविद्याविषयत्वेन प्रतिज्ञाय 'यद्भूतयोनिं परिपश्यन्ति धीराः' (मुं. १–१–६) इति तस्यैव भूतकारणत्वमुक्तम्। तत्र कथं भूतयोनित्वं

ब्रह्मणः ? — इत्याकाङ्क्षायाम् ऊर्णनाभिपृथिवीपुरुषाणां निदर्शनेन कारणाद् विलक्षणं सलक्षणं च जगत्समस्तं जायते — इत्युपदिश्य तस्मादेवाक्षराद् ब्रह्मणः सत्यपुरुषाद्यभिधानात् सर्वं चेतनाचेतनलक्षणं जायत इति विस्तरेण प्रदर्श्य उपसंहारे – एतदेवैकं ब्रह्म परमार्थसत्यम्, तद्विकारभूतमन्यत् सर्वं प्रतीयमानरूपेणानृतमेवेत्यवधारयति 'ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण । अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वम्' (मुं. २–२–१२) इति । नामरूपवदवभासमानं कार्यं वस्तुतो ब्रह्मैव, अब्रह्मप्रत्ययः सर्वोऽविद्याविजृम्भित एवेति वाक्यार्थः ॥

**१६. अत्र सर्वत्रोदाहृतानि कारणब्रह्मवाक्यान्येव** — अत्र जन्मादिसूत्रोदाहृतानि 'यतो वा इमानि भूतानि'(तै. ३-१)इत्यादिवाक्यान्यनुदाहृत्य 'सदेव सोम्य' इत्यादीन्येव वाक्यानि किमित्युदाहृतानि ? — इत्याशङ्क्य प्राचीनटीकाकारैः समाहितम् "ननु जन्मादिसूत्रोदाहरणेनैव प्रामाण्यं वर्णनीयम् । किमुदाहरणान्तरेण ? बाढम् । अस्त्ययमभिप्रायो भाष्यकारस्य । तत्र ब्रह्मणो लक्षणं वक्तव्यमिति तटस्थस्यैव ब्रह्मणो निरूपकाणि वाक्यान्युदाहृतानि । इह तु 'तत्त्वमसि' इति जीवस्य ब्रह्मात्मतावगतिपर्यन्तानि वेदान्तवाक्यानि न तटस्थमेव जगत्कारणं प्रतिपाद्य पर्यवस्यन्ति - इत्यतः, तथाभूतान्येव वाक्यान्युदाहृतानि 'सदेव सोम्येदमग्र आसीत्' इत्येवमादीनि " इति । तदेतद् भाष्यकारहृदयानवबोधनिमित्तम् इति वयं प्रतीमः । कुतः ? जन्मादिसूत्रेऽपि खलु कारणत्वेन निर्दिष्टं ब्रह्म स्वरूपेणैव निर्दिदिक्षितम् इति तत्सूत्रभाष्यार्थतत्त्वविवेचन्यां उपपादितमस्माभिः (जन्म.खं. २८) ।

तत एवेहाधिकमधिगन्तव्यम् । न हि कारणवाक्यानि कारणत्वमात्रोपदेशेनोपक्षीणानि क्वचिदपि, किं तर्हि स्वरूपे एव समन्वितानि । यथा चेदं तथा इहापि जन्मादिसूत्रोदाहृतवाक्यवदेव जगत्कारणवाक्यानां ब्रह्मस्वरूपे एव समन्वयः प्रदर्शनीय इति चतुर्भ्योऽपि वेदेभ्यो जगत्कारणान्येव वाक्यानि समुदाहृतानीति दर्शितमधस्तात् । तस्मात् जन्मादिसूत्रोदाहृतवाक्येभ्यो विलक्षणानि वाक्यान्युदाहर्तुं नायं प्रयत्नो भाष्यकारस्य, किं तर्हि यदेव जगज्जन्मादिकारणत्वेन लक्षितं ब्रह्म जन्मादिसूत्रे, तस्मिन्नेव ब्रह्मणि सर्वेषां वेदान्तवाक्यानां समन्वयदर्शनात्, वेदान्तशास्त्रलक्षणादेव प्रमाणादवगम्यते इत्यत्रोपपत्तिमादर्शयितुम् इति ज्ञेयम् ॥

**३७. वेदान्तवाक्यानाम् एकरूपे एव ब्रह्मणि समन्वयः –** यदप्याहुः **प्राचीनटीकाकाराः –** सामान्यतः सिद्धस्य तत्पदार्थस्य सर्वज्ञत्वादिस्वभावत्वे समन्वयः, त्वंपदार्थस्य च ब्रह्मात्मतायां समन्वयः – इति द्वेधा समन्वयो वेदान्तवाक्यानाम् इति, तदप्यसत् । क्षित्यङ्कुरादिजगतः सकारणत्वं प्रतिज्ञाय घटकुलालादिसंबन्धमिव कार्यकारणभावं जगत्परमेश्वरयोः साधयताम्, तथैव सामान्यतोदृष्टानुमानावलम्बनेन प्रधानपरमाण्वाद्युपादानकारणमभ्यूहमनानां च तार्किकाणाम्, केवलम् उपक्रमादितात्पर्यलिङ्गाश्रयणेन चोदनावाक्यार्थं निर्णिनीषतां मीमांसकानां च मते इव इहापि शास्त्रे वाक्यार्थनिर्णयसरणिः इत्यभ्युपगमप्रसङ्गात् । न चेष्टापत्तिः, तथा हि सति सामान्यतोदृष्टानुमानेनाचेतनोपादानकारणस्वीकर्तारः, कापिलकाणादादिवादा अपि

लब्धावकाशाः स्युः । भिन्नभिन्ननिमित्तोपादानकारणाभ्युपगन्तृवादाश्च निवारणीयाः स्युरनुमानेनैव जगत्कारणं कल्पयताम् । केवलमुपक्रमादिलिङ्गबलादेव वेदार्थनिर्धारणाय प्रवृत्तौ प्रमाणान्तरावेद्यभूतवस्तुमात्रप्रतिपादनेनानर्थक्यमपि वेदान्तानां दुर्निवारणमेव स्यात् । वाक्यानां यथाकथञ्चिदुपासनादिक्रियार्थस्यापि शक्यसाधनत्वात् । तथा च पूर्वपक्षविजयदुन्दुभिरेवाहता स्यादेवं कल्पनायाम् । अतो नायं पन्थाः ॥

कथं तर्हि भाष्यवाक्यम् 'तद् ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेवावगम्यत' इति ? उच्यते । ब्रह्मणो जगज्जन्मादिकारणत्वं नाम जगद्रूपासद्विकल्पास्पदत्वमेव । तथा हि वक्ष्यति—'यथा घटकरकाद्याकाशानां महाकाशानन्यत्वम् , यथा च मृगतृष्णिकोदकादीनाम् ऊषरादिभ्योऽनन्यत्वम् , दृष्टनष्टस्वरूपत्वात् , स्वरूपेणानुपाख्यत्वात् , एवमस्य भोग्यभोक्त्रादिप्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभावः' (२–१–१४, पा. १९७) इति निदर्शनानयनेन । तस्य च ब्रह्मणः स्वरूपलक्षणमेव निर्दिदिक्षितं कारणवाक्येषु – इति जन्माद्यधिकरणभाष्यार्थतत्त्वविवेचन्यामुपपादितमस्माभिः (जन्म. खं. ६८, पा. १३५) । समन्वयस्तु सर्वत्रापि जगत्कारणविशेषे एव ब्रह्मणीत्युदर्के उपपादयिष्यते । अतो न साध्विदं विभागकरणं कारण वाक्यानां जीवब्रह्मैक्यवाक्यानां च समन्वयविशेषकल्पनेन भाष्याक्षरयुक्तिबहिर्भूतेनेत्यास्तां तावत् ॥

३८. एवं तावत् सर्वेष्वपि वेदान्तेषु वाक्यानि जगदुत्पत्तिस्थितिलयकारणभूतं ब्रह्मैव तात्पर्येण प्रतिपादयन्तीति वाक्यसमन्वयात्

ब्रह्मणः शास्त्रप्रमाणकत्वं निराक्षेपमित्युक्तमुपक्रमादितात्पर्यलिङ्गसमाश्रयणेन । तत्र प्रतिवाक्यं एतस्मिन्नेवार्थे तात्पर्यवदिति विशदयितुमिदानीं तत्तद्वाक्यगतपदानां ब्रह्मस्वरूपे एव समन्वयं विवक्षुराह – '**न च तद्गतानां पदानां**' इत्यादि । यथैव हि 'कुलालो मृदमानीय दण्डचक्रादिसाहाय्येन घटं करोति' इत्युक्ते वाक्यगतानां पदानां क्रियाकारकसंबन्धेन संहतानां घटकरणे समन्वयो निश्चीयते, यथा वा 'नील महत् सुगन्ध्युत्पलम्' इतिवाक्यगतानां पदानां विशेष्यविशेषणसम्बन्धेन संहतानाम् उत्पलस्वरूपविषये समन्वयो निश्चीयते, एवम् 'ऐतदात्म्यमिदं सर्वम्', 'तत्सत्यं स आत्मा तत्त्वमसि' इत्यादिवाक्यगतानां पदानां सर्वस्य जगतः, जीवस्य च उद्देश्यविधेयभावसंबन्धेन ब्रह्मात्मत्वप्रतिपादनात् ब्रह्मस्वरूपविषये समन्वयो निश्चीयते । तस्मात्, साधूक्तमेतत् 'तद्ब्रह्म जगदुत्पत्त्यादिकारणं वेदान्तशास्त्रादेवावगम्यते' इति – इत्यभिप्रायः ॥

## भाट्टोक्तवेदान्तविनियोगप्रकाराणां सामान्येन निरासः

३९. **वेदान्तानां न क्रियार्थत्वम्** – एवं तावत् वाक्यानां तद्गतपदानां च ब्रह्मवस्तुपरत्वं दर्शितं ब्रह्मणः शास्त्रप्रमाणकत्वमाक्षिपतां भाट्टानां मुखपिधानाय । इदानीं भाट्टोदाहृतानां युक्तीनां निरासार्थं यथोक्तं समन्वयमेव हेतूकृत्याऽऽह – 'निश्चिते समन्वयेऽवगम्यमाने, अर्थान्तरकल्पना न युक्ता' इति । प्रप्रथमं तावत् क्रियापरत्वं वेदान्तानां पराकरोति – 'अर्थान्तरकल्पना न युक्ता' इति । अयं ह्याशयः पूर्वपक्षिणः – 'कुर्यात् क्रियेत कर्तव्यं भवेत् स्यादिति पञ्चमम्' (?)

इति भाष्ययुक्तोक्तिः । तदनुसारेणात्र लिङादीनामन्यतमस्याप्यप्रयोगे संसर्गोपदेशाभावात् पदान्येव तावद् बोधकत्वेन न संहन्यन्ते । न हि 'इदम् अनेनैवम्' इत्येवंप्रकाराणां परःशतानामप्येकार्थवाचकत्वेन संहतिर्वाक्यत्वं वा समस्तीति । तत्र क्रियाकारकसंबन्धेनेव विशेष्य-विशेषणभावसंबन्धेनापि संहतानां पदानां समन्वयदर्शनात् विधि-बोधकैरेव पदैर्भाव्यं वाक्यनिष्पत्तये इत्येतदनैकान्तिकम् । तदिह पदानां ब्रह्मस्वरूपविषये निश्चितसमन्वयदर्शनात् वेदान्तवाक्यानां क्रियापरत्वमेवैष्टव्यमिति दुराग्रह इत्याह – '**निश्चिते समन्वये**' इति ॥

**४०. वेदान्तानामक्रियार्थत्वेऽपि नानर्थक्यम्** – ननु न वयं वेदान्तानामवाक्यत्वं साधयामः, येन वस्तुबोधकवाक्यान्यपि सन्तीति दृष्टान्तावष्टम्भेन प्रत्यवस्थानं स्यात, किं तु 'आम्नायस्य क्रियार्थ-त्वादानर्थक्यमतदर्थानाम्' (जै.१-२-१) इति जैमिनिवाक्यमवलम्ब्य वेदान्तानामक्रियार्थत्वे, वस्तुबोधकानामप्यानर्थक्यं स्यादिति वदामः । अक्रियार्थत्वे हि वेदान्तानामवेदत्वमपि प्रसज्येत, वेदस्य क्रियार्थत्व-नियमात् । अथैष नियमो नाभ्युपगम्यते भवद्भिः, तदा वेदविज्जैमिनि-विरोध एव स्यादिति । अत्रापि 'निश्चिते समन्वयेऽवगम्यमाने' इत्येव प्रतिवचनमावर्तते । यदि तावदभ्युपगम्य वेदान्तानां वेदत्वम् एवमुच्यते, तर्हि वेदान्तवाक्यानां बोधकत्वे निश्चीयमाने, असति च बाधके यथैव क्रियानिष्ठानां वैदिकवाक्यानां प्रामाण्यमाश्रीयते, एवमेव वस्तुनिष्ठानामपि प्रामाण्यं केन वार्यते ? किञ्च नैवं शब्द-

प्रमाणकानां शब्दबोधितेऽप्यर्थे अविश्वासो युक्तः, अतिप्रसङ्गात्। तदेवं निश्चिते पदसमन्वयेऽवगम्यमाने पदानामर्थान्तरकल्पना वाक्यानां तात्पर्यान्तरकल्पना वा न युक्ता; श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। तस्मात्, श्रुतस्यार्थस्य ब्रह्मणो न हानं कर्तव्यम्, अश्रुतायाः क्रियायाः कल्पनं वा न कर्तव्यम्। अन्यथा हि भवद्विचारसरणिमनुरुन्धानः कश्चित् वेदस्यार्थवत्त्वं कर्तुकामः 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादि-वाक्ये, निश्चितेऽपि ज्योतिष्टोमस्वर्गयोः साध्यसाधनभावे, ज्योति-ष्टोमस्य असाधनत्वं स्वर्गस्य च तदसाध्यत्वम् असत्त्वमेव वा कल्पयेत्, कस्तस्य निवारकः स्यात्? तस्मात् 'आम्नायस्य क्रियार्थत्वात्' इति सूत्रं न सर्वस्यैवाम्नायस्य क्रियार्थत्वं प्रतिजानीते, किंतु कर्मकाण्डभागस्यैव, चोदनालक्षणस्यैवार्थस्य जिज्ञास्यत्वेन प्रकृतत्वात् इति सन्तोष्टव्यम् इत्यभिप्रायः॥

## ५. भाट्टयुक्तीनां निरासः

( भाष्यम् )

**न च तेषां कर्तृस्वरूपप्रतिपादनपरता अवसीयते; 'तत्केन कं पश्येत्' (बृ. २-४-१४, ४-५-१५) इत्यादिक्रियाकारकफलनिराकरणश्रुतेः॥**

४१. **वेदान्तानां न कर्तृस्वरूपप्रतिपादनपरत्वम्** – ननु पदानां सामान्यार्थकत्वात् वाक्यगतपदार्थविशेषे पर्यवसानेनैव एकत्वं

भवेत् । अतः 'सत्यं ज्ञानमनन्तं ब्रह्म', 'अहं ब्रह्मास्मि' इत्यादिवाक्येषु स्थितानां पदानां विशेषे ब्रह्मणि पर्यवसाने सत्येव वाक्यपरत्वम् अवकल्पते । ब्रह्मणः पदार्थत्वे च प्रमाणान्तरवेद्यत्वापत्त्या श्रुतिवाक्यस्यानुवादकत्वेनाप्रामाण्यमेव प्रसजेत । अत एव वयमवोचाम 'परिनिष्ठितवस्तुप्रतिपादनं न संभवति, प्रत्यक्षादिविषयत्वात् परिनिष्ठितवस्तुनः' इति । तस्मात् एतत्प्रसङ्गवारणाय क्रियाविध्यपेक्षितकर्तृबोधकत्वमेव वेदान्तानाम् इति कल्प्यताम् । तथा चोक्तं वार्तिके 'एतेन स्वरूपकर्तृप्रतिपादनद्वारेणोपनिषदां नैराकाङ्क्ष्यं व्याख्यातम्' (जै. १-२-१, पा. १७४) ॥

अत्रोच्यते 'न च तेषां कर्तृस्वरूपप्रतिपादनपरता अवसीयते' इति । अयमाशयः – दर्शितं तावद् ब्रह्मणः पदार्थत्वाभावेऽपि 'सदेव सोम्येदमग्र आसीत्' (छां.) इत्येवमादिवाक्यस्थानां पदानामन्योन्यसान्निध्येन ब्रह्मणि निश्चितो भवति समन्वय इति । अतो दृष्टेऽपि समन्वये अनुपपत्तिं कल्पयमानो न वाक्यार्थविदामादरणीयः स्यादिति तत एव स्पष्टम् । न च शक्यतेऽर्थान्तरं वाक्यानां कल्पयितुम् । कुत एतत् ? उच्यते । न तावत् कर्तृस्वरूपप्रतिपादनपरता अवसीयते वाक्यानाम् । कस्मात् ? 'तत्केन कं पश्येत्' (बृ. ४–५–१५) इत्यादिक्रियाकारकफलनिराकरणश्रुतेः । मैत्रेयीब्राह्मणत उद्धृतमिदं वाक्यम् । 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कं रसयेत्तत्केन कमभिवदेत्तत्केन कं शृणुयात्तत्केन कं मन्वीत तत्केन कं स्पृशेत्तत्केन कं विजानीयात्' इति हीदं वाक्य-

मात्मैक्यावस्थायां 'तत्केन कं पश्येत्' इत्यादिना दर्शनादिकरण-कर्मादिकारकाणां क्रियातत्फलानां च सुस्फुटं निषेधत् कथङ्कारं कर्त्रात्मपरमिति केनापि सचेतसा अध्यवस्येत? अनुभूयते च सुषुप्तायवस्थासु कर्तृत्वादिकारकरहितम् आत्मैकत्वम् इति श्रुतिरनुभवोपबृंहितापि भवति। तस्मात्, निरस्तक्रियाकारकफले ब्रह्मणि समन्वयदर्शनात्, न कर्तृद्वारा क्रियापरत्वं कल्पयितुं युक्तम् इति ॥

( भाष्यम् )

**न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मणः, 'तत्त्वमसि' (छां॰ ६-८-७) इति ब्रह्मात्मभावस्य शास्त्रमन्तरेण अनवगम्यमानत्वात्। यत्तु हेयोपादेयरहितत्वादुपदेशानर्थक्यमिति, नैष दोषः; हेयोपादेयशून्यब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात् पुरुषार्थसिद्धेः॥**

**४२. ब्रह्मणो परिनिष्ठितवस्तुत्वेऽपि न प्रमाणान्तरवेद्यता** – यद्यपि पूर्वपक्षोपसंहारावसरे 'कर्तृदेवतादिप्रकाशनेन क्रियाविधिशेषत्वम्' इति कर्तृप्रतिपादनवादेन सहैव देवताप्रतिपादनपरत्वमपि समभिव्याहृतम्, तथापि वेदान्तानामानर्थक्यप्रसङ्गवारणाय 'परिनिष्ठितवस्तुप्रतिपादनं न संभवति, प्रत्यक्षादिविषयत्वात् परिनिष्ठितवस्तुनः' इत्युपक्रममनुसृत्य तदादृतानुक्रमेणैव प्रमाणान्तरविषयत्वमेव तावन्निरस्यन्नाह '**न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि**' इति। अत्र शङ्कावादिनोऽयमाशयः – कर्त्राद्यभावबोधकश्रुतिरन्यथैव नेतव्या; यत्कारणं

क्रियानन्वितकेवलपरिनिष्ठितवस्तुरूपब्रह्मप्रतिपादनपरत्वे वेदान्ताना-मङ्गीकृते, परिनिष्ठितवस्तुनो घटवह्न्यादिवत् प्रत्यक्षादिविषयत्वमपि स्यात् । ततश्च वेदान्तानामनुवादकत्वेनाप्रामाण्यप्रसङ्गः – इति । परिनिष्ठितवस्तुत्वं भूतवस्तुत्वम्, न तु धर्मादेरिव भाव्यत्वम् । यद्यपि भूतवस्तुत्वेऽपि न प्रत्यक्षानुमानादिविषयत्वं ब्रह्मणः–इत्येतत् पूर्वमप्युप-पादितमेव 'स्वभावतो विषयविषयाणीन्द्रियाणि न ब्रह्मविषयाणि' (जन्म. ८–३०) इत्यादिना, तथापि प्रमाणस्वभावपर्यालोचनेन ब्रह्मणः प्रत्यक्षादिविषयत्वं निराकृतम्, इदानीं वेदान्तैकविज्ञेयब्रह्मस्वभावपर्या-लोचनयापि तन्निराकरिष्यामीत्याह – " 'तत्त्वमसि' इति ब्रह्मात्म-भावस्य शास्त्रमन्तरेणानवगम्यमानत्वात्" इति । तत्र ब्रह्मपदार्थ एव तावदलौकिकत्वात् शास्त्रमन्तरेण न शक्यावगम इति नतरां ब्रह्मात्मत्वस्य प्रमाणान्तरगोचरत्वं शक्यसंभावनम् । तदेवं नाबोधकत्वेन शास्त्राप्रामाण्यं शङ्क्यम्, नाप्यनुवादकत्वेन–इति यत् प्रतिज्ञातमस्माभिः, वेदान्तशास्त्रा-देव प्रमाणात् ब्रह्मावगम्यत इति, तत् तथैव स्थितम् – इत्यभिप्रायः ॥

## ४३. फलवदर्थावबोधकत्वेनापि वेदान्तानां प्रामाण्यम्–

ननु न वयमबोधकत्वमनुवादकत्वं वा आशङ्क्यानर्थक्यमप्रामाण्यं च वेदान्तानां ब्रूमः, येन 'स्वतन्त्रमेव ब्रह्म क्रियासंबन्धरहितं बोधयति शास्त्रम्' इत्युपपादनमात्रेण कृतार्थो भवेद् भवान् । न हि वयं व्यसनि-तया साक्षात् क्रियार्थत्वं क्रियाविशेषत्वं वा भवेद् वेदान्तानाम् इत्यातिष्ठामहे, किं तर्हि साक्षादाराद्वा क्रियार्थत्वाभावे निष्प्रयोजन एव वेदान्तानां ब्रह्मोपदेशः स्यादित्यभिप्रायेण तथा ब्रूमः । एतदेव

त्वानर्थक्यं प्रपञ्चितमक्रियार्थत्वे वेदान्तानाम् । अत एव ह्यवोचाम 'तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात्' इति । इदमेव ह्यर्थवत्त्वं नाम वेदवाक्यानां यत्फलवदर्थावबोधकत्वम् । एतत्तु नैव संभवेत् क्रियाविधिशेषत्वाभावे केवलब्रह्मवस्तूपदेशकानां वेदान्तानाम् इत्यसदभिप्रायः । तत्र कः समाधिरिति ?

तदेतदाशङ्क्य प्रत्याचष्टे – '**यत्तु हेयोपादेयरहितत्वादुपदेशानर्थक्यमिति, नैष दोषः**' । कथम् ? '**हेयोपादेयशून्यब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात् पुरुषार्थसिद्धेः**' इति । अयमभिप्रायः – प्रवृत्तिनिवृत्त्योर्हि उपादेयार्थसत्त्वात्, हेयार्थसंभवाच्च साफल्यम् ; अत्र पुनः, कूटस्थाद्वितीयब्रह्मवस्तुबोधकत्वं शास्त्रस्याभ्युपगच्छतः, नैव किञ्चिद् हेयम् उपादेयं वा समस्ति – इति खलु भवदाशङ्का ? तत्रास्तु नाम हेयस्य वा उपादेयस्य वा अभाव इति । तत एव हाने उपादाने वा प्रयत्नायासो नास्तीत्येतावदभिहितं भवति । तदेतदिष्टमेवापद्यते नः । नन्वेष एव परमपुरुषार्थो यदुत ज्ञातज्ञातव्यत्वं कृतकृत्यत्वं चेति । तथा हि श्रुतिराह 'आत्मानं चेद् विजानीयादयमस्मीति पूरुषः । किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्' (बृ. ४–४–१२) इति । हानोपादानक्रियाप्राप्यस्तु आयासलभ्यः, अनित्यश्च – इति तात्कालिकेष्टानिष्टप्राप्तिपरिहारमात्रत्वेन पुरुषार्थ इत्युपचर्यते । न च वेदविहितक्रियालभ्योऽपि स्वर्गशब्दवाच्यः यथोक्तदोषविनिर्मुक्तः । तदप्याह श्रुतिः – 'प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म' (मुं. १–२–७)

इति । **स्मृतिश्च** 'त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते । ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान् दिवि देवभोगान् ॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति' (गी. ९. २०, २१) इति । अतः सुष्ठूक्तं 'हेयोपादेयशून्यब्रह्मात्मतावगमादेव पुरुषार्थसिद्धेः' इति । तस्मात्, अनाक्षेपोऽयं हेयोपादेयरहितत्वात् ब्रह्मात्मोपदेशानर्थक्यमिति – इत्यभिप्रायः ॥

( भाष्यम् )

**देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद् विरोधः । न तु तथा ब्रह्मण उपासनाविधिशेषत्वं संभवति । एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः । न हि एकत्वज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः संभवोऽस्ति, येनोपासनाविधिशेषत्वं ब्रह्मणः प्रतिपाद्येत । यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टम्, तथापि आत्मविज्ञानस्य फलपर्यन्तत्वान्न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम् । न चानुमानगम्यं शास्त्रप्रामाण्यम्, येनान्यत्र दृष्टं निदर्शनमपेक्षेत ॥**

**४४.** **वेदान्तानां न देवतादिप्रतिपादनद्वारा क्रियाविधिशेषत्वम्** – एवं तावत् कर्तृस्वरूपप्रकाशनेन क्रियाविधिशेषत्वं

वेदान्तानाम् इति -विकल्पो निराकृतः, परिनिष्ठितस्वरूपप्रतिपादने आनर्थक्यमेव स्यादित्यनिष्टप्रसङ्गश्च वारितः। परिनिष्ठितवस्तुबोधनेनैव परमपुरुषार्थसाधनत्वोपपादनेन फलवन्निश्चितार्थबोधकत्वरूपं प्रामाण्यं निराबाधं वेदान्तानामिति चादर्शितम्। तस्मात् कर्मपरत्वं वेदान्तानां सर्वथापि निरवकाशीकृतमालोक्य कल्पान्तरमाददीत पूर्वपक्षी। कथम्? यदि भवतो मतम्—'क्रियाविधिशेषत्वं सर्वथा न संभवति वेदान्तानाम्, ज्ञानप्रकरणस्थत्वात्, न हि विप्रकृष्टकर्मकाण्डे विहितानां कर्मणां शेषत्वं ज्ञानकाण्डप्रकाशितदेवतानामूहितुं शक्यम्' इति, तथापि 'स्ववाक्यगतोपासनादिकर्मपरत्वमस्तु' इत्यप्यस्त्यनुमतमस्माभिः; तत्र कं दोषं पश्यसि? नन्वेवमपि क्रियाविधिशेषत्वं वेदान्तानामबाधितम्। तथा चास्मदभीष्टसिद्धिः—इति। तत्राऽऽह—**'देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद् विरोधः'** इति। अत्र हि ज्ञानकाण्डे न केवलं ब्रह्मवस्तुप्रतिपादनं क्रियते, किन्तु मध्यमाधिकारिणामुपकाराय उपासनान्यपि तत्र तत्र विधास्यन्त एव, विशिष्य चोपनिषदारम्भे; रहस्यसामान्यात्, मनोवृत्तिसामान्याच्च। तानि तु, अभ्युदयसाधनानि ज्ञानोत्पत्तिद्वारा क्रममुक्तिसाधनानि च—इति तत्र देवतादीनां सगुणब्रह्मणश्च उपासनाविधिशेषत्वम् अभ्युपगम्यत एव सिद्धान्ते। तदाह **'उपासनार्थत्वेऽपि न कश्चिद्विरोधः'** इति। न हि सर्वेषामपि वेदान्तवाक्यानां विधिपरत्वम् अनुमोदामहे, उपासनावाक्यानामपि ब्रह्मवस्तुसतत्त्वनिर्धारणपरत्वं वा, येन व्याहतवक्तृत्वम् अभियुज्येतापि इति भावः॥

४५. **निर्गुणब्रह्मणो न विधिशेषत्वं संभवति** – ननु किमित्येवम् अर्धजरतीयन्याय आश्रीयते ? सर्वेषामपि वाक्यानां क्रियातच्छेषान्यतरबोधकत्वम् इत्येवास्तु, यथाहुरेकदेशीयाः ; तत्राह – **' न तु तथा ब्रह्मणः '** इति । 'शुद्धस्य' इति वाक्यशेषः । सगुणब्रह्मविद्यासु हि ' सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत । अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत । मनोमयः प्राणशरीरो भारूपः ' (छां. ३–१४–१, २) इत्यादिषु 'उपासीत', 'क्रतुं कुर्वीत' इति स्फुटतरम् उपासनाविधायकाः शब्दा दरीदृश्यन्ते । शुद्धब्रह्मप्रतिपादनपरेषु वेदान्तवाक्येषु पुनर्न क्वचिदपि विधायकः शब्दोऽस्ति; उपासनाप्रकारबोधकः शब्दः, उपास्यगुणानुक्रमः, लोकान्तरे फलावाप्तिवक्ता शब्दो वा तत्र नोपलभ्यते । नापि कालान्तरे फलप्राप्तिः, अर्चिरादिगतिर्वा तत्र श्रुता– इति न कथमपि देवतादिरिव उपासनाविधिशेषत्वं ब्रह्मणः कल्पयितुं शक्यं तेषु वाक्येषु ॥

इतश्चैवम् **' एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः ।** ' तत्केन कं पश्येत् ' इत्यादिवाक्यजन्यज्ञानेन क्रियाकारकफललक्षणद्वैतविज्ञानम् उपमृद्यते, बाध्यते प्रबोधेनेव स्वाप्नद्वैतदर्शनम् इत्युक्तं वेदान्तानां कर्तृस्वरूपप्रतिपादनपरतानिराकरणप्रस्तावेन । तुष्यन्यायेन आत्मैकत्वज्ञाने सति हेयोपादेयादर्शनात्, उपासनाक्रियायाः, तत्कर्तुः, कारकाणां फलस्य च चोपमर्दः स्यादेव ; अतोऽपि नाद्वितीयब्रह्मणो विधिशेषत्वसम्भवः – इत्यभिप्रायः ॥

अथ स्यात् – सुषुप्त्यादौ जातेऽपि क्रियाकारकफलशून्याद्वैतवस्तुनोऽनुभवे प्रबोधे पुनरपि द्वैतसंभवस्य दृष्टत्वात्, तद्वदिहापि

उन्मृदितस्यापि द्वैतस्य पुनरप्युद्भवः स्यादिति । न स्यात् । कुतः ? **न ह्येकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः सम्भवोऽस्ति, येनोपासनाविधिशेषत्वं ब्रह्मणः प्रतिपद्येत** । अयमभिप्रायः– सुषुप्तौ सत्यपि स्वरूपभूते निष्प्रपञ्चात्मन्यप्यये न कस्यापि ज्ञानं समस्ति 'अहमिदानीं निर्द्वैते परमात्मनि संपन्नः' इति । तथा हि श्रुतिराह मधु-दृष्टान्तेन सुषुप्तितत्त्वं प्रतिपादयन्ती, 'एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति' (छां. ६–९–२) इति । मधुनि सर्वेषां रसानाम् एकतां गतानां तत एव यथा 'अयमीदृशो रसः' इति विवेको न ज्ञायते, एवमेव सता एकीभूतत्वात् न कस्यचिदत्र 'अहमिदानीं सद्ब्रह्मणा एकतां गतः' इति विज्ञानं सञ्जायते ; सत्येव हि द्वैते विज्ञानोत्पत्तिरुपपन्ना इति । उत्पन्नेनैव हि रज्ज्वादिज्ञानेन तत्र सर्पादिबुद्धिर्बाध्यते । न च सर्पादिज्ञानाभावेऽनु-वर्तमानेऽपि सुषुप्ते 'नात्र सर्पादि, रज्जुरेव हि सर्पादिवदवभासते' इति ज्ञानम् उदेति ॥

एवम् उत्पन्ने एव सद्ब्रह्मात्मज्ञाने 'नात्र क्रियाकारक-फलविभागः पदार्थानाम्, सदेवेदं सर्वम् ; द्वैतं त्वसदेव सदिवावभासते' इति ज्ञानमुदीयात् नानुत्पन्ने । अयमेव हि द्वैतस्योपमर्दो नाम यदात्मै-कत्वज्ञानोदयानन्तरं द्वैतसत्यत्वबुद्धिर्न कथञ्चिदनुवर्तत इति । तदाह – '**न ह्येकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः संभवोऽस्ति, येनोपासनाविधिशेषत्वं ब्रह्मणः प्रतिपद्येत**' इति । उपासना-विधिर्हि उपासनोपास्यभेदलक्षणं द्वैतविज्ञानमन्तरेण नावकाशं भजते,

६८ ग्. 'ब्रह्मैवेदं सर्वमहंच' इत्येकत्वविज्ञानमुत्पन्नमिति कथं पुनरपि 'उपासकोऽहम्, ममेदमुपास्यम्, प्रमाणभूतेन वेदेन मम चोदितमिदमुपासनम्, अत उपासनमनुष्ठाय शास्त्रनिर्दिष्टं फलं कालान्तरे देशान्तरे च प्राप्स्ये' इत्याकारकद्वैतविज्ञानं संभाव्येत, येन ब्रह्मण उपासनाविधिशेषत्वं प्रतिपद्येतापि ? न हि जातु कश्चित् स्वप्नादुत्थितः स्मरन्नपि स्वप्नदृष्टं प्रपञ्चं तत्र सत्यत्वमतिं कुर्यात् – इत्यभिप्रायः ॥

**४६. द्वैतविज्ञानोपमर्द एवानुपपन्न इति मतम्, तद्विमर्शश्च** – अत्र कश्चिदाह – "सत्यमेवं युज्येत यदि कस्यचिदेवमेकत्वमतिरुत्पद्येत ; न तु भवदभिमताद्वैतबुद्धिः केनचिदपि प्रमाणेनोत्पद्यते । 'अहमिदमनेन प्रमाणेन जानामि' इति खलु ज्ञानमुत्पद्यमानं सर्वत्रोत्पद्यते । न च समस्ति किञ्चिदपि प्रमाणं यद् द्वैतबुद्धिबाधकं भवेत् । न हि प्रमाणस्य प्रमाणत्वमन्तरेण प्रमात्राश्रयत्वं प्रमेयविषयत्वं कथञ्चिदुपपद्यते । अतो निष्प्रमाणकमिदं क्रियाकारकफलभेदज्ञानमेकत्वज्ञानेनोपमृद्यत इति । यस्तु स्वगोष्ठीनिष्ठः समयः–निरस्तसमस्तविशेषं वस्तु स्वानुभवसिद्धमिति सोऽप्यात्मसाक्षिकसविशेषानुभवादेव निरस्तः 'इदमहमद्राक्षम्' इति केनचिद्विशेषेण विशिष्टविषयत्वात् सर्वेषामप्यनुभवानाम् । स्वापादिषु च सविशेष एवानुभवः, क्रियाकारकादिविशेषरहितानुभूतिश्चेत्तत्रानुभूता, तथैव प्रबोधेऽनुसन्धानं स्यात् ; न तु तदस्ति । 'इयन्तं कालं न किञ्चिदहमज्ञासिषम्' इति प्रत्यवमर्शेनैव च तादृशानुभवाभावसिद्धिः । किञ्च 'सुखमहमस्वाप्सम्' इति सुप्तोत्थितस्मरणेन तदानीमप्यहमर्थस्याऽऽत्मनः सुखित्वं ज्ञातृत्वं च विज्ञायते ।

तदेवं कुत्राप्यवस्थायामेकत्वस्य तद्विज्ञानस्य वा असंभवात् न द्वैतविज्ञान-स्योन्मथनमस्ति, येन ब्रह्मण उपास्यत्वमसंभाव्यतया निराक्रियेत " इति ॥

तदिदं स्वेनैव प्रमाणीकृतानां वेदान्तानामप्रामाण्यापादनम् स्वानुभवापह्नवप्रयतनं चेत्युपेक्ष्यम् । तथा हि – 'अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा ' (बृ. ४–५–१४) इति आत्मनो नित्यत्वं प्रतिज्ञाय 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति .... तदितर इतरं विजानाति ' (बृ. ४–५–१५) इति द्वैताभासप्रतीतिकाले क्रियाकारकफललक्षणद्वैतविज्ञानमनुमोद्य 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् .... तत्केन कं विजानीयात् ' (बृ. ४–५–१५) इति तस्यैव द्वैतविज्ञानस्य आत्मैकत्वबोधदशायामसम्भवमुद्घोषयन्तीं श्रुतिं को वा शब्दप्रमाणको नाद्रियेत ? न च सुषुप्ताद्यवस्थास्वप्यैका-त्म्यानुभवो नास्ति क्रियाकारकफलभेदवर्जितः इति शक्यं प्रत्यवस्थातुं स्वानुभवापलापं विनेति । ननूक्तं मया 'इदमहमदर्शम्' इति विशेष-विशिष्टैव सर्वानुभूतिः । न च निर्विशेषानुभूतिरनुभूतास्ति सुषुप्तादिष्वपि – इति च ; सत्यमुक्तम्, दुरुक्तं तु तत् ; न हि 'इदमहं पश्यामि' इति यस्या अनुभूतेराश्रयेण वदसि, तत्स्वरूपे क्रियाकारकादिभेद-सद्भावं द्रष्टुं वर्षशतेनापि शक्नुयाः । अपि च सुषुप्ताद्यवस्थासु तादृशानुभवो नास्तीति केन प्रमाणेनाधिगतं त्वया, येनेत्थं स्वानुभव-मप्यपह्नोतुं प्रगल्भसे ? 'ननु नानुभूता तादृशानुभूतिः केनचिदपि तास्ववस्थासु ; अतोऽनुपलब्धिरेव प्रमाणं भवत्वत्र ' इति चेत्, सर्वप्रमाणप्रमेयविभागं तदभावं च पश्यन्ती अनुभूतिरप्यनुभवान्तरं

स्वप्रकाशतायापेक्षत इति वदन् कथं न लज्जसे ? अपि च श्रुतिरेवाह– 'यद्वै तन्न विजानाति विजानन् वै तन्न विजानाति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात्' (बृ. ४–३–३०) इति ; यत् सुषुप्ते न विजानाति किञ्चिदपि, न तद्विज्ञानस्वरूपानुभूतेरभावात्, किं तु ततोऽन्यस्य द्वितीयस्याभावाद् – इति खलु स्वरूपविज्ञातिलक्षणानुभूतिसद्भावं ततोऽन्यस्याः विशेषविज्ञातेस्तद्विषयस्य वा अभावादेव विशेषविज्ञानाभावं चोद्घोषयन्तीं श्रुतिं किं कारणमुपेक्षसे स्वानुभवमप्यपह्नुवानः ?

ननु न नायं निर्विशेषानुभवः सुषुप्तौ । सुप्तोत्थितस्य 'सुखमहमस्वाप्सम्, न किञ्चिदवेदिषम्' इति खलु निद्राविषयः परामर्शो जायते । तस्मात्, तस्यामप्यवस्थायाम् अहमर्थ एव ज्ञाता चाऽऽत्मा इत्युपपादितं मया । अहो धार्ष्ट्यम् अनुभवापलापिनः, येनानुभवमपि स्मृतिबलादपलपितुं प्रयतते । किं जागरितविषयसुखाद्यनुभवतत्स्मरणादिसजातीयामेव सुषुप्त्यनुभवविषयकजागरितस्मृतिं मन्यते भवान् येनेत्थं कारणाभावानुपपत्त्या अन्यावस्थानुभवगम्यावस्थागतस्मरणाकारं साधयितुं यत्नकरणोऽसि ? ओमिति चेत्, तत्र प्रष्टव्यः, 'एतावन्तं कालं सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इति खलु भवदभिमतः सुषुप्तानुभवपरामर्शाकारः प्रबुद्धावस्थास्मृतौ । तेनाहमर्थस्यैवात्मनः सुखित्वं ज्ञातृत्वं च- इति ब्रुवाणस्य, किं यत्र यत्रानुभवो न स्फुटः, तत्र तत्र स्मृतिरेव शरणम् इति भवतो मतमिति ? तर्हि स्फुटतरानुभवाभावेऽपि सुषुप्तौ, जाग्रत्कालानुभवो विद्यत एवेति किं नानुमिनुयाः ?

तदप्यनुमास्याम्येवेति चेत्, तर्हि किं जाग्रत्स्वप्नसुषुप्तयो जागत्काल-मेवैकमाधारीकृत्याधेयभावेनाश्रिताः – इति मन्यसे ? एवं चेत् कस्य हेतोः स्वप्नकाले अनुभवाभासे सत्यपि नैव जातुचिदपि जागरितकालोऽनुभूयते परामृश्यते वा 'अहमिदानीमेव जागरितावस्थातोऽत्रागतवान् जाग्रत्कालमानेन निशैवेयम्, अहोबुद्धिस्त्वियं भ्रान्तिरेव' इति कस्यचिदपि कदाचिदपि बुद्धिर्नोदेति ? 'जागरितमेवेदम्' इत्येव स्वप्ने नियमेन सर्वस्यापि कस्मान्मतिरुदेति जाग्रत्कालानुवृत्तावपि स्वप्ने ? अपि च किं कारणं भगवती श्रुतिः 'एवं ह वै तत्सर्वं पर आत्मनि संप्रतिष्ठते। पृथिवी च पृथिवीमात्रा च .... बुद्धिश्च बोद्धव्यं चाहङ्कारश्चाहङ्कर्तव्यं च' (प्र. ४–७, ८) इति सकलभूततन्मात्राभिः सहाहङ्कारस्यापि परे आत्मनि लयं ब्रूते, 'विज्ञानात्मा सह देवैश्च सर्वैः'(प्र.४-११) इति च विज्ञानात्मनोऽपि परे आत्मनि संप्रतिष्ठाम् ? किं च कारणं 'स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेर्विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः ....सर्व एते आत्मानो व्युच्चरन्ति' (बृ.मा. २–१–२३) इति तत एव परमात्मनः सकाशात् व्युच्चरणमुपदिशति ? तस्मात्, सुषुप्तौ क्रियाकारकफलभेदरहितात्मानुभवः सार्वत्रिकः श्रुत्युपदिष्टश्च नापलापमर्हति। विपरीता चेयं विचारसरणिः सर्वलोकादृतसरण्यपेक्षया, यया अवस्थान्तरगतस्मृतिबलात्, अवस्थान्तरगतस्य सार्वत्रिकानुभवस्य स्वभाववैपरीत्यमापाद्यते इति यत्किञ्चिदेतन्नवीनवेदान्तिनां चोद्यम्। अतो यथैव 'न किञ्चिदवेदिषम्' इति जागरितस्मरणबलात् सुषुप्ते ज्ञानाभावमिथ्याज्ञानतत्संस्कारव्यतिरिक्तं भावाज्ञानमनुमिमानाः शाङ्करव्याख्यानप्रस्थानीया

ऽपेक्ष्याः, श्रुतियुक्त्यनुभवविरोधिनः, एवमेवान्येऽपि जाग्रदवस्थादृष्टद्वैताभिनिवेशात् सौषुप्तानुभवमन्यथयितुं प्रयतमाना अपि न प्रेक्षावद्भिरादरणीया इत्यलमतिप्रपञ्चेन ॥

४७. **कर्मकाण्डवाक्यनिदर्शनानयनम् अयुक्तम्** – अथ यदप्युक्तं पूर्वपक्षिणा 'न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टा' इति, तदपि प्रत्याचिख्यासुराह **'यद्यप्यन्यत्र'** इति। ननु विध्यर्थवादमन्त्रात्मको हि वेदः, तत्र सर्वत्र क्रियार्थत्वमिति प्रसाध्योक्तं मया 'न क्वचिदपि' इति। वेदान्तवाक्यानामपि वेदवाक्यत्वं यद्यनुमन्यते, तर्हि वाक्यत्वसामान्याद् विधिसंस्पर्शद्वारैव तैरप्यर्थवत्तया भाव्यम् इत्यनुमीयते, तत्र को दोषः ?– इत्याशङ्कामुद्भाव्योत्तरमिदम् **'आत्मविज्ञानस्य फलपर्यन्तत्वात् न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम्'** इति। आत्मविषयकं हीदं विज्ञानम् 'अहं निर्द्वैतं ब्रह्मास्मि' इति। न चाऽऽत्मविषये विज्ञाने 'विज्ञानं जातं न वा, द्वैतबुद्धिरेतेन विज्ञानेन बाधिता वा न वा ?' इत्यादिरूपः संशय उपपद्यते; फलपर्यन्तत्वादेव विज्ञानस्य। यथा आत्मप्रत्ययिकैव भुजिक्रियासाध्या तृप्तिः, एवम् आत्मप्रत्ययिकमेव नित्यनिरस्तद्वैतब्रह्मात्मविज्ञानम् इति न तत् प्रत्याख्यातुं शक्यते, प्रत्याख्यातुरात्मन्येव संजातत्वात् तत्फलस्य। न च बाधकं ज्ञानान्तरं संभाव्यते, अद्वैततत्त्वविषयत्वाद् विज्ञानस्य – इत्यभिप्रायः। युक्त्यन्तरमप्याह चोद्यनिरासाय – **'न चानुमानगम्यं शास्त्रप्रामाण्यम्'** इत्यादिना। न हि कर्मकाण्डवाक्यानामपि प्रामाण्यं क्रियार्थत्वहेतुना पूर्वं प्रसाध्य

तदनन्तरं तदर्थविचाराय कश्चिद् व्यवस्यति। प्रत्यक्षादिप्रमाणान्तरानधिगताबाधितार्थबोधकत्वादेव हि प्रामाण्यं तेषामध्यवस्यति सर्वो वेदप्रमाणकः। तदेतत्किमिह दण्डवारितं येन विधिसंस्पर्शमन्यत्रादृष्टमिति हेतोर्वेदान्ताप्रामाण्यं साध्येत ? दृष्टबोधकत्वे सत्यपि प्रामाण्यसाधके, को वा अनुमानेन तत्साधनाय निदर्शनान्तरमन्वेष्टुं प्रयस्येत् ? – इति भावः। न च वह्निव्याप्यधूमदर्शनसाध्यपर्वतादिस्थवह्निज्ञानवत् परोक्षविषयमिदं ज्ञानम्, येनान्यत्र दृष्टं निदर्शनमपेक्षेतापि; न च दृष्टेऽनुपपन्नं नाम। यदि नाम विधिसंस्पर्शमन्तरेणार्थवत्ता न दृष्टा कर्मकाण्डवाक्यानाम्, तत्तथैवास्तु, न हि तावता इह फलपर्यन्तत्वं विज्ञानस्य संशयपदमारोपयितुं शक्यते। न हि प्रत्यक्षादीनां प्रमाणान्तरवेद्यविषयावगतिर्नास्तीति स्वविषयेऽपि विज्ञानजनकत्वमपह्नोतुं शक्यम्–इत्यभिप्रायः॥

## ६. उपसंहारः

(भाष्यम्)

तस्मात् सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वम् ॥

४८. **शास्त्रैकगम्यं ब्रह्म इति कोऽर्थः ?** – अत्र 'शास्त्रादेव प्रमाणाद् ब्रह्माधिगम्यते' इति भाष्ये अवधारणं कथमुपपद्यते ? इत्यत्र केचिदाहुः – 'शब्दस्तावदपौरुषेयत्वाददुष्टः। प्रमेयस्य पुनर्ज्ञानहेतुत्वे न प्रमाणमस्ति, शब्दस्यैव तदेकनिष्ठत्वेन तन्नियमात्। .... न च संवादलक्षणं प्रामाण्यम्, अपि तु बोधलक्षणम् इति प्रमाणविदां स्थितिः। अतो यथैव विधिवाक्यानां स्वार्थमात्रे प्रामाण्यम्, एवं स्वरूपवाक्यानामपि ; अनवगतपरिच्छेदसामान्यात्' इति। अत्र वयं

मन्यामहे न केवलम् अपौरुषेयत्वाददुष्टम् इति वेदवाक्यसामान्येन वेदान्तानां प्रामाण्यं स्थापनीयम्, किं तु यथाभाष्यं फलपर्यन्तविज्ञानजनकत्वात्, सर्वथापि तत्र बाधकप्रत्ययान्तरासंभवाच्च। अपि च आत्मविषयकविज्ञानान्तमेव सर्वप्रमाणानां प्रमाणत्वमिति वेदस्यापि प्रमाणत्वं तदन्तमेव। अतोऽपि नावसरः संशयस्य वेदान्ताः किं विधिसंस्पर्शमन्तरेणापि ब्रह्मणि प्रमाणं स्युः, किं वा न? – इति। तस्मात् वेदान्तजनितविज्ञानस्य फलपर्यन्तत्वात्, बाध्यत्वशङ्काऽसंभवाच्च पूर्वकाण्डवाक्यसामान्यात् अपौरुषेयशब्दत्वादिहेतुना तत्प्रामाण्यस्थापनप्रयासो न स्थाने इति। तदेतत् सर्वमभिसंधाय सिद्धान्तमुपसंहरति – 'तस्मात् सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वम्' इति॥

इति प्रथमं वर्णकम्

अथ भगवत्पादीयं

# शारीरकमीमांसाभाष्यम्

तत्र

## ४. समन्वयाधिकरणम्

( द्वितीयं वर्णकम् )

### ध्याननियोगवादिमतम्

#### प्रतिपत्तिविधिशेषतया शास्त्रप्रमाणकं ब्रह्म

१. अत्रापरे प्रत्यवतिष्ठन्ते – यद्यपि शास्त्रप्रमाणकं ब्रह्म, तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते। यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिशेषतया शास्त्रेण समर्प्यन्ते, तद्वत्। कुत एतत्? प्रवृत्तिनिवृत्तिप्रयोजनपरत्वात् शास्त्रस्य। तथा हि शास्त्रतात्पर्यविद आहुः, 'दृष्टो हि तस्यार्थः कर्मावबोधनम्' (शा. भा. १–१–१); 'चोदनेति क्रियायाः प्रवर्तकं वचनम्' (शा. भा. १–१–२) इति, 'तस्य ज्ञानमुपदेशः' (जै. १–१–५), 'तद्भूतानां क्रियार्थेन समाम्नायः' (जै. १–१–२५), 'आम्नायस्य क्रियार्थत्वा-

दानर्थक्यमतदर्थानाम्' (जै. १–२–१) इति च । अतः पुरुषं क्वचिद् विषयविशेषे प्रवर्तयत्, कुतश्चिद् विषयविशेषान्निवर्तयच्च अर्थवत् शास्त्रम् ; तच्छेषतया च अन्यदुपयुक्तम् । तत्सामान्याद् वेदान्ताना-मपि तथैवार्थवत्त्वं स्यात् ॥

## मुमुक्षुर्ब्रह्मोपासने नियुज्यते

२. सति च विधिपरत्वे यथा स्वर्गादिकामस्य अग्निहोत्रादि-साधनं विधीयते, एवम् अमृतत्वकामस्य ब्रह्मज्ञानं विधीयत इति युक्तम् । नन्विह जिज्ञास्यवैलक्षण्यमुक्तम् – 'कर्मकाण्डे भव्यो धर्मो जिज्ञास्यः, इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यम्' इति ; तत्र धर्मज्ञानफलात्, अनुष्ठानसापेक्षाद् विलक्षणं ब्रह्मज्ञानफलं भवितु-मर्हति । नार्हत्येवं भवितुम् । कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्य-मानत्वात् । 'आत्मा वा अरे द्रष्टव्यः' (बृ. २–४–५) इति । 'य आत्मा अपहतपाप्मा .... सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छां. ८–७–१), 'आत्मेत्येवोपासीत' (१–४–७), 'आत्मानमेव लोकमुपासीत' (बृ. १–४–१५), 'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३–२–९)–इत्यादिविधानेषु सत्सु, 'कोऽसौ आत्मा ?', 'किं तद्ब्रह्म ?' – इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः – नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो, नित्यशुद्धबुद्धमुक्तस्वभावः ; 'विज्ञानमानन्दं ब्रह्म' (बृ.) – इत्येवमादयः । तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यति इति ॥

## वस्तुमात्रकथने वेदान्तानाम् आनर्थक्यम्

३. कर्तव्यविध्यननुप्रवेशे, वस्तुमात्रकथने हानोपादानासंभवात्, 'सप्तद्वीपा वसुमती', 'राजाऽसौ गच्छति'—इत्यादिवाक्यवद् वेदान्तवाक्यानाम् आनर्थक्यमेव स्यात्। ननु वस्तुमात्रकथनेऽपि 'रज्जुरियम्, नायं सर्पः' इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेन अर्थवत्त्वं दृष्टम्; तथेहाप्यसंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात्। स्यादेतदेवं यदि रज्जुस्वरूपश्रवणे इव सर्पभ्रान्तिः, संसारित्वभ्रान्तिर्ब्रह्मस्वरूपश्रवणमात्रेण निवर्तेत, न तु निवर्तते; श्रुतब्रह्मणोऽपि यथापूर्वं सुखदुःखादिसंसारिधर्मदर्शनात्। 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २—४—५) इति च श्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्विधिदर्शनात्। तस्मात्, प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यम् इति ॥

## कर्मब्रह्मविद्याफलयोर्वैलक्षण्यम्

४. अत्राभिधीयते — न, कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्। शारीरं वाचिकं मानसं च कर्म श्रुतिस्मृतिसिद्धं धर्माख्यम्, यद्विषया जिज्ञासा 'अथातो धर्मजिज्ञासा' (जै. १—१—१) इति सूत्रिता। अधर्मोऽपि हिंसादिः प्रतिषेधचोदनालक्षणत्वात् जिज्ञास्यः परिहाराय। तयोः, चोदनालक्षणयोः, अर्थानर्थयोः, धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिषु स्थावरान्तेषु प्रसिद्धे। (१) मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु सुखतारतम्यम् अनुश्रूयते। ततश्च तद्धेतोर्धर्मस्य तारतम्यं

गम्यते । धर्मतारतम्यात् अधिकारितारतम्यम् । प्रसिद्धं च अर्थित्व-सामर्थ्यादिकृतम् अधिकारितारतम्यम् । तथा च यागाद्यनुष्ठायिनामेव विद्यासमाधिविशेषात् उत्तरेण पथा गमनम्, केवलैरिष्टापूर्तदत्तसाधनैर्धूमादिक्रमेण दक्षिणेन पथा गमनम्, तत्रापि सुखतारतम्यं तत्साधनतारतम्यं च शास्त्रात् 'यावत् सम्पातमुषित्वा' (छां. ५-१०-५) इत्यस्माद् गम्यते । (२) तथा मनुष्यादिषु नारकस्थावरान्तेषु सुखलवश्चोदनालक्षणधर्मसाध्य एवेति गम्यते तारतम्येन वर्तमानः। (३) तथा ऊर्ध्वगतेषु, अधोगतेषु च देहवत्सु दुःखतारतम्यदर्शनात्, तद्धेतोरधर्मस्य प्रतिषेधचोदनालक्षणस्य तदनुष्ठायिनां च तारतम्यं गम्यते। एवम् अविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखदुःखतारतम्यम् अनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धम्। तथा च श्रुतिः 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' (छां. ८-१२-१) इति यथावर्णितं संसाररूपमनुवदति । 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छा. ८-१२-१) इति प्रियाप्रियस्पर्शनप्रतिषेधात् चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्य अशरीरत्वस्य प्रतिषिध्यत इति गम्यते ; धर्मकार्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्यते ॥

## मोक्षाख्यस्याशरीरत्वस्य स्वाभाविकत्वम्

५. अशरीरत्वमेव धर्मकार्यम् इति चेत्, न; तस्य स्वाभाविकत्वात् । 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति' (का. २-२२)। 'अप्राणो

ह्यमनाः शुभ्रः' (मुं. २–१–२), 'असङ्गो ह्ययं पुरुषः' (बृ. ४–३–१५) इत्यादिश्रुतिभ्यः। अत एव, अनुष्ठेयकर्मफलविलक्षणं मोक्षाख्यम् अशरीरत्वं नित्यम् इति सिद्धम्। तत्र किञ्चित् परिणामिनित्यं यस्मिन् विक्रियमाणेऽपि 'तदेवेदम्' इति बुद्धिर्न विहन्यते। यथा पृथिव्यादि जगन्नित्यत्ववादिनाम्; यथा च साङ्ख्यानां गुणाः। इदं तु पारमार्थिकम्, कूटस्थनित्यम्, व्योमवत् सर्वव्यापि, सर्वविक्रियारहितम्, नित्यतृप्तम्, निरवयवम्, स्वयञ्ज्योतिःस्वभावम्। यत्र धर्माधर्मौ सहकार्येण कालत्रयं च नोपावर्तेते, तदेतदशरीरत्वं मोक्षाख्यम्, 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च' (का. २–१४) इत्यादिश्रुतिभ्यः। अतः, तद् ब्रह्म यस्येयं जिज्ञासा प्रस्तुता; तद् यदि कर्तव्यशेषत्वेनोपदिश्येत, तेन च कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत, अनित्य एव स्यात्। तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयो मोक्ष इति प्रसज्येत, नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यते। अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः॥

## विद्यानन्तरमेव मोक्षः, न स कार्यान्तरापेक्षः

६. अपि च 'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३–२–९), 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' (मुं. २–२–८), 'आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चन' (तै. २–९), 'अभयं वै जनक प्राप्तोऽसि' (बृ. ४–२–४), 'तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्' (बृ. १–४–१०), 'तत्र को मोहः कः शोकः

एकत्वमनुपश्यतः' (ई. ७) — इत्येवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति। तथा 'तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च' (बृ. १–४–१०) इति ब्रह्मदर्शनसर्वात्मभावयोर्मध्ये कर्तव्यान्तरवारणायोदाहार्यम्। यथा 'तिष्ठन् गायति' इति तिष्ठतिगायत्योर्मध्ये तत्कर्तृकं कार्यान्तरं नास्तीति गम्यते। 'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि' (प्र. ६–८), 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयतु' (छां. ७–१–३), 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः' (छां. ७–२६–२) इति चैवमाद्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवाऽऽत्मज्ञानस्य फलं दर्शयन्ति। तथा च, आचार्यप्रणीतं न्यायोपबृंहितं सूत्रम् 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' (न्या. सू. १–१–२) इति। मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद् भवति॥

## ब्रह्मात्मैकत्वविज्ञानं न संपदादिरूपम्

७. न चेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपम्, यथा 'अनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति' (बृ. ३–१–९) इति। न चाध्यासरूपम्, यथा 'मनो ब्रह्मेत्युपासीत' (छां. ३–१८–१), 'आदित्यो ब्रह्मेत्यादेशः' (छां. ३–१९–१) इति च मनआदित्यादिषु ब्रह्मदृष्ट्यध्यासः। नापि विशिष्टक्रियायोगनिमित्तम्,

'वायुर्वाव संवर्गः' (छां. ४-३-१), 'प्राणो वाव संवर्गः' (छां. ४-३-३) इतिवत् । नाप्याज्यावेक्षणादिकर्मवत् कर्माङ्गसंस्काररूपम् । संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञाने अभ्युपगम्यमाने 'तत्त्वमसि' (छां. ६-८-७), 'अहं ब्रह्मास्मि' (बृ. १-४-१०), 'अयमात्मा ब्रह्म' (बृ. २-५-१९) – इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तु-प्रतिपादनपरः पदसमन्वयः पीड्येत । 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः' (मुं. २-२-८) इति चैवमादीनि अविद्यानिवृत्तिफल-श्रवणान्युपरुध्येरन् । 'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३-२-९) इति चैवमादीनि तद्भावापत्तिवचनानि संपदादिपक्षे न सामञ्जस्येनोपपद्येरन् । तस्मात्, न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानम् ॥

## ब्रह्मणस्तज्ज्ञानस्य च न कार्यानुप्रवेशः शक्यकल्पनः

८. अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या, किं तर्हि प्रत्यक्षादि-प्रमाणविषयवस्तुज्ञानवद् वस्तुतन्त्रा । एवंभूतस्य ब्रह्मणः, तज्ज्ञानस्य च न कयाचिद् युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुम् । न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः 'अन्यदेव तद्विदितादथो अविदितादधि' (के.१-४) इति विदिक्रियाकर्मत्वप्रतिषेधात्, 'येनेदं सर्वं विजानाति तं केन विजानीयात्' (बृ. २-४-१४) इति च । तथा उपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति 'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते' इत्यविषयत्वं ब्रह्मण उपन्यस्य 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' (के. १-५) इति ॥

## अविषयस्य ब्रह्मणः शास्त्रयोनित्वं कथम् ?

९. अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिः – इति चेत्, न; अविद्याकल्पितभेदनिवृत्तिपरत्वात् शास्त्रस्य । न हि शास्त्रम् इदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति, किं तर्हि, प्रत्यगात्मत्वेन अविषयतया प्रतिपादयत् अविद्याकल्पितं वेद्यवेदितृवेदनादिभेदम् अपनयति । तथा च शास्त्रम् – 'यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम्'(के. २ – ३), 'न दृष्टेर्द्रष्टारं पश्येः .... न विज्ञातेर्विज्ञातारं विजानीयाः' (बृ. ३–४–२) इति चैवमादि । अतोऽविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः ॥

## क्रियानुप्रवेशाभावे मोक्षस्य उत्पाद्यत्वाद्यभावोऽपि हेतुः

१०. यस्य तूत्पाद्यो मोक्षः, तस्य मानसम्, वाचिकम्, कायिकं वा कार्यम् अपेक्षते इति युक्तम् । तथा विकार्यत्वे च । तयोः पक्षयोः, मोक्षस्य ध्रुवम् अनित्यत्वम् । न हि दध्यादि विकार्यम्, उत्पाद्यं वा घटादि नित्यं दृष्टं लोके । न चाप्यत्वेनापि कार्यापेक्षा, स्वात्मस्वरूपत्वे सति, अनाप्यत्वात् । स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वम् । सर्वगतत्वेन नित्याप्तस्वरूपत्वात् सर्वेण ब्रह्मणः, आकाशस्येव ॥

नापि संस्कार्यो मोक्षः, येन व्यापारमपेक्षेत । संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्यात्, दोषापनयनेन वा । न तावद् गुणाधानेन संभवति, अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य । नापि

दोषापनयनेन, नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य । स्वात्मधर्म एव सन्, तिरोभूतो मोक्षः क्रियया आत्मनि संस्क्रियमाणे अभिव्यज्यते, यथा आदर्शे निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वं धर्मः – इति चेत्, न, क्रियाश्रयत्वानुपपत्तेरात्मनः । यदाश्रया क्रिया तमविकुर्वती नैवात्मानं लभते । यद्यात्मा क्रियया विक्रियेत, अनित्यत्वमात्मनः प्रसज्येत । 'अविकार्योऽयमुच्यते' (गी. २–२५) इति चैवमादीनि वाक्यानि बाध्येरन् । तच्चानिष्टम्, तस्मात् न स्वाश्रया क्रिया आत्मनः संभवति । अन्याश्रयायास्तु क्रियाया अविषयत्वात्, न तया आत्मा संस्क्रियते ॥

ननु देहाश्रयया स्नानाचमनयज्ञोपवीतादिकया क्रियया देही संस्क्रियमाणो दृष्टः । न । देहादिसंहतस्यैव, अविद्यागृहीतस्याऽऽत्मनः संस्क्रियमाणत्वात् । प्रत्यक्षं हि स्नानाचमनादेर्देहसमवायित्वम् । तया देहाश्रयया तत्संहत एव कश्चिदविद्यया आत्मत्वेन परिगृहीतः संस्क्रियत इति युक्तम् । यथा देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिनः आरोग्यफलम्, 'अहमरोगः' इति यत्र बुद्धिरुत्पद्यते ; एवं स्नानाचमनयज्ञोपवीतादिना 'अहं शुद्धः, संस्कृतः' इति यत्र बुद्धिरुत्पद्यते स संस्क्रियते । स च देहेन संहत एव । तेनैव हि अहङ्कर्त्रा अहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते ; तत्फलं च स एवाश्नाति, 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' (मुं. ३–१–१) इति मन्त्रवर्णात् । 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (का. ३–४) इति च । तथा च

'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ' (श्वे. ६–११) इति, 'स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् ' (ई. ८) इति चैतौ मन्त्रौ अनाधेयातिशयतां नित्यशुद्धतां च ब्रह्मणो दर्शयतः । ब्रह्मभावश्च मोक्षः । तस्मात् , न संस्कार्योऽपि मोक्षः । अतोऽन्यन्मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनचिद् दर्शयितुम् । तस्मात् , ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते ॥

## ब्रह्मात्मज्ञानं न क्रिया

११. ननु ज्ञानं नाम मानसी क्रिया । न, वैलक्षण्यात् । क्रिया हि नाम सा यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते, पुरुषचित्तव्यापाराधीना च । यथा 'यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्' इति, 'सन्ध्यां मनसा ध्यायेत् ' (ऐ. ब्रा. ३–८–१) – इति चैवमादिषु । ध्यानं चिन्तनं यद्यपि मानसम्, तथापि पुरुषेण कर्तुम् , अकर्तुम्, अन्यथा वा कर्तुं शक्यम् ; पुरुषतन्त्रत्वात् । ज्ञानं तु प्रमाणजन्यम् । प्रमाणं च यथाभूतवस्तुविषयम् । अतो ज्ञानं कर्तुम् , अकर्तुम् , अन्यथा वा कर्तुम् अशक्यम् ; केवलं वस्तुतन्त्रमेव तत् । न चोदनातन्त्रम् , नापि पुरुषतन्त्रम् । तस्मात् , मानसत्वेऽपि ज्ञानस्य महद् वैलक्षण्यम् । यथा च 'पुरुषो वाव गौतमाग्निः ' (छां. ५–७–१), 'योषा वाव गौतमाग्निः ' (छां. ५–८–१) – इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति । केवलचोदनाजन्यत्वात् क्रियैव सा, पुरुषतन्त्रा च । या तु प्रसिद्धेऽग्नौ अग्निबुद्धिः, न सा चोदनातन्त्रा,

नापि पुरुषतन्त्रा ; किं तर्हि प्रत्यक्षविषयवस्तुतन्त्रैव – इति ज्ञानमेवैतत्, न क्रिया । एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम् ॥

## ब्रह्मज्ञानविषये श्रूयमाणानां लिङादीनां गतिः

१२. तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम् । तद्विषये लिङादयः श्रूयमाणा अपि अनियोज्यविषयत्वात् कुण्ठीभवन्ति, उपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत् । अहेयानुपादेयवस्तुविषयत्वात् ॥

किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' (बृ.२-४-५) इत्यादीनि विधिच्छायानि वचनानि ? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानि – इति ब्रूमः । यो हि बहिर्मुखः प्रवर्तते पुरुषः 'इष्टं मे भूयात्, अनिष्टं मा भूत्' इति, न च तत्र आत्यन्तिकं पुरुषार्थं लभते, तम् आत्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसङ्घातप्रवृत्तिगोचरात् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि । तस्य, आत्मान्वेषणाय प्रवृत्तस्य अहेयम् अनुपादेयं च आत्मतत्त्वम् उपदिश्यते 'इदं सर्वं यदयमात्मा' (बृ. २–४–६), 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् .... केन कं विजानीयात् .... विज्ञातारमरे केन विजानीयात्' (बृ. ४–५–१५), 'अयमात्मा ब्रह्म' (२–५–१९) इत्यादिभिः ॥

## आत्मज्ञाने सर्वकर्तव्यताहानिः, कृतकृत्यता च

१३. यदपि अकर्तव्यप्रधानम् आत्मज्ञानं हानायोपादानाय वा न भवतीति, तत्तथैवेत्यभ्युपगम्यते । अलङ्कारो ह्ययमस्माकं

यद् ब्रह्मात्मावगतौ सत्यां सर्वकर्तव्यताहानिः, कृतकृत्यता च--इति । तथा च श्रुतिः 'आत्मानं चेत् विजानीयादयमस्मीति पूरुषः । किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्' (बृ. ४--४--१२) इति । 'एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत' (गी. १५--२०) इति स्मृतिः । तस्मात्, न प्रतिपत्तिविधिविषयतया ब्रह्मणः समर्पणम् ॥

## केवलवस्तुवाद्यपि वेदभागोऽस्ति

१४. यदपि केचिदाहुः -- 'प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण केवलवस्तुवादी वेदभागो नास्ति' इति, तन्न । औपनिषदस्य पुरुषस्य अनन्यशेषत्वात् । योऽसौ उपनिषत्स्वेवाधिगतः पुरुषः, असंसारी ब्रह्म, उत्पाद्यादिचतुर्विधद्रव्यविलक्षणः स्वप्रकरणस्थोऽनन्यशेषः, नासौ नास्ति, नाधिगम्यत इति वा शक्यं वदितुम्; 'स एष नेति-नेत्यात्मा' (बृ. ३-९--२६, ४--४--२२, ४--५--१५) इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुमशक्यत्वात्, य एव निराकर्ता तस्यैवाऽऽत्मत्वात् ॥

ननु, आत्मा अहंप्रत्ययविषयत्वात्, उपनिषत्स्वेव विज्ञायत इत्यनुपपन्नम् । न, तत्साक्षित्वेन प्रत्युक्तत्वात् । न हि अहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी, सर्वभूतस्थः, समः, एकः, कूटस्थनित्यः, पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्याऽऽत्मा । अतः, स न केनचित् प्रत्याख्यातुं शक्यः, विधिशेषत्वं वा नेतुम् । आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः । सर्वं हि विनश्यद्

विकारजातं पुरुषान्तं विनश्यति ; पुरुषो विनाशहेत्वभावादविनाशी, विक्रियाहेत्वभावाच्च कूटस्थनित्यः, अत एव नित्यशुद्धबुद्धमुक्तस्वभावः। तस्मात्, 'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः'(क. ३-११)। 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ. ३-९-२६) इति चौपनिषदत्व-विशेषणं पुरुषस्य उपनिषत्सु प्राधान्येन प्रकाश्यमानत्वे उपपद्यते। अतो भूतवस्तुपरो वेदभागो नास्तीति वचनं साहसमात्रम् ॥

## भूतवस्तूपदेशोऽत्र पूर्वतन्त्रे इवोपपन्नः

१५. यदपि शास्त्रतात्पर्यविदामनुक्रमणम् 'दृष्टो हि तस्यार्थः कर्मावबोधनम्' (शा. भा. १-१-१) इत्येवमादि, तद्धर्मजिज्ञासा विषयत्वात् विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम्। अपि च 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै. १-२-१) इत्येतदेकान्तेनाभ्युप-गच्छतां भूतोपदेशानर्थक्यप्रसङ्गः। प्रवृत्तिनिवृत्तिविधिव्यतिरेकेण भूतं चेद् वस्तूपदिशति भव्यार्थत्वेन, कूटस्थनित्यं भूतं नोपदिशतीति को हेतुः ? न हि भूतमुपदिश्यमानं क्रिया भवति। अक्रियार्थत्वेऽपि भूतस्य क्रियासाधनत्वात् क्रियार्थ एव भूतोपदेशः – इति चेत्, नैष दोषः ; क्रियार्थत्वेऽपि क्रियानिर्वर्तनशक्तिमद् वस्तु उपदिष्टमेव। क्रियार्थत्वं तु प्रयोजनं तस्य। न चैतावता वस्त्वनुपदिष्टं भवति। यदि नामोपदिष्टं किं तव तेन स्यात् इति ? उच्यते, अनवगतात्म-वस्तूपदेशश्च तथैव भवितुमर्हति। तदवगत्या मिथ्याज्ञानस्य संसार-हेतोर्निवृत्तिः प्रयोजनं क्रियत इत्यविशिष्टम् अर्थवत्त्वं क्रियासाधन-वस्तूपदेशेन ॥

## निवृत्त्युपदेशानामिव ब्रह्मवस्तूपदेशस्यापि सार्थक्यम्

१६. अपि च 'ब्राह्मणो न हन्तव्यः' (?) इति चैवमाद्या निवृत्तिरुपदिश्यते; न च सा क्रिया, नापि क्रियासाधनम्। अक्रियार्थानाम् उपदेशो अनर्थकश्चेत् 'ब्राह्मणो न हन्तव्यः' इत्यादि-निवृत्त्युपदेशानाम् आनर्थक्यं प्राप्तम्। तच्चानिष्टम्। न च स्वभाव-प्राप्तहन्त्यर्थानुरागेण नञः शक्यम् अप्राप्तक्रियार्थत्वं कल्पयितुम् हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण। नञश्चैष स्वभावो यत् स्व-संबन्धिनोऽभावं बोधयतीति। अभावबुद्धिश्चौदासीन्यकारणम्। सा च दग्धेन्धनाग्निवत् स्वयमेव उपशाम्यति। तस्मात्, प्रसक्तक्रिया-निवृत्त्यौदासीन्यमेव 'ब्राह्मणो न हन्तव्यः' इत्यादिषु प्रतिषेधार्थं मन्यामहे, अन्यत्र प्रजापतिव्रतादिभ्यः। तस्मात्, पुरुषार्थानुपयोग्युपा-ख्यानादिभूतार्थवादविषयम् आनर्थक्याभिधानं द्रष्टव्यम्॥

## वस्तुमात्रकथनेऽपि सप्रयोजनत्वं दृष्टम्

१७. यदप्युक्तम् – कर्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्र-मुच्यमानम् अनर्थकं स्यात् 'सप्तद्वीपा वसुमती' इत्यादिवदिति, तत् परिहृतम् 'रज्जुरियं नायं सर्पः' इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात् (इति ?)। ननु श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनात् न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम्। अत्रोच्यते–नावगतब्रह्मात्म-भावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुम्, वेदप्रमाणजनित-ब्रह्मात्मभावविरोधात्। न हि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं

दृष्टमिति तस्यैव वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुम् । न हि धनिनो गृहस्थस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति । न च कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानरहितस्य तदेव कुण्डलित्वाभिमाननिमित्तं सुखं भवति । तदुक्तं श्रुत्या 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छां. ८–१२–१) इति ॥

## जीवतोऽपि विदुषोऽशरीरत्वम्

१८. शरीरे पतिते अशरीरत्वं स्यात्, न जीवतः इति चेत्, न; सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात् । न हि, आत्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम् । नित्यमशरीरत्वम् अकर्मनिमित्तत्वात् इत्यवोचाम । तत्कृत-धर्माधर्मनिमित्तं सशरीरत्वम् इति चेत्, न; शरीरसंबन्धस्यासिद्धत्वात् धर्माधर्मयोरात्मकृतत्वासिद्धेः । शरीरसंबन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य च इतरेतराश्रयत्वप्रसङ्गात्, अन्धपरम्परैषा अनादित्वकल्पना । क्रियासमवायाभावाच्च आत्मनः कर्तृत्वानुपपत्तेः । संनिधानमात्रेण राजप्रभृतीनां दृष्टं कर्तृत्वम् – इति चेत्, न; धनदानाद्युपार्जितभृत्यसंबन्धित्वात् तेषां कर्तृत्वोपपत्तेः । न त्वात्मनो धनदानादिवच्छरीरादिभिः स्वस्वामिसंबन्धनिमित्तं किञ्चिच्छक्यं कल्पयितुम् । मिथ्याभिमानस्तु प्रत्यक्षः संबन्धहेतुः । एतेन यजमानत्वमात्मनो व्याख्यातम् ॥

अत्राहुः – देहादिव्यतिरिक्तस्याऽऽत्मनः आत्मीये देहादौ अभिमानो गौणः, न मिथ्या इति[1] चेत्, (तन्न?) । प्रसिद्ध-वस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः । यस्य हि प्रसिद्धो वस्तुभेदः – यथा केसरादिमान् आकृतिविशेषः अन्वयव्यतिरेकाभ्यां सिंहशब्द-प्रत्ययभाङ्मुख्योऽन्यः प्रसिद्धः ; ततश्चान्यः पुरुषः प्रायिकैः क्रौर्य-शौर्यादिभिः सिंहगुणैः संपन्नः प्रसिद्धः, तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतः, नाप्रसिद्धवस्तुभेदस्य ; तस्य तु अन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतो न गौणौ । यथा मन्दान्धकारे 'स्थाणुरयम्' इति अगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायाम् अकस्मात् 'रजतम्' इति निश्चितौ शब्दप्रत्ययौ, तद्वद् देहादिसङ्घाते 'अहम्' इति निरुपचारेण शब्दप्रत्ययौ आत्मानात्मा-विवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम्? आत्मानात्मविवेकिना-मपि पण्डितानाम्, अजाविपालानामिव अविविक्तौ शब्दप्रत्ययौ भवतः । तस्मात्, देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहं प्रत्ययो मिथ्यैव न गौणः ॥

तस्मात्, मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य, सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम् । तथा च ब्रह्मविद्विषया श्रुतिः 'तद्यथाऽहि-निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते । अथाय-मशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' (बृ. ४–४–७) इति ।

---

1. 'इति' इत्येतावतैव वाक्यसमाप्त्युपपत्तेः, 'चेन्न' इति लेखकप्रमादात् 'तन्न' इत्यस्य स्थाने स्थापितमिति भाति ॥

'सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इव' (?) इति च । स्मृतिरपि च 'स्थितप्रज्ञस्य का भाषा' (गी. २-५४) इत्याद्या स्थितप्रज्ञलक्षणान्याचक्षाणा विदुषः सर्वप्रवृत्त्यसंबन्धं दर्शयति ॥

तस्मात्, नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वम्; यस्य तु यथापूर्वं संसारित्वम्, नासौ अवगतब्रह्मात्मभाव इत्यनवद्यम् ॥

## श्रवणवन्मनननिदिध्यासनयोरपि अवगत्यर्थत्वमेव

१९- यत्पुनरुक्तम् – श्रवणात् पराचीनयोर्मनननिदिध्यासनयोर्दर्शनात् (विधिदर्शनात् ?) विधिशेषत्वं ब्रह्मणो न स्वरूपपर्यवसायित्वम् इति, न; अवगत्यर्थत्वान्मनननिदिध्यासनयोः । यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत, भवेत्तदा विधिशेषत्वम्; न तु तदस्ति । मनननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात् । तस्मात्, न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवतीत्यतः, स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं वेदान्तवाक्यसमन्वयात् – इति सिद्धम् ॥

## ब्रह्मविषयपृथक्शास्त्रारम्भान्यथानुपपत्त्यापि शास्त्रप्रमाणकत्वं ब्रह्मणः

२०. एवं च सति 'अथातो ब्रह्मजिज्ञासा' इति तद्विषयः पृथक् शास्त्रारम्भः उपपद्यते । प्रतिपत्तिविधिपरत्वे हि 'अथातो धर्मजिज्ञासा' इत्येवारब्धत्वात्, न पृथक् शास्त्रमारभ्येत । आरभ्यमाणं च, एवमारभ्येत 'अथातः परिशिष्टधर्मजिज्ञासा' इति; 'अथातः

क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' (जै. ४-१-१) इतिवत् । ब्रह्मात्मैक्यावगतिस्तु अप्रतिज्ञाता – इति तदर्थो युक्तः शास्त्रारम्भः 'अथातो ब्रह्मजिज्ञासा' इति ॥

## ब्रह्मज्ञानानन्तरं सर्वव्यवहाराभावाच्च न विधिशेषत्वं ब्रह्मणः

२१. तस्मात्, 'अहं ब्रह्मास्मि' इत्येतदवसाना एव सर्वे विधयः, सर्वाणि चेतराणि प्रमाणानि । न हि, अहेयानुपादेयाद्वैतात्मावगतौ, निर्विषयाण्यप्रमातृकाणि च प्रमाणानि भवितुमर्हन्ति – इति ॥

अपि चाहुः

गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् ।
सद्ब्रह्मात्माऽहमित्येवं बोधे कार्यं कथं भवेत् ॥ १ ॥
अन्वेष्टव्याऽऽत्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः ।
अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्जितः ॥ २ ॥
देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः ।
लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात् ॥ ३ ॥

इति ॥

इति समन्वयाधिकरणभाष्ये द्वितीयं वर्णकम् ॥

# सूत्रभाष्यार्थतत्त्वविवेचनी

—:○:—

## ध्याननियोगवादिमतम्

### १. प्रतिपत्तिविधिशेषतया शास्त्रप्रमाणकं ब्रह्म

( भाष्यम् )

अत्रापरे प्रत्यवतिष्ठन्ते – यद्यपि शास्त्रप्रमाणकं ब्रह्म, तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते। यथा यूपाहवनीयादीनि, अलौकिकान्यपि विधिशेषतया शास्त्रेण समर्प्यन्ते, तद्वत्। कुत एतत्? प्रवृत्तिनिवृत्तिप्रयोजनत्वात् शास्त्रस्य। तथा हि शास्त्रतात्पर्यविद आहुः – 'दृष्टो हि तस्यार्थः कर्मावबोधनम्'[1] (शा. भा. १–१–१, पा. ६) इति। 'चोदनेति क्रियायाः प्रवर्तकं वचनम्' (शा. भा. १–१–२, पा. १२), 'तस्य ज्ञानम् उपदेशः'[2] (जै. १–१–५, पा. २३), 'तद्भूतानां क्रियार्थेन समाम्नायः'[3] (जै. १–१–२५, पा. ९५), 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्'[4] (जै. १–२–१, पा. १०५)

---

1. 'कर्मावबोधनं नाम' इति मूले ॥ 2. सूत्रभागमात्रमेतत् ॥
3. सूत्रस्य भागोऽयम् ॥ 4. सूत्रस्य भागोऽयम् ॥

इति च । अतः पुरुषं क्वचिद् विषयविशेषे प्रवर्तयत्, कुतश्चिद् विषयविशेषान्निवर्तयच्च अर्थवत् शास्त्रम्; तच्छेषतया च अन्यदुपयुक्तम्। तत्सामान्याद् वेदान्तानामपि तथैवार्थवत्त्वं स्यात् ॥

४९. उत्तरग्रन्थसङ्गतिः — एवं तावद् वेदान्तवाक्यानां वेदवाक्यत्वसामान्यात् विधिसंस्पर्शमन्तरेण प्रामाण्यानुपपत्तेः, ब्रह्मणश्च परिनिष्ठितवस्तुस्वरूपत्वेन प्रमाणान्तरवेद्यत्वप्रसङ्गस्य अवश्यंभावात्, परिनिष्ठिते वस्तुनि विधेरसंभवाच्च न वेदान्तशास्त्रप्रमाणकत्वं ब्रह्मणः— इत्यतो वेदान्तवाक्यानामानर्थक्यं प्राप्नुयात्। तच्चानिष्टं वेदवादिनामिति हेतोः, वेदान्तानां कर्तृदेवतादिप्रकाशकत्वेन क्रियाविधिशेषत्वम्, स्वप्रकरणस्थोपासनाविधिशेषत्वं वा अङ्गीकरणीयम् — इतिवादिनां भाट्टानां मतमनूद्य, वेदान्तवाक्यानां ब्रह्मप्रतिपादकत्वेनैव समन्वयदर्शनात्, तत्त्वमसीति ब्रह्मात्मभावस्य प्रमाणान्तरेणानवगम्यमानत्वात्, एकत्वविज्ञानेनोपमृदितस्य द्वैतविज्ञानस्य पुनरुत्पत्त्यसंभवेनोपासनाविधिशेषत्वानुपपत्तेः, आत्मविज्ञानस्य फलपर्यन्तत्वेन तद्विषयकशास्त्रप्रामाण्यस्याप्रत्याख्येयत्वाच्च, न विधिपरत्वं वेदान्तानां शक्यकल्पनम् — इत्युक्तम् ॥

अथेदानीं ब्रह्मणः शास्त्रप्रमाणकत्वम् अङ्गीकृत्यापि तस्य कर्तव्यविधिशेषत्वमातस्थुषां प्राभाकरानुयायिवेदान्तिनां मतमुद्भाव्य तन्निराकरणपूर्वकं स्वतन्त्रस्यैव ब्रह्मणः शास्त्रप्रमाणकत्वं प्रतिष्ठापयितुं वर्णकान्तरमारभ्यते ॥

५०. **अत्रत्यपूर्वपक्षस्य भाट्टपूर्वपक्षाद्वैलक्षण्यम्** – अत्र प्रथमे वर्णके तावद् वेदान्तानाम् अक्रियार्थत्वात् आनर्थक्य प्रापय्य, तेनाप्रामाण्यमेव स्यात् परिनिष्ठितवस्तुलक्षणब्रह्मप्रतिपादकत्वे वाक्यानाम् इत्याक्षिप्तम् । इह पुनः शास्त्रप्रामाण्यमभ्युपगम्य प्रतिपत्ति-विधिशेषत्वेनैव ब्रह्म प्रतिपाद्यते न तु स्वातन्त्र्येण, वस्तुमात्रकथने शास्त्रस्यानर्थक्यप्रसङ्गात् – इत्याक्षिप्यत इति विशेषः । शास्त्रस्य शास्त्रत्वं क्रियाविधिपरत्वेनैवेति भाट्टमतम्, नियोगपरत्वेनैव तदिति प्राभाकरमतम् – इति कर्ममीमांसकानां परस्परं स्वयूथ्यकलहः ; प्रकृते तु वेदान्तानां परिनिष्ठितवस्तुनि प्रामाण्यं नास्त्येवेत्यतः, कथञ्चिद् विधिपरत्वमभ्युपेयं तेषामिति भाट्टमतावलम्बिनां वेदान्तिनां मतम्, कार्यविधिप्रयुक्ते एव वस्तुनि तेषां प्रामाण्यं न स्वातन्त्र्येण – इति तु प्राभाकरभुजावलम्बिवेदान्तवृत्तिकाराणाम् – इति पूर्वपक्षिप्रस्थानयो-र्भेदः । अत एव हि भाष्यकारः स्वमतं कण्ठरवेणोपसंहरति – ' तस्मात् सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वम् ' इति भाट्टमतनिराकरणेन, ' तस्मात्, न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवतीत्यतः स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकम् ' इति च नियोग-वादिवृत्तिकारमतनिराकरणपूर्वकमिति ॥

५१. **पूर्वपक्षानुवादः** – तदेतदभिसंधाय ध्याननियोगवादि-मतं तावदनुवदति – **' अत्रापरे प्रत्यवतिष्ठन्ते – यद्यपि शास्त्र-प्रमाणकं ब्रह्म, तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते '** इति । प्रतिपत्तिविधिः – उपासनाविधिः । अत्र विधि-

रधिकारिणं प्रतीति नियोग एव विवक्ष्यते । तद्विषयतया - तच्छेषतया इत्यर्थः । उपासने हि विधीयमाने तदर्थमुपास्यरूपमप्यवश्यं वक्तव्यम् । तदिहाधिकारिणं प्रति विधीयमानोपासनाशेषत्वेनैव ब्रह्म समर्प्यत इत्यभिप्रायः । 'विधिविषयप्रतिपत्तिविषयतया' इति व्याख्यानं क्लिष्टकल्पनमित्युपेक्ष्यम् । ब्रह्मप्रतिपत्तिविधानं हि ब्रह्मस्वरूपप्रतिपादनं नान्तरीयकतया समपेक्षते ; तत्प्रतिपादनमन्तरेण तु विधेर्विषय एव न सिद्ध्येदित्यतो ब्रह्मापि प्रतिपत्तिविधेर्विषय एव भवति, संप्रदानकारकादिरिव कर्मविधेरिति यथाव्याख्यातरीत्यैव ब्रह्मणः प्रतिपत्तिविधिविषयतास्वीकारे न कोऽपि विरोधः ॥

ननु ब्रह्म न लोकप्रसिद्धं वस्तु, प्रत्यक्षाद्यविषयत्वात्, तत्कथं शास्त्रेण प्रत्याययिष्यते ? न हि वेदान्तवाक्यमित्येतावता तदुपदिष्टं ब्रह्म सर्वस्याऽऽत्मा इति विज्ञातुं शक्यम् । न च स्वर्गादिवददृष्टमेवैतद् वस्तु, येन वाक्यार्थः श्रद्धामात्रगम्यः स्यात् – इत्याशङ्क्य दृष्टान्तेन परिहारः, **'यथा यूपाहवनीयादीनि, अलौकिकान्यपि विधिशेषतया शास्त्रेण समर्प्यन्ते तद्वत्'** इति । यथा 'यूपे पशुं बध्नाति' ( ? ) इति पशुबन्धनविनियुक्तस्य यूपस्यालौकिकत्वात् 'कोऽसौ यूपः ?' इत्याशङ्कायां 'खादिरो यूपो भवति' ( ? ), 'यूपं तक्षति' ( ? ), 'यूपमष्टा श्रीकरोति' ( ? ) इत्यादिभिर्वाक्यैर्विशिष्टसंस्कारसंस्थानो दारुविशेषोयूपः – इति गम्यते, यथा वा 'आहवनीये जुहोति' ( ? ) इति होमार्थकस्यालौकिकत्वाद् वस्तुनः 'कोऽसावाहवनीयः ?' इत्याकाङ्क्षायां

' वसन्ते ब्राह्मणोऽग्नीनादधीत ' (   ?   ) इत्यादितद्विधिपरैरेव वाक्यैः संस्कृतोऽग्निविशेषोऽसौ – इति गम्यते, तद्वदलौकिकमपि ' ब्रह्म वेद ब्रह्मैव भवति ' (मुं. ३–२–९), ' विज्ञानं ब्रह्म चेद् वेद ' (तै. २–५) – इत्यादिभिः प्रतिपत्तिविधिपरैरेव वाक्यैर्ब्रह्मस्वरूपं समधिगम्यते, वाक्यशेषेण तत्स्वरूपावगमात् इत्यभिप्रायः । न च शङ्कनीयम् – विधिशेषत्वेनापि कथं अलौकिकं वस्तु शास्त्रेण समर्प्यते ? दृष्टान्तेऽपि खलु खादिरदार्वादीनां प्रत्यक्षादिगम्यत्वं सुप्रसिद्धम् । कथं च तेषां शास्त्रमात्रसमधिगम्यत्वमुच्येतेति ? तत्र यूपस्तावत खादिरविकारविशेषत्वेन प्रत्यक्षगम्योऽपि सन् न यूपत्वेन प्रत्यक्षगम्यः, शास्त्रोपदेशमात्रेण तु तथात्वेनाधिगम्यते ; एवम् , आहवनीयोऽपि नाऽऽहवनीयत्वेन प्रमाणान्तरगम्यः, किं तु शास्त्रैकसमधिगम्यः । तदेवं यूपाहवनीयादीनां रूपान्तरेण लोकप्रसिद्धानामपि यथा अलौकिकत्वं शास्त्रैकसमर्प्यत्वं च, एवम् , जीवात्मरूपेण लोकप्रसिद्धस्यापि ब्रह्मणः जिज्ञासोरात्मभूतब्रह्मत्वेन शास्त्रोपदेशमन्तरा न प्रसिद्धिरिति, ' एष म आत्माऽन्तर्हृदय एतद्ब्रह्मैतमितः प्रेत्याभिसम्भवितास्मि' (छां. ३-१४-४) इत्यादिविधिशेषभूतशास्त्रवाक्यैरेव समर्प्यत्वमिति युज्यते । तदेवम् अलौकिकस्यापि ब्रह्मणः शास्त्रप्रमाणकत्वोपपत्तिः–इति भावः ॥

**५२. शास्त्रस्य शास्त्रत्वान्यथानुपपत्त्या विधिशेषत्वं ब्रह्मण अङ्गीकर्तव्यम्** – ननु नियोगोपदेशशेषत्वेनैव किमिति ब्रह्मणः शास्त्रप्रमाणकत्वमभ्युपेयम् ? स्वतन्त्रमेव ब्रह्मात्मवस्तु शास्त्रेण समर्प्यत इति किं न स्यात् ?–इति सिद्धान्तिशङ्कामुत्थापयति–**' कुत एतत् ? '**

इति। तत्र पूर्वपक्षिणः प्रतिवचनम् '**प्रवृत्तिनिवृत्तिपरत्वाच्छास्त्रस्य**' इति। 'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥' ( ? ) इति हि शास्त्रलक्षणविदः। वेदान्तानामपि शास्त्रत्वात्, तथैव प्रयोजनवत्त्वमिति तेषामपि विधिनिष्ठता अभिधीयते इत्यभिप्रायः। विधिः, क्रिया, कार्यम्, नियोगः, धर्मः, अपूर्वम् – इति पर्यायाः। अत्राभियुक्तवचनम् प्रमाणत्वेनोदाहरति – **तथा हि शास्त्रतात्पर्यविद आहुः 'दृष्टो हि तस्यार्थः कर्मावबोधनम्'** (शा. भा. १–१–१) इति। 'वेदमधीत्य स्नायात्' (बो. गृ. ६–१) इत्यध्ययनस्नानयोरव्यवधानाधिगमात्, स्नानमकृत्वा धर्मं जिज्ञासमानो शास्त्रमिदमतिक्रामेत् इति चोदिते **भाष्यकारेणोक्तं** 'अतिक्रमिष्याम इममाम्नायम्, अनतिक्रामन्तो वेदमर्थवन्तं सन्तमनर्थकमवकल्पयेम' (शा. भा. १–१–१, पा. ५) इति। कस्तर्हि वेदस्यार्थः? तत्राऽऽह 'दृष्टो हि तस्यार्थः कर्मावबोधनं नाम' (पा. ६) इति। धर्मजिज्ञासासूत्रार्थविचारावसरे स्थितमिदं भाष्यवचनं नियोगज्ञापकम्। तस्य वेदस्य कर्मावबोधनं कर्तव्यावबोधनम् अर्थ इति दृष्टो हि – इति वाक्यार्थः। कर्मशब्दवाच्यश्च नियोगः साध्यत्वात् प्रवृत्त्यपेक्षः – इत्यतो नियोगावबोधनेनार्थवान् वेदः – इति भावः। तत्रैव चोदनासूत्रस्थं भाष्यवाक्यमुदाहरति– **'चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः'** (शा.भा. १–१–२, पा. १२) इति। 'चोदनालक्षणोऽर्थो धर्मः' (जै. १–१–२) इतिसूत्रे चोदनेत्यनेन शब्देन प्रवर्तकं वचनमुच्यते–इत्यर्थः।

अत्र सूत्रकारसंवादोऽप्यस्तीत्याह – **‘तस्य ज्ञानमुपदेशः’** (जै. १–१–५) इति। इदमत्र पूर्णं सूत्रम् ‘औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्’ इति। शब्दस्यार्थेन नित्यः संबन्धः, न तूत्पन्नयोरुत्तरकालभावी। तस्य धर्मस्य ज्ञाने निमित्तं विधिवाक्यमेव। अव्यतिरेकश्च शब्दोत्थज्ञानस्यार्थे, ज्ञानान्तरे, पुरुषान्तरे वा तस्यानपेक्षत्वात् – इत्यर्थः। अत्र हि धर्मपरत्वं शास्त्रस्येत्यवगम्यते – इति भावः। अथ सूत्रान्तरम् **‘तद्भूतानां क्रियार्थेन समाम्नायः’**(जै.१–१–२५) इति। ‘अर्थस्य तन्निमित्तत्वात्’ इति सूत्रशेषः। तेष्वेव पदार्थेषु भूतानां वर्तमानानां पदानां क्रियार्थेन कार्यवाचिपदेनैव सहोच्चारणं कर्तव्यम्, नार्थान्तरं कल्पयितव्यम् इत्यर्थः। **‘आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्’** (जै. १–२–१) इति च – इत्येतस्यैवार्थस्योपष्टम्भकस्य सूत्रस्योदाहरणम्। ‘तस्मादनित्यमुच्यते’ इति सूत्रशेषः ॥

अनेन शास्त्रतात्पर्यविदां वचनपूगेन किं फलति? – इति प्रश्नस्यापाकरणायैतदेव हृदिस्थं स्पष्टतरमाह – **‘अतः पुरुषं क्वचिद् विषयविशेषे प्रवर्तयत्’** इत्यादिना। यद्यपि वाय्वादिरिव वृक्षादीन् न कञ्चित् पुरुषं बलाद् व्यापारयेच्छास्त्रम्, नापि धनीव स्वभृत्यं स्वेच्छावशवर्तिनं कर्तुमुत्सहेत, शब्दमात्रत्वात्; तथापि वाक्यं शृण्वतः पुरुषस्य रागादिप्रेरितस्य नियोजितस्येव कुत्रचित् प्रवृत्तिः, कुतश्चिन्निवृत्तिर्वा अवश्यं भवेदित्यभिप्रायेणाऽऽह ‘प्रवर्तयन्निवर्तयच्च’ इतीत्यदोषः ॥

५३. भूतवस्तूपदेशः कार्यविधिशेषतया – कथं तर्हि यूपाहवनीयादिभूतवस्तूपदेशः ? न हि तद्वस्तु प्रवृत्तेर्निवृत्तेर्वा विषयः– इत्याशङ्क्याऽऽह '**तच्छेषतया**' इति। प्रवृत्तिनिवृत्त्यन्यतरनियोगशेषतया – इत्यर्थः । नन्वस्त्वेवं विधिकाण्डे, तेन किमायातं ब्रह्मवस्तुबोधकेषु वेदान्तेषु ? – इति चोद्यमाशङ्क्य परिहारमाह '**तत्सामान्याद् वेदान्तानामपि**' इति । तेन कर्मशास्त्रेण सामान्यं शास्त्रत्वम्, तस्मात् इत्यर्थः । वेदान्तानामपि तथैव प्रवर्तकत्वेन निवर्तकत्वेनैव वा अर्थवत्त्वं भवितुमर्हति। तथा च ब्रह्मवस्त्वपि प्रवृत्तिनिवृत्त्यन्यतरविधिशेषतयैवोपयुज्यत इति युक्तमित्यभिप्रायः ॥

# २. मुमुक्षुर्ब्रह्मोपासने नियुज्यते

( भाष्यम् )

**सति च विधिपरत्वे यथा स्वर्गादिकामस्य अग्निहोत्रादिसाधनं विधीयते, एवममृतत्वकामस्य ब्रह्मज्ञानं विधीयत इति युक्तम् । नन्विह जिज्ञास्यवैलक्षण्यमुक्तम् 'कर्मकाण्डे भव्यो धर्मो जिज्ञास्यः, इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यम्' इति । तत्र धर्मज्ञानफलादनुष्ठानापेक्षाद् विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति । नार्हत्येवं भवितुम्; कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात् । 'आत्मा वा अरे द्रष्टव्यः' (बृ. २–४–५) इति। 'य आत्मा अपहतपाप्मा .... सोऽन्वेष्टव्यः**

स विजिज्ञासितव्यः' (छां. ८-७-१), 'आत्मेत्येवोपासीत' (बृ. १-४-७), 'आत्मानमेव लोकमुपासीत' (बृ. १-४-१५), 'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३-२-९) – इत्यादिविधानेषु सत्सु 'कोऽसौ आत्मा ?', 'किं तद् ब्रह्म ?' इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः, नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावः 'विज्ञानमानन्दं ब्रह्म' – इत्येवमादयः । तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यतीति ॥

५४. ज्ञानकाण्डे को नियोगविषयः, नियोज्यश्च ? – ननु नात्र नियोगस्य विषयोऽस्ति, नापि नियोज्यः ; तत्कथं वेदान्तानां विधिपरत्वम् अवसीयताम् ? न च ब्रह्मवस्तु विधिशेषतार्हम्–इत्याशङ्क्य तदेतत्सर्वमत्रापि संपादयिष्यामीत्याह – 'सति च विधिपरत्वे' इति । एवं तावद् वेदान्तशास्त्रस्यापि शास्त्रत्वादेव विधिपरत्वे सिद्धे इहापि नियोगविषयो नियोज्यश्च सिध्यत एवेति भावः । एतदेव स्फुटयति – 'यथा स्वर्गादिकामस्य अग्निहोत्रादिसाधनम्' इत्यादिना । स्वर्गाद्यदृष्टफलप्राप्तिकामो यथा अग्निहोत्रादिसाधनानुष्ठाने नियुज्यते, यथा वा प्रत्यवायपरिहारकामः कलञ्जभक्षणादितो निवर्त्यते, एवम् अमृतत्वलक्षणफलप्राप्तिकामो मर्त्यत्वरूपानिष्टफलकात् कर्मणो निवर्त्यते, ब्रह्माभिन्नप्रत्यगात्मोपासने च नियुज्यते – इति युक्तमुत्प्रेक्षितुम् । तदेवं ब्रह्मोपासनानियोगशेषतया ब्रह्मवस्तूपयुज्यत इति समानम्–इत्यभिप्रायः॥

५५. **ज्ञानकाण्डे जिज्ञास्यस्य ब्रह्मणः कर्मशेषभूतवस्तुसमानयोगक्षेमता**— एवं शास्त्रत्वसामान्याद् ब्रह्मवाक्यानामपि नियोगपरता समाना- इति पूर्वपक्षिणा उपन्यस्ते, सिद्धान्ती जिज्ञासाधिकरणे अध्यवसितं स्वपक्षं स्मारयति- **नन्विति** । तत्र हि (जि. ४-१०, पा.२३) कर्मजिज्ञासानन्तरं ब्रह्मजिज्ञासा कर्तव्या इति पूर्वपक्षं व्युदसितुमुक्तम् **'भव्यश्च धर्मो जिज्ञास्यः न ज्ञानकाले अस्ति पुरुषव्यापारतन्त्रत्वात् ; इह तु भूतं ब्रह्म जिज्ञास्यं नित्यत्वान्न पुरुषव्यापारतन्त्रम्'** इति । तदिह न प्रस्मर्तव्यम् इत्याशयः । अस्त्वेवमपि, ततः प्रकृते किमायातम् ? तत्राह – **'तत्र धर्मज्ञानफलात् अनुष्ठानापेक्षात् विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति'** इति । अनुष्ठेयापेक्षात् फलात् नित्यनिर्वृत्तं ब्रह्मरूपं फलं विलक्षणमिति युक्तम् – इति भावः । यद्यपि तत्र फलवैलक्षण्यमप्युक्तमेव **'अभ्युदयफलं धर्मज्ञानम्, तच्चानुष्ठानापेक्षम् ; निःश्रेयसफलं तु ब्रह्मविज्ञानम्, न चानुष्ठानान्तरापेक्षम्'** (जि. पा. २१) इति । नियोगानवकाशश्च ब्रह्मजिज्ञासायाम् **'या हि चोदना धर्मस्य लक्षणम्, सा स्वविषये नियुञ्जानैव पुरुषम् अवबोधयति । ब्रह्मचोदना तु पुरुषम् अवबोधयत्येव केवलम्, अवबोधस्य चोदनाजन्यत्वात् न पुरुषोऽवबोधे नियुज्यते'** (जि.पा. २३-२४) इति ; तथापि स एव फलभेदः नियोगानवकाशश्च ध्याननियोगवादिनिरासप्रसङ्गेनेह स्थूणानिखननन्यायेन दृढीक्रियत इत्यनवद्यम् ॥

एवं जिज्ञास्यवैलक्षण्यात् फलवैलक्षण्येनापि भवितुं युक्तम् –

इति सिद्धान्तिना शङ्किते, प्रत्याह ध्याननियोगवादी ‘नार्हत्येवं भवितुम्’ इति। कुतः पुनरेतत्? तत्राह – ‘**कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात्**’ इति। अयमाशयः – स्यादपि ब्रह्मज्ञानफलं धर्मज्ञानफलाद् विलक्षणम्, अनुष्ठानानपेक्षत्वात् इति; यदि स्वतन्त्रस्यैव ब्रह्मणो ज्ञानं कस्मैचित् फलाय श्रूयेत; न त्वेतदस्ति। यथैव हि यूपाहवनीयादीनि कार्यविधिशेषतया समर्प्यन्ते कर्मशास्त्रेण, एवमेव ब्रह्मोपासनालक्षणकार्यविधिशेषतयैव ब्रह्म समर्प्यते वेदान्तशास्त्रेण। कार्यार्थमेव च ब्रह्म प्रतिपाद्यते, न तु तत्प्रतिपत्तिमात्रेण किञ्चित् फलं श्रुतमस्ति क्वचिदपि। तस्मात्, श्रुतिविरुद्धं वचनम्, ब्रह्मज्ञानफलं धर्मज्ञानफलविलक्षणमिति। ननु श्रुतिभिः कार्यविधिप्रयुक्तमेव ब्रह्म प्रतिपाद्यत इत्येतदेव कथम्? – इत्याशङ्क्य श्रुतीस्तदर्थत्वेनाभिमता उदाहरति ‘आत्मा वा अरे द्रष्टव्यः’ इत्याद्याः। तत्र (१) ‘**आत्मा वा अरे द्रष्टव्यः**’ (बृ. २–४–५) इति मैत्रेयीब्राह्मणवाक्यम्। तत्र हि आत्मदर्शनं विधीयते, तच्छेषेण चाऽऽत्मस्वरूपं प्रतिपाद्यत इति पूर्वपक्षिणो मतिः। एवं (२) ‘**य आत्मा अपहतपाप्मा**’ इत्यादिना अपहतपाप्मत्वादिगुणकम् आत्मस्वरूपम् ‘**सोऽन्वेष्टव्यः स विजिज्ञासितव्यः**’ (छां. ८–७–१) इति कार्यविधिप्रयुक्तमेव प्रतिपाद्यते छान्दोग्यगतप्रजापतिवाक्ये इति तस्याभिनिवेशः। (३) ‘**आत्मेत्येवोपासीत**’ (बृ. १–४–७) इति कृत्स्नतागुणयुक्तं ब्रह्म आत्मेत्येवोपासितव्यम् इति कार्यविधिप्रयुक्तमेव वाक्यशेषे प्रतिपाद्यत इति पूर्वपक्षिमतम्। तथा ‘आत्मानमेव लोक-

मुपासीत' (बृ. १–४–१५) इत्यप्युपासनाविधिरिति स्पष्टम् इति मन्यते । 'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३–२–९) इत्याथर्वणवाक्ये यद्यपि विधिविभक्तिर्नास्ति, तथापि रात्रिसत्रन्यायेन कल्पनीयो विधिः, केवलवस्तुज्ञानस्य निष्फलत्वात् – इति पूर्वपक्षिण आग्रहः ॥

ननु किं कारणमेवं विधिविभक्त्यभावेऽपि विधिपरत्वमङ्गी-कर्तव्यम्, विधिं विनैव ब्रह्मज्ञानेन परमपुरुषार्थलक्षणं ब्रह्मात्मत्वं प्राप्नोतीति ऋज्वी व्याख्या किमिति नानुस्रीयते? इत्याकाङ्क्षायामाह– 'इत्यादिविधानेषु सत्सु' इति । त्यजेदेकं कुलस्यार्थे – इति न्यायेन बहूनां वाक्यानामनुरोधात् विधिरेवाभ्युपगन्तव्यः । न च विधि-वाक्यान्येव परित्यज्यन्तां भूतवस्तुप्रतिपादनानुरोधेन, तथा च शास्त्र-प्रमाणकत्वं ब्रह्मणः साक्षादेव श्रुत्यर्थ इत्यध्यवसीयेत, न तु प्रतिपत्ति-विधिशेषतया – इति प्रत्युत्थातव्यम् । विधिवाक्यानां साकाङ्क्षत्वात्, तदाकाङ्क्षापरिपूरणार्थं भूतवस्तूपदेशः–इत्यभ्युपगन्तुं युक्तत्वात् । न हि भूतवस्तुवाक्यानां निराकाङ्क्षाणां शेषतया विधिवाक्यानि प्रवृत्तानीति शक्यं कल्पयितुम् – इत्याशयेनाऽऽह 'कोऽसावात्मा, किं तद् ब्रह्म–इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः' इति । के ते वेदान्ता इत्यतस्तान् पठति 'नित्यः सर्वज्ञः सर्वगतः .... विज्ञानमानन्दं ब्रह्म –इत्येवमादयः' इति । अत्र चार्थतः पठिता 'आकाशवत् सर्वगतश्च नित्यः' (?), 'यः सर्वज्ञः सर्ववित्' (मुं. १–१–९), 'अस्यैतदाप्तकाममात्मकाममकामं रूपम्' (बृ. ४–३–२१), 'स पर्यगाच्छुक्रमकायमव्रणम्' (ई. ८), 'विज्ञान-

मानन्दं ब्रह्म रातिर्दातुः परायणम्' (बृ. ३-९-२८) इत्यादयो वेदान्ता यथायोगम् अनुसंधेयाः । यथोदाहृतानि वेदान्तवाक्यानि ब्रह्मोपासनां स्पष्टं विदधति ; सा चोपासना मानसं कर्मैवेति बाह्यकर्मवदेव 'किम् ? केन ? कथम् ? ' इत्याकाङ्क्षात्रयवतीति । तत्र 'कोऽसावात्मा य अन्वेष्टव्यो विजिज्ञासितव्यश्च ?', 'किं तद् ब्रह्म यद् वेदितव्यम् ?', 'कथं वा तदुपासितव्यम् ?' इति विधिश्रवणनान्तरीयकतया आकाङ्क्षा जायेत। तत्पूरणाय 'नित्यत्वादिधर्मवानात्मा, विज्ञानानन्दस्वरूपं ब्रह्म' – इत्युपास्यस्वरूपसमर्पणेन विधिवाक्येनैकार्थ्यतां भजन्ति ब्रह्मस्वरूप-निर्देशकवाक्यानि । संभवति चैवम् एकवाक्यत्वे न वाक्यभेद आश्रयितुं युक्तः । तस्य च ब्रह्मात्मन उपासनां विधिवदनुतिष्ठतः फलमपि श्रूयत एव ब्रह्मप्राप्तिः 'ब्रह्मविदाप्नोति परम्' इति । तदेव च फलं देहपातानन्तरं भवतीति 'एतमितः प्रेत्याभिसंभवितास्मि' (छां. ३-१४-४) इत्यादिश्रुतिप्रामाण्यात् देवयानगतिश्रुतिभ्यश्चावगम्यते । अतस्तत्र मनोरथमात्रमिदं धर्मज्ञानफलादनुष्ठानापेक्षाद् विलक्षणं ब्रह्म-ज्ञानफलं भवितुमर्हतीति – इत्याशयेनोपसंहरति 'तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यति' इति ॥

## ३. वस्तुमात्रकथने वेदानामानर्थक्यम्

( भाष्यम् )

कर्तव्यविध्यननुप्रवेशे, वस्तुमात्रकथने, हानोपा-दानासंभवात् 'सप्तद्वीपा वसुमती', 'राजाऽसौ

गच्छति' इत्यादिवाक्यवद् वेदान्तवाक्यानाम् आनर्थक्य-मेव स्यात् ॥

ननु वस्तुमात्रकथनेऽपि 'रज्जुरियम्, नायं सर्पः' इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टम्, तथा इहापि असंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात्। स्यादेतदेवं यदि – रज्जुस्वरूपश्रवण इव सर्पभ्रान्तिः – संसारित्वभ्रान्तिर्ब्रह्मस्वरूपश्रवणमात्रेण निवर्तेत, न तु निवर्तते। श्रुतब्रह्मणोऽपि यथापूर्वं सुखदुःखादिसंसारिधर्मदर्शनात्, 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २-४-५) इति च श्रवणोत्तर-कालयोर्मनननिदिध्यासनयोर्विधिदर्शनात्। तस्मात्, प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युप-गन्तव्यमिति ॥

५६. वस्तुमात्रकथनं निष्प्रयोजनम् — अथाधुना कार्य-संस्पर्शमन्तरेणैव ब्रह्मज्ञानात् पुरुषार्थप्राप्तिरित्येतदनुभवविरुद्धं श्रुतिविरुद्धं चेति दर्शयिष्यन् पूर्वपक्षी शास्त्रविरोधं तावत् स्फोरयति – '**कर्तव्यविध्यननुप्रवेशे**' इत्यादिना। प्रतिपादितमेव तावच्छास्त्रस्य प्रवृत्तिनिवृत्त्यन्यतरप्रयोजनत्वम्। प्रवृत्तिनिवृत्तिभ्यां हि इष्टप्राप्तिः, अनिष्टनिवृत्तिर्वा फलम्। एवं शास्त्रेणापि प्रवृत्तिनिवृत्ती एवोपदेष्टव्ये अर्थवत्त्वाय, अतो 'वस्तुमात्रकथने हानोपादानासंभवात्,

वेदान्तवाक्यानामानर्थक्यमेव स्यात्', ततश्चाप्रामाण्यमेव प्रसजेत्–इत्यभिप्रायः । वस्तुमात्राभिधायकनिष्प्रयोजनवाक्यद्वयं निदर्शयति 'सप्तद्वीपा वसुमती ', 'राजाऽसौ गच्छति ' इति । न ह्येतादृशवाक्यश्रवणेन श्रोतुः कुत्रचित् प्रवृत्तिः, कुतश्चिन्निवृत्तिर्वा प्रयोजनं भवेत् – इति भावः ॥

५७. **ब्रह्मवस्तुमात्रोपदेशश्रवणज्ञानेनाविद्यानिवृत्तिः स्यादिति शङ्का** – अथेदानीं स्वाभिप्रायं विशदयितुं सिद्धान्तिशङ्कामुत्थापयति – **नन्विति** । अत्र यद्यपि पूर्वपक्ष्युदाहृतलौकिकवाक्ययोरपि यत्किञ्चिद्धासव्यम् उपादेयं वा प्रयोजनं शक्यमेवोत्प्रेक्षितुम् – तद्यथा 'सप्तद्वीपा वसुमती ' इति कथने तावद् भूविस्तारं याथार्थ्येन ज्ञातवतः, अज्ञाननाशनं प्रदेशान्तरदर्शने कौतूहलेन प्रवृत्तिर्वा – इत्यादिप्रयोजनं समस्ति, 'राजाऽसौ गच्छति ' इति कथनेन च चोराणां दण्डभीत्या पलायनम्, अर्थार्थिब्राह्मणादीनां स्वेष्टप्राप्त्यर्थं तदुपसर्पणे प्रवृत्तिश्च – इत्यादिप्रयोजनं समस्त्येव – तथापि सिद्धान्ती क्वचिद् वस्तुमात्रकथने वाक्यस्य सुप्रसिद्धार्थानुवादेनाप्रामाण्यं स्यादपीति मात्रेन अङ्गीकृत्यैव पूर्वपक्षिमतं वस्तुमात्रकथनेऽपि वाक्यस्यार्थवत्त्वं लोकेऽपि दृष्टमेव भ्रान्तिनिरसनलक्षणम्, तद्वदत्रापि भविष्यतीत्यभिप्रायेणाह **'ननु वस्तुमात्रकथनेऽपि '** इत्यादि । उपलक्षणमिदम्, 'शुक्तिरसौ न रजतम् ' इत्यादिना वस्तुमात्रकथनेऽपि 'मिथ्यारजततृष्णाजनितवृथाऽऽयासनिवर्तनेनार्थवत्त्वं दृष्टम्' – इत्याद्यपि द्रष्टव्यम् । स्वसिद्धान्ते दृष्टान्तं सङ्क्रमयति – **'तथेहाप्यसंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्ति-**

निवर्तनेनार्थवत्त्वं स्यात् ' इति। पूर्वपक्षी प्रत्यवतिष्ठते 'स्यादेतदेवम्, यदि रज्जुस्वरूपश्रवण इव सर्पभ्रान्तिः, संसारित्वभ्रान्तिर्ब्रह्म-स्वरूपश्रवणमात्रेण निवर्तेत, न तु निवर्तते ' इति । कथमध्यवसि-तव्यमिदम् ? तत्राह – ' श्रुतब्रह्मणोऽपि यथापूर्वं सुखदुःखादि-संसारिधर्मदर्शनात् ' इति । अतोऽनुभवविरुद्धमिदं रज्जुस्वरूपकथन-साम्यकल्पनं ब्रह्मस्वरूपकथनस्य – इति भावः । शास्त्रविरुद्धं चेदं कल्पनम् इत्याह – " 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. २-४-५) इति च श्रवणोत्तरकालयोर्मनननिदिध्यासनयोर्विधि-दर्शनात् " इति । भवदीयसिद्धान्तरीत्या तु ' तत्त्वमसि ' इति सकृदुक्तमात्रेण, मन्त्रोच्चारणेन विषनिवृत्तिरिव, प्राकृतजनस्यापि संसार-निवृत्तिः प्रसज्येत । तथा च मननाद्युपदेशकं शास्त्रमनवकाशीकृतं स्यात् । अधीतसर्ववेदोऽपि श्वेतकेतुर्महाविदुषा पित्रा बोधितो न शशाक सकृदुपदेशेन संसारित्वभ्रान्तिं दूरीकर्तुम्, किमु वक्तव्यम् अस्मादृशां न शक्येयं भ्रान्तिः सकृच्छ्रवणमात्रेण निरसितुमिति – इति भावः । यदि हि श्रवणमात्रेणैव संसारित्वभ्रान्तिनिवृत्तिरुपपद्येत, ततः प्रमाणभूतो वेदः श्रवणोत्तरमपि मनननिदिध्यासने न विदध्यात् । विदधाति तु ; तेनार्थादिदमवगम्यते यन्नायं शास्त्रोपदेशो रज्जु-स्वरूपश्रावकवाक्यतुल्यः, किं तु कालान्तरसमवाप्यफलम् उपासन-माकाङ्क्षत इति – इत्यभिप्रायः ॥

इदानीं स्वपक्षस्थापनमुपसंहरति – ' तस्मात् प्रतिपत्तिविधि-विषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यम् ' इति ॥

# ४. सिद्धान्तः – कर्मब्रह्मविद्याफलयोर्वैलक्षण्यम्

( भाष्यम् )

अत्राभिधीयते– न, कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात् । शारीरं वाचिकं मानसं च कर्म श्रुतिस्मृतिसिद्धं धर्माख्यम्, यद्विषया जिज्ञासा 'अथातो धर्मजिज्ञासा' (जै. १-१-१) इति सूत्रिता । अधर्मोऽपि हिंसादिः प्रतिषेधचोदनालक्षणत्वात् जिज्ञास्यः परिहाराय । तयोश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिषु स्थावरान्तेषु प्रसिद्धे । मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु सुखतारतम्यमनुश्रूयते ; ततश्च तद्धेतोर्धर्मस्य तारतम्यं गम्यते । धर्मतारतम्यादधिकारितारतम्यम् । प्रसिद्धं चार्थित्वसामर्थ्यादिकृतम् अधिकारितारतम्यम् । तथा च यागाद्यनुष्ठायिनामेव विद्यासमाधिविशेषादुत्तरेण पथा गमनम्, केवलैरिष्टापूर्तदत्तसाधनैः धूमादिक्रमेण दक्षिणेन पथा गमनम्, तत्रापि सुखतारतम्यं तत्साधनतारतम्यं च शास्त्रात् 'यावत्संपातमुषित्वा' (छां. ५-१०-५) इत्यस्माद् गम्यते । तथा मनुष्यादिषु नारकस्थावरान्तेषु सुखलवश्चोदनालक्षणधर्मसाध्य एवेति गम्यते तारतम्येन

वर्तमानः । तथा, ऊर्ध्वगतेष्वधोगतेषु च देहवत्सु दुःखतारतम्यदर्शनात् तद्धेतोरधर्मस्य प्रतिषेधचोदनालक्षणस्य तदनुष्ठायिनां च तारतम्यं गम्यते । एवम्, अविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुखदुःखतारतम्यमनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धम् । तथा च श्रुतिः 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' (छां. ८-१२-१) इति यथावर्णितं संसाररूपमनुवदति । 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छां. ८-१२-१) इति प्रियाप्रियस्पर्शनप्रतिषेधात्, चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते । धर्मकार्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्यते ॥

५८. उत्तरग्रन्थसंबन्धः – एवं तावत् प्राभाकरानुयायिवृत्तिकारेण पूर्वमीमांसान्याय एवानुसृतो वेदान्तव्याख्याने । तत्तु न युक्तम् । 'अथातो ब्रह्मजिज्ञासा' इति पृथक्शास्त्रारम्भवैयर्थ्यप्रसङ्गात् – इत्येतद् विशदीकर्तुं यदेव प्रतिज्ञातं जिज्ञासाधिकरणभाष्ये 'फलजिज्ञास्यभेदाच्च' (जि. १०) इति, तदेवेह विस्तरेण प्रदर्शयितुमारभते – 'अत्राभिधीयते' इति । 'कर्मब्रह्मविद्याफलयोर्वैलक्षण्यात्' इत्युपलक्षणमेतत् जिज्ञास्यवैलक्षण्यस्यापि, फलवैलक्षण्यस्य जिज्ञास्यवैलक्षण्यनान्तरीयकत्वेन तदपि साधयिष्यामीति हार्दो भावः ॥

५९. धर्माधर्मयोर्जिज्ञास्यत्वं पूर्वतन्त्रे – संग्रहवाक्यं विवृण्वन्नाह – ' शारीरं वाचिकं मानसं च कर्म ' इत्यादिना । कर्मब्रह्मविद्याफले विभज्य दिदर्शयिषुः, पूर्वतन्त्रजिज्ञास्यं धर्मस्वरूपं तावदाह – " शारीरं वाचिकं मानसं च कर्म श्रुतिस्मृतिप्रसिद्धं धर्माख्यम्, यद्विषया जिज्ञासा ' अथातो धर्मजिज्ञासा ' (जै. १-१-१) इति सूत्रिता " इति । अत्र मानसमपि कर्म धर्मशब्दार्थान्तर्भूतमेवेति प्रतिपत्तिविधिजिज्ञासापि पूर्वतन्त्रेण गतार्था–इत्याशयेन मानसविशेषणग्रहणम् । स्मृतिरप्यसतिबाधके धर्मविषये प्रमाणमेवेति प्रथमतन्त्रे स्थितम् – ' विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमानम् ' (जै. १–३–३) इति हि वेदविदां सूत्रम् । अतस्तस्या अप्युपसंग्रहार्थमाह – ' श्रुतिस्मृतिप्रसिद्धम् ' इति । तथा ह्याहुर्धर्मतत्त्वविदः – ' वेदोऽखिलं धर्ममूलं स्मृतिशीले च तद्विदाम् ' (मनु. २–६) इति । धर्ममात्रं पूर्वतन्त्रे जिज्ञासाविषयः, न तु ब्रह्मवस्त्वपि – इत्यत्र गमकं तत्रत्यमादिमं सूत्रमुदाहरति " यद्विषया जिज्ञासा ' अथातो धर्मजिज्ञासा ' इति सूत्रिता " इति । ननु प्रतिषिद्धमपि कर्म तत्र जिज्ञासितं लक्ष्यते ; अतः ' कर्मजिज्ञासा ' इत्येव सूत्रयितव्यम् ; कथं धर्ममात्रविषयत्वेन सङ्कोचः कृतः ?–इत्याशङ्क्याह 'अधर्मोऽपि'–इत्यादिना । सूचनात् सूत्रम् । धर्मस्याभ्यर्हितत्वात् तस्यैव स्फुटा प्रतीतिर्यथा स्यात् तथा सूत्रितम् ' अथातो धर्मजिज्ञासा ' इति ' चोदनालक्षणोऽर्थो धर्मः ' (जै. १–१–२) इति च । इमे एव तु सूत्रे आवृत्त्या अधर्मविषयत्वेनापि शक्येते योजयितुम् ' अथातो

अधर्मजिज्ञासा ', 'चोदनालक्षणोऽर्थोऽधर्मः ' इति । तदा तु यथा धर्मो विप्रतिपत्तिस्थानत्वात् विचार्यः, तथा अधर्मोऽपि ; यथा विधिचोदनालक्षणोऽर्थो धर्मो जिज्ञास्यः श्रेयःप्राप्त्यर्थम्, एवम् अधर्मोऽपि हिंसादिप्रतिषेधचोदनार्थो जिज्ञास्य एव अनर्थपरिहाराय – इति सूत्रार्थो भविष्यति । अस्मिन् पक्षे तु चोदनासूत्रगतोऽर्थशब्दः पदार्थवाचकत्वेन ग्राह्यः । तथा च अधर्मस्याप्यवरोधान्न किञ्चिदवद्यं भवतीत्यभिप्रायः ॥

६०. **धर्माधर्मफलतारतम्यप्रपञ्चनम्** – तदेवं धर्माधर्मावेव जिज्ञास्यौ पूर्वतन्त्रे न ब्रह्मवस्तु – इति, प्रतिज्ञासूत्रलक्षणसूत्रे आश्रित्य प्रदर्शितम् । अथेदानीं यत् परमप्रकृतं कर्मब्रह्मविद्याफलयोर्वैलक्षण्यम्, तद्विदर्शयिषुः, धर्माधर्मयोः पूर्वतन्त्रे जिज्ञास्यतया प्रकृतयोः फलतारतम्यं प्रपञ्चयितुमारभते, एकरूपात् ब्रह्मविद्याफलात् कर्मफलवैलक्षण्यं प्रदर्शयिष्यन् – '**तयोश्चोदनालक्षणयोरर्थानर्थयोः फले प्रत्यक्षे सुखदुःखे शरीरवाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिषु स्थावरान्तेषु प्रसिद्धे** ' इति । विधिचोदनालक्षणोऽर्थो धर्मः ; तस्य च शरीरादिभिरनुष्ठीयमानस्य फलं सुखम् । निषेधचोदनालक्षणोऽनर्थोऽधर्मः ; तस्य च शरीरादिभिरनुष्ठितस्य फलं दुःखम् । ते एते सुखदुःखे यैरेव शरीरवाङ्मनोभिरनुष्ठितौ धर्माधर्मौ, तैरेव यथायथम् उपभुज्यमाने प्रत्यक्षे तत्तद्योनिजातेषु प्राणिषु । यदा यदा हीन्द्रियैर्विषयाः संयुज्यन्ते तदा तदा तेन तेन संयोगेन सुखं वा दुःखं वा जायते तत्तत्कर्मानुगुणम् । स एष सुखदुःखानुभवः सर्वप्राणिप्रत्यक्षः । नैवं ब्रह्मज्ञानानन्तरम् अनुष्ठीयमानं कार्यं तत्फलं वा समस्तीति भावः ॥

अथैतयोरेव सुखदुःखयोः, तद्धेतुभूतधर्माधर्मयोश्चानुश्रविकयोस्तारतम्यं सप्रपञ्चं दर्शयिष्यन्नाह – '**मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु**' इत्यादिना । 'स एको मानुष आनन्दः' इत्यारभ्य 'स एको ब्रह्मण आनन्दः' (तै. २–८) इत्यन्तम् उत्तरोत्तरम् उत्कृष्टं सुखम् उपभुज्यत इत्यनुश्रूयते । '**ततश्च तद्धेतोर्धर्मस्य तारतम्यं गम्यते**' । यथैवेह तत्तत्कर्मानुगुणं तत्तत्प्राणिषु सुखदुःखे अनुभूयमाने प्रत्यक्षमुपलभ्येते, तथैव तत्रापि धर्मतारतम्यं श्रूयमाणानन्दानुगुणम् – इति गम्यते इत्यर्थः । धर्मतारतम्यवदधिकारितारतम्यमपि तेनैवानुश्रवणेन गम्यत इत्याह – '**धर्मतारतम्यवत्**' इति । न केवलमर्थापत्तिः, किं तु शास्त्रकारवचनं चास्त्यत्रेत्याह – '**प्रसिद्धं चार्थित्वसामर्थ्यादिकृतमाधिकारितारतम्यम्**' इति । अर्थी समर्थो विद्वानपर्युदस्तोऽधिकारीति हि कर्ममीमांसकाः ॥

यथैव हि सुखतारतम्येनानुश्रूयमाणेन तद्धेतुभूतधर्मतारतम्यं तदनुष्ठानापेक्षादधिकारितारतम्यं च गम्यते, एवमेव कर्मोपासनसमुच्चयानुष्ठायिनाम् उत्तरेण पथा गमनेन, केवलकर्मानुष्ठायिनां दक्षिणेन पथा गमनेन चानुश्रूयमाणेन तत्रापि सुखतारतम्य तत्साधनतारतम्यं च गम्यत इत्याह – '**तथा च यागाद्यनुष्ठायिनामेव**' इत्यादिना '**इत्यस्माद् गम्यते**' इत्यन्तेन । '**यागाद्यनुष्ठायिनामेव विद्यासमाधिविशेषात् उत्तरेण पथा गमनम्**' इति । यागदानतपोरूपकर्मानुष्ठायिनां विद्यासमाधिविशेषात्, उपासनाविशेषेण चित्तस्थिरीकरणवशात्, उत्तरेण पथा ब्रह्मलोकगमनं भवतीत्यर्थः ॥

'केवलैरिष्टापूर्तदत्तसाधनैर्धूमादिक्रमेण, दक्षिणेन पथा गमनम्' इति । 'अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम् । आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ॥ वापीकूपतटागादि देवतायतनानि च । अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥ शरणागतसंत्राणं भूतानां चाप्यहिंसनम् । बहिर्वेदि च यद्दानं दत्तमित्यभिधीयते ॥' ( ? ) इति वर्णितानीष्टादीनि । उत्तरःपन्थाः देवयानाख्यः 'तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान् ॥ मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयत्येष देवयानः पन्था इति' (छां. ५-१० १, २) इत्येवंक्रमाद्ब्रह्मलोकपर्यन्तं विततः । दक्षिणः पन्थास्तु 'अथ य इमे ग्रामे इष्टपूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान् षड् दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति ॥' (छां. ५-१०-३) इति । 'मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति' (छां. ५-१०-४) इति च वर्णितः पितृयाणाख्यः ॥

एवं मनुष्यादारभ्य स्थावरत्वान्तेषु विद्यमानं सुखतारतम्यं दुःखतारतम्यं च, धर्मतारतम्यं तदधिकारितारतम्यं च गमयतीत्याह – 'तथा मनुष्यादिषु नारकस्थावरान्तेषु' इत्यादिना 'तारतम्यं गम्यते' इत्यन्तेन । तदेवं ब्रह्मादिस्थावरान्तेषु प्रत्यक्षेण शास्त्रेण च गम्यमानं सुखदुःखतारतम्यम्, तद्धेतुभूतधर्माधर्मतारतम्यं तत्साधनतदधिकारितारतम्यं च कर्मफले दर्शयति–इति स्थितम् ॥

६१. **कर्मब्रह्मविद्याफलयोर्वैलक्षण्यम्** – अथेदानीं यथोपवर्णिततारतम्ययुक्तकर्मफलविलक्षणं ब्रह्मविद्याफलम् – इत्येतत् प्रदर्शयिष्यन् – द्विविधमपि कर्मफलम् अविद्याकृतं संसारमात्रमेवेत्युपसंहरति – '**एवमविद्यादिदोषवताम् ........ शरीरोपादानपूर्वकं सुखदुःखतारतम्यम् अनित्यं संसाररूपं श्रुतिस्मृतिन्यायप्रसिद्धम्**' इति । ब्रह्मविद्याफलस्य तेन वैलक्षण्यं च प्रतिजानीते '**धर्मकार्यत्वे हि प्रियाप्रियस्पर्शप्रतिषेधो नोपपद्यते**' इत्यन्तेन । एवं यथोपवर्णितरीत्या धर्माधर्मतारतम्यनिमित्तं सुखदुःखतारतम्यं श्रुतिस्मृतिन्यायप्रसिद्धम् । कर्म च शारीरकं वाचिकं मानसं वा भवतीति, तत्फलं च सुखदुःखलक्षणं शरीरवाङ्मनोभिरेवोपभुज्यमानमिति च सुप्रसिद्धम् । ततश्च 'शरीरादिमानहम्' इत्यविद्यया तदुत्थकामेनैव च कर्म क्रियत– इति प्रसिद्धमेव । तदाह '**एवमविद्यादिदोषवताम्**' इति । अविद्यादिदोषवन्तो हि धर्माधर्मौ अनुष्ठाय तत्फलोपभोगार्थं शरीरमुपाददते, संसाररूपं सुखदुःखतारतम्यं च भजन्ते इति 'श्रुतिस्मृतिन्यायप्रसिद्धम्' । श्रुतयस्तावत् 'तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य । प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माँल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे इति नु कामयमानः' (बृ. ४–४–६), 'हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम् । यथा च मरणं प्राप्य आत्मा भवति गौतम ॥ योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः । स्थाणुमन्येऽनुसंयन्ति यथा कर्म यथा श्रुतम् ॥' (का. २–२–६, ७) इत्याद्याः ॥

स्मृतयश्च 'यावत् सञ्जायते किञ्चित् सत्त्वं स्थावरजङ्गमम् । क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥' (गी. १३–२६), 'पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् । कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥' (गी. १३–२१) इत्यादयो ह्यविद्यादूषितान्तःकरणानां कर्मतारतम्यनिमित्तं संसारानुभवं दर्शयन्ति । न्यायः खल्वपि यावदविद्याकामानुवृत्तिः, तावच्छरीरेन्द्रियमनस्सु अहंममभावानुवृत्तिः, तावच्च कर्मफलभोगार्थं शरीरोपादानमनिवारणीयम् ; निवृत्तायाम् अविद्यायां नित्यनिवृत्तकामे निरीहे स्वात्मन्यवस्थानमिति युज्यत इति ॥

**६२. सशरीरत्वमेव संसारित्वम्, अशरीरत्वं तु मोक्षः - इत्यत्र श्रुतिप्रमाणम्** – एवं तावत् कर्मफलम् अनुष्ठानापेक्षम्, अनित्यम्, अविद्यासहभावि च – इत्येतद् प्रतिपाद्य, अथ ब्रह्मविद्याफलस्य तद्विलक्षणत्वं वदन्तीं श्रुतिमुदाजिहीर्षुः, सशरीरत्वमेव यथावर्णितसंसारित्वप्रयोजकमित्यत्र श्रुतिमुदाहरति – '**तथा च श्रुतिः**' इति । तिसृष्वप्यवस्थासु आत्मनो दोषग्रस्तत्वमुपलभ्य निर्दुष्टात्मतत्त्वबुभुत्सया समागतमिन्द्रं प्रति प्रजापतेर्वाक्यमिदम् 'मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्याऽऽत्मनोऽधिष्ठानमात्तो वै सशरीरः प्रियाप्रियाभ्यां न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' (छां. ८–१२–१) इति । यावद्धि 'अहं शरीरम्, शरीरमेवाहम्' इति कार्यकरणसङ्घाते दृढाहिताऽऽत्मभावः, तावत् तथा सशरीरस्य सतः पुरुषस्याविद्याकामकर्मलक्षणमृत्युग्रस्तत्वमपरिहार्यम्, तावच्च प्रियाप्रिययोः बाह्यविषयसंयोगवियोगलक्षणयोः, तत्कृतसुखदुःखयोश्च नैवापहतिरस्ति ।

सन्तते एव ते प्रियाप्रिये तं शरीराभिमानिनं नियमेन व्यथयत इत्यर्थः । सेयं श्रुतिः यथावर्णितं सुखदुःखतारतम्यलक्षणमनित्यं संसारमनुवदति । अस्यास्तात्पर्यं तु, शरीराभिमानाद् व्युत्थितस्य नास्ति संसारित्वम् – इति प्रतिपादने । तदेव हि वाक्यशेषेण स्फुटयति – 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छां. ८–१२–१) इति । तदाह '**प्रियाप्रियस्पर्शनप्रतिषेधात्, चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते**' इति । यत्र शारीरत्वं तत्र सुखदुःखभोगः – इत्यन्वयः प्रदर्शितोऽनुवादवाक्ये ; इह पुनः यत्र शरीराद्यभावः, तत्र सुखदुःखाभावः – इति व्यतिरेकदर्शनम् । अत्राशरीरत्वं व्यवहारदृष्ट्या शरीरस्थस्यापीति बोद्धव्यम् । तथा हि श्रुत्यन्तरम् 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥' (का. २–२२) इति । **स्मृतिश्च** 'अनादित्वान्निर्गुणत्वात् परमात्माऽयमव्ययः । शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥' (गी. १३–३१) इति । एतदुक्तं भवति । यथा अज्ञस्य जीवभावेनात्मा शरीरस्थः, तथा न भवति विद्याप्राप्तपरमात्मभावेन । विशेषो हि भवति विद्याविद्ययोः । स चाविद्याकल्पितः शरीरादिसहभावः, सुखदुःखभोगो वा विद्यापास्ताविद्ये विदुषि चिन्तयितुमपि न शक्यत इति ॥

ननु चाशरीरस्यापि सुखभोगः स्यादेव 'आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति' (तै. २–९) इत्यादिश्रुतिप्रामाण्यात् – इति चेत्, न, विषयसुखभोगो हि प्रियाख्यः शरीराभिमानरहितस्याद्विती-

यात्मभावमापन्नस्य न कथमपि शक्यशङ्क इत्याशयेन हीदमुच्यते 'न प्रियाप्रिये स्पृशतः' इति । नित्यवर्तमानरूपम् अशरीरत्वम् इत्यभिप्रायेण च 'सन्तम्' इति वर्तमानवाचिकृदन्तोपादानम् । न चैवमशरीरस्यापि सुखसंस्पर्शः स्यादेव विद्याकृतः – इति शङ्क्यम् ; 'प्रियाप्रिये न स्पृशतः' इति वाक्यशेषात् । इष्टदर्शनजं सुखं हि प्रियं नाम । तदस्य प्रतिषिध्यते इत्यतो धर्मकार्यस्य सुखस्य विदुषि न प्राप्तिः । 'आनन्दं ब्रह्मणो विद्वान्' इत्यनुज्ञातस्तु न धर्मानुष्ठानजन्यः, किं तर्हि ब्रह्मात्मभूतस्य विदुषः स्वभाव एव ; 'आनन्दो ब्रह्मेति व्यजानात्' (तै. ३–६) इति श्रुतेः, अशरीरत्वमेव मोक्षो नाम विद्याफलम् – इति धर्माधर्मकार्यभूतप्रियाप्रियसंस्पर्शाभावस्तस्य स्वतःसिद्ध इत्यभिप्रायेण भाष्ये 'मोक्षाख्यस्य', 'अशरीरत्वस्य' इति च विशेषणद्वयमुपात्तम् 'इति प्रियाप्रियस्पर्शनप्रतिषेधात्, चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते' इति ॥

नन्वस्तु नाम प्रियाप्रिययोः प्रतिषेधः, तावता धर्मकार्यं न भवति मोक्षः – इति कथं गम्यते ? इत्यत आह 'धर्मकार्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्यत' इति । धर्माधर्मनिमित्तेन हि तत्फलोपभोगाय शरीरम् उपादीयते । सशरीरस्य च प्रियाप्रिययोर्नापहतिरस्ति – इत्यतस्तयोः धर्माधर्मकार्यत्वम् । अतोऽशरीरत्वं धर्मकार्यत्वं च परस्परविरुद्धत्वात् तयोर्न युगपदेकत्र स्थितिः संभवति । तस्मात्, मोक्षस्य चोदनालक्षणधर्माकार्यत्वं प्रियाप्रियस्पर्शनप्रतिषेधादेव गम्यत इत्यभिप्रायः ॥

# ५. मोक्षाख्यस्याशरीरत्वस्य स्वाभाविकत्वम्

( भाष्यम् )

अशरीरत्वमेव धर्मकार्यम् – इति चेत्, न ; तस्य स्वाभाविकत्वात्। 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥' (का. २–२२) 'अप्राणो ह्यमनाः शुभ्रः' (मु. २–१–२), 'असङ्गो ह्ययं पुरुषः' (बृ. ४–३–१५) इत्यादिश्रुतिभ्यः। अत एवानुष्ठेयकर्मफलविलक्षणं मोक्षाख्यम् अशरीरत्वं नित्यमिति सिद्धम् ॥

६३. **अशरीरत्वं न कार्यम्** – यथोक्तम् अशरीरात्मतायाः सतत्त्वम् अजानानः शङ्कते –'अशरीरत्वमेव धर्मकार्यम्' इति। अयं भावः – अशरीरस्यैव हि प्रियाप्रियस्पर्शनप्रतिषेधः श्रूयते, न शरीरिणः। अतो लब्धाशरीरत्वस्य कामं भवतु प्रियाप्रियस्पर्शनाभावः, अशरीरत्वलाभस्तु केनचिद् धर्मेणैवानुष्ठितेन भवेत्। न हि लोके विद्यते तादृशो जनो यः शरीररहित एव स्याद् विनैव साधनम्। तस्मात् धर्मानुष्ठानानन्तरमेव शास्त्रदृष्टोऽशरीराख्यो मोक्षो भवेत्, यस्मिन् सति प्रियाप्रियसंस्पर्शाभावः सेत्स्यतीत्यकामेनापि भवता अङ्गीकार्यम्। तस्मात्, असदेवैतद् गीयते धर्मफलविलक्षणं ब्रह्मविद्याफलमिति – इति ॥

तदेतत् स्वाशयोद्घाटनेन सिद्धान्ती प्रत्याचष्टे – ' न, तस्य स्वाभाविकत्वात् ' इति । ननु तस्य स्वाभाविकत्वं केन प्रमाणेनावगम्यते ? दृष्टमेव तु सर्वस्यापि सशरीरत्वम् – इत्याशङ्कयाऽऽह " 'अशरीरं शरीरेषु' ........ इत्यादिश्रुतिभ्यः " इति । अयमाशयः – श्रुतिप्रमाणविरुद्धेयं सशरीरत्वभावना ; अशरीरत्वमेव सर्वस्य जीवस्य स्वभाव इति ह्युद्घोषयन्ति श्रुतयः – इति । अत्र ' अशरीरम् ' इत्याऽऽत्मनोऽशरीरत्वस्याव्यभिचरितचिद्रूपत्वम् , 'अनवस्थेषु' इति शरीराणां व्यभिचरितत्वं चाऽऽचष्टे । ' अप्राणो ह्यमनाः ' इति चाऽऽत्मनः सूक्ष्मशरीरसंबन्धं निषेधति । ' असङ्गो ह्ययं पुरुषः ' इति सशरीरत्वविकल्पनाकालेऽपि तत्संसर्गराहित्यमाह – इति विवेकः । ननु श्रुत्यापि प्रत्यक्षादिप्रमाणविरुद्धोऽर्थः कथं प्रत्याय्यते ? न हि सर्वलोकसिद्धं सशरीरत्वं वचनमात्रेण प्रतिषेद्धुं शक्यम् । अत्र ब्रूमहे – स्मर्यतां यद् भाष्यकारेणोक्तम् अध्यासभाष्ये – ' न हीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति । न चाधिष्ठानमन्तरेण इन्द्रियाणां व्यवहारः संभवति । न चानध्यस्तात्मभावेन देहेन कश्चिद् व्याप्रियते । न चैतस्मिन् सर्वस्मिन्नसति असङ्गस्याऽऽत्मनः प्रमातृत्वमुपपद्यते । न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति । तस्मात् , अविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि ' (सु. ५, पा. ५१–५२) इति खलु सर्वेषां प्रमाणप्रमेयव्यवहाराणाम् अविद्यापुरःसरत्वं स्पष्टीकृतं तत्र भाष्यकारेण । तथा च व्याख्यातमस्माभिरपि । ततश्च, सशरीरत्वं नामाध्यस्तात्मभावेन देहेन व्याप्रियमाणत्वम् इति सिध्यति । तस्मात् , विद्यावतो दृष्ट्या अशरीरत्वं स्वभाव एव, न तस्य कार्यत्वं समस्ति–इत्युक्तिर्न विरुध्यते ।

तदेवम् अशरीरत्वस्य स्वाभाविकत्वात्, तस्यैव च मोक्षत्वात्, धर्मकार्याद् वैलक्षण्यं सिध्यतीत्याह – '**अत एवानुष्ठेयकर्मफलविलक्षणं मोक्षाख्यमशरीरत्वम्–इति सिद्धम्**' इति ॥

( भाष्यम् )

**तत्र किञ्चित् परिणामिनित्यम्, यस्मिन् विक्रियमाणेऽपि 'तदेवेदम्' इति बुद्धिर्न विहन्यते। यथा पृथिव्यादि जगन्नित्यत्ववादिनाम्। यथा च साङ्ख्यानां गुणाः। इदं तु पारमार्थिकं कूटस्थनित्यम्, व्योमवत् सर्वव्यापि, सर्वविक्रियारहितम्, नित्यतृप्तम्, निरवयवम्, स्वयञ्ज्योतिःस्वभावम्। यत्र धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तेते। तदेतदशरीरत्वं मोक्षाख्यम्, 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च' (का॰ २–१४) इत्यादिश्रुतिभ्यः। अतस्तद् ब्रह्म यस्येयं जिज्ञासा प्रस्तुता। तद्यदि कर्तव्यशेषत्वेनोपदिश्येत, तेन च कर्तव्येन साध्यश्चेन्मोक्षो अभ्युपगम्येत अनित्य एव स्यात्। तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेषु अनित्येषु कश्चिदतिशयो मोक्षः–इति प्रसज्येत। नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यते। अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः॥**

६४. अशरीरत्वं कूटस्थनित्यम् – तदेवम् अशरीरत्वं नित्यं स्वाभाविकत्वात् इति स्थितम् । ततश्च न कर्मकार्यं तत – इति सिद्धान्तितम् । भवतु श्रुतिप्रामाण्यादशरीरत्वस्य सत्यत्वमपि । तथापि तस्य कर्मकार्यत्वं किं न स्यात् ? उपासनालक्षणमानसकर्मकार्यस्यापि ब्रह्मप्राप्तेर्नित्यत्वश्रवणात्–इत्याशङ्क्येत, तन्मा शङ्कीति मोक्षनित्यत्वस्य परिष्कृतं लक्षणं विवक्षुराह – "तत्र किञ्चित् परिणामिनित्यम्, यस्मिन् विक्रियमाणेऽपि 'तदेवेदम्' इति बुद्धिर्न विहन्यते" इति । तत्र दृष्टान्तद्वयम् – 'यथा पृथिव्यादि, जगन्नित्यत्ववादिनाम् । यथा च साङ्ख्यानां गुणाः' इति । जगन्नित्यत्ववादिमते हि पृथिव्यादि विक्रियमाणत्वेन दृष्टमपि स्वरूपनाशं न भजते ; एवं 'चलं गुणवृत्तम्' इत्यभ्युपयन्तोऽपि साङ्ख्याः प्रवदन्ति गुणत्रयं नित्यमेवेति ; तत्र 'सैवेयं पृथिवी' 'त एवैते गुणाः' – इति च प्रत्यभिज्ञानुवृत्तेः । तथा अशरीरत्वमपि परिणामिनित्य स्यात् – इतिशङ्काव्यावृत्तये प्राह 'इदं तु पारमार्थिकं कूटस्थनित्यम्' इत्यादिना । इदमत्र रहस्यम्–कार्यस्यापि नित्यत्वं समस्तीति व्याहतं वचः । उपासनाकार्यस्य तु क्वचित् श्रूयमाणं नित्यत्वम् औपचारिकम् ; 'इमं मानवमावर्तं नावर्तन्ते' (छां. ४–१५–५) 'तेषामिह न पुनरावृत्तिरस्ति' (बृ. मा. ६–१–१८) इत्यन्यत्र 'इमं मानवम्', 'इह' इति च विशेषणादानेन ब्रह्मलोकं गतानामपि तत्तत्कल्पे अनावृत्तिः, कल्पान्तरे चावृत्तिरिति हि गम्यते । तत्र गौणमुख्ययोरविवेकादेव पूर्वपक्षी नित्यस्यापि कार्यत्वमस्तीति भ्रान्तः – इत्येतत् स्फुटयितुं परिणामिनित्यात् कूटस्थनित्यम् अशरीरत्वं विविच्य

वक्ति 'इदं तु पारमार्थिकं कूटस्थनित्यम्' इति । परिणामिनित्ये हि नित्यत्वव्यपदेशो गौण्यैव वृत्त्या, वस्तुतस्तु तदपि न पारमार्थिकं नित्यम्; 'वाचारम्भणं विकारो नामधेयम्' (छां. ६–१–४) इति श्रुतेः – इति भावेन कूटस्थनित्यस्य विशेषणम् 'पारमार्थिकम्' इति । यद्यपि 'आकाशवत् सर्वगतश्च नित्यः' ( ? ) इत्याकाशस्यापि नित्यत्वं श्रुतम्, सर्वव्यापित्वं च, तथापि तदपि नित्यत्वं सर्वव्यापित्वं च गौणमेव, आकाशस्यापि ब्रह्मविकारत्वादेव । 'व्योमवत् सर्वव्यापि' इति तु परिस्पन्दरहितम् इत्यंशे; तदाह 'सर्वविक्रियारहितम्' इति । 'न जायते म्रियते वा' (का. २–१८) इतिश्रुतेर्जनिलक्षणापि विक्रिया अस्य नास्त्येवेति भावः । 'नित्यतृप्तम्' नित्यम् आप्तकाममिति नात्र काचित् क्रिया संभवतीति भावः । 'निरवयवम्', 'निष्कलं निष्क्रियं शान्तम्' (श्वे. ६–१९) इति श्रुतेः । अत एव तस्य विकार्यत्वाभावेन न क्रियासाध्यत्वम् – इत्याशयः । 'स्वयञ्ज्योतिःस्वभावम्', 'हृद्यन्तर्ज्योतिः' (बृ. ४–३–७), 'आत्मनैवायं ज्योतिषा आस्ते ....' (बृ. ४–३–२) इत्यादिश्रुतिभ्यः । तेन स्वाभिव्यक्त्यर्थमपि न किञ्चित् क्रियासाध्यत्वमस्येति भावः ॥

ननु कुत एतदवसितम्, अशरीरत्वं यथोदितविशेषणविशिष्टमिति ? ब्रह्मात्मनः खलु भवदुदीरितं विशेषणजातं विज्ञायते श्रुतिस्मृतिभ्यः – इति चेत्, नैतच्चोद्यमवतरति; अशरीरत्वस्य ब्रह्मात्मस्वभावत्वात् । स्वाभाविकम् अशरीरत्वम्, न कार्यनिष्पाद्यम् इति प्रतिज्ञातस्योपपादनार्थमेव हि विशेषणजातमिदमनुक्रान्तम्; अतो न दोषः ॥

अत्र केचिद् व्याचक्षते – क्रियानिष्पाद्यत्वप्राप्यत्वविकार्यत्वसंस्कार्यत्वलक्षणरूपचतुष्टयापाकरणार्थमिदं विविधविशेषणादानम् इति । यद्यपि ब्रह्मात्मनि तादृग्रूपविलक्षणत्वोपपादनं युक्तमेव, तथाप्यत्र ब्रह्मात्मनः परिणामिनित्यत्ववारणायैव प्रवृत्तत्वात् तथैवेमानि विशेषणानि नेतव्यानीत्यस्मन्मतिः । उत्पाद्यादिचतुर्विधद्रव्यविलक्षणत्वं तु ब्रह्मणोऽनुपदमेव भाष्ये कण्ठरवेण हिरुक् प्रदर्श्यत इति तत्रैवेदृशः पराक्रमः स्थाने इति नेत्यास्तां तावत् ॥

६५. **कर्मब्रह्मविद्याफलवैलक्षण्योपसंहारः** – अशरीरत्वलक्षणं निःश्रेयसं कूटस्थनित्यं ब्रह्मात्मस्वभावानतिरिक्तम् इत्युक्तम् । ततः किं फलति ? तत्राऽऽह " **यत्र धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तेते, तदेतदशरीरत्वं मोक्षाख्यम् 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् । अन्यत्र भूताच्च भव्याच्च ' (का. २–१४) इत्यादिश्रुतिभ्यः** " इति । परिणामिनित्यत्वेन अङ्गीक्रियमाणे अविद्याप्रत्युपस्थापितकार्यकारणवति कर्त्रात्मनि हि धर्माधर्मौ सकार्यौ स्याताम्, अत्र तु ब्रह्मात्मस्वभावे मोक्षे अशरीरत्वाभिन्नत्वेन शास्त्रसिद्धे सह कार्येण तौ नोपावर्तेते, यतः कालत्रयं च तस्मिन्नोपावर्तते – इति योजना । यत्रैव कालत्रयमुपावर्तते, तत्रैव कार्यकारणभावेन धर्माधर्मौ भवेतां तत्फलं चादृष्टम्–इदानीं धर्मः अधर्मो वा अनुष्ठीयते, भविष्यत्काले अदृष्टं तत्फलं भोक्ष्यते – इति हि धर्माधर्मतत्कार्यसंबन्धः स्वीक्रियते कर्तव्यविधिवादिभिः । इदं तु मोक्षाख्यमशरीरत्वं सर्वथा तद्विलक्षणम् । कथम् ? 'अन्यत्र धर्मादन्य-

त्राधर्मात्' इत्यादिश्रुतिभ्यः। नचिकेतसः प्रश्नोऽयं मृत्युं प्रति। धर्माधर्मसंबन्धविधुरम्, कार्यकारणसंबन्धवर्जितम्, कालत्रयसंस्पर्शरहितं च यत् सर्वव्यवहारातीतं वस्तु त्वं जानासि, तन्मह्यं वद—इति प्रश्नवाक्यार्थः। यद्यपि परमार्थब्रह्मात्मवस्तुस्वरूपमेव तत्र नचिकेतसा पृष्टम्, तथापि यथोक्तनीत्या तत्स्वभावमेव मोक्षाख्यम् अशरीरत्वम् इति ब्रह्मविद्याफलमपि कर्मफलविलक्षणं तत्र पृष्टमेव भवतीति श्रुत्युदाहरणमत्र सङ्गच्छत इति बोध्यम्॥

तदेवं कर्मफलम् अविद्यादिमतां शरीरोपादानपूर्वकं सुखदुःखोपभोगः संसारः, ब्रह्मविद्याफलं तु ब्रह्मात्मस्वभावानतिरिक्तं कूटस्थनित्यं धर्माधर्मादिसंस्पर्शविधुरम् अविद्यानिवृत्तिमात्रेण प्राप्यम् – इति स्थितम्॥

६६. **काण्डयोर्जिज्ञास्यवैलक्षण्यमपि निराबाधम्** – तदेवं कर्मब्रह्मविद्याफलयोरभ्युदयाशरीरत्वयोः साध्यत्वेन नित्यसिद्धत्वेन च वैलक्षण्यं प्रदर्शितम्। एतेन यत् प्रागुक्तम् – कर्मकाण्डे भव्यो धर्मो जिज्ञास्यः; इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यम् (जि. खं. १०, पा. २३) इति, तदपि तथैव निराबाधं तिष्ठति; अशरीरत्वं मोक्षाख्यं कूटस्थनित्यमात्मस्वभाव एवेति दर्शितत्वात्। तदेव हि ब्रह्म कूटस्थनित्यम् इह जिज्ञास्यम्, न तु कार्यविधिशेषभूतं यथाह वृत्तिकारः—इति। तदाह '**अतस्तद् ब्रह्म यस्येयं जिज्ञासा प्रस्तुता**' इति। यदि हि कार्यविधिप्रयुक्तमेव प्रतिपिपादयिषितमभविष्यत, तर्हि 'अथातो ब्रह्मजिज्ञासा' इति जिज्ञासा न प्रास्तोष्यत; प्रास्तावि तु। अतोऽवगम्यते ब्रह्म स्वतन्त्रमेवेह विजिज्ञासितव्यम् इति—इत्यभिप्रायः॥

**६७. कार्यविधिवादिमते दोषः** – ननूपपादितमेतदस्माभिः, 'आत्मा वा अरे द्रष्टव्यः' इत्यादिकार्यविधानेषु सत्सु, उपास्यब्रह्मात्मस्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ता इति । तत्किमित्युपेक्ष्यते ? तत्राऽऽह – '**तद् यदि कर्तव्यशेषत्वेनोपदिश्येत, तेन च कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत, अनित्य एव स्यात्**' इति । अयमर्थः – भवता खलु प्रस्तुता नित्यनिर्वृत्तब्रह्मजिज्ञासा हीयते, अप्रस्तुतश्च कर्तव्यविधिः प्रक्रियते–इत्येको दोषः । अनेन च कर्तव्येन मोक्षोऽदृष्टो लप्स्यते इत्यभ्युपगम्यते, तथा च संयोगा विप्रयोगान्ताः– इतिन्यायेन प्राप्यस्य मोक्षस्य विप्रयोगोऽवश्यं भवितेति मोक्षस्यानित्यताप्रसञ्जनमपरो दोषः प्रादुःष्यात् इत्यभिप्रायः । भवत्वेवमपि, चिरकालस्थायित्वमेव नित्यत्वं मोक्षस्य स्यादित्याशङ्क्याऽऽह– '**तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयो मोक्ष इति प्रसज्येत**' इति । नन्वभ्युपगतमेतदपि । आपेक्षिकनित्यत्वमेव भवतु मोक्षस्यापीति वैयात्याद् ब्रुवाणं प्रत्याह – '**नित्यश्च मोक्षः सर्वैः मोक्षवादिभिरभ्युपगम्यते**' इति । यद्यपि 'आभूतसंप्लवं स्थानममृतत्वं हि[1] भाष्यते' (वि. पु. २-८-९७) इतिवचनात् ब्रह्मलोकप्राप्तेरपि कथञ्चिन्मोक्षत्वमुपपाद्येत, तथापि न स मुख्यो मोक्षः स्यात् । मुख्यवृत्त्यैव तु नित्यो मोक्षो ज्ञानफलमिति सर्वैर्मोक्षवादिभिरभ्युपगम्यते । अतो न कर्मसाध्यो मोक्षः । अतो नायं वेदान्तार्थ इत्यभिप्रायः ॥

**६८. फलजिज्ञास्यवैलक्षण्यचिन्तोपसंहारः** – तदेवम् कर्मब्रह्मविद्याफलयोः साध्यत्वेन नित्यसिद्धत्वेन च परस्परवैलक्षण्यात्,

1. 'विभाव्यते' इति मुद्रितपुस्तके ॥

जिज्ञास्ययोर्धर्मब्रह्मणोर्भव्यत्वेन भूतत्वेन वैलक्षण्याच्च यदुक्तं पूर्वपक्षिणा कार्यविधिप्रयुक्तस्यैव ब्रह्मण इहोपदेशः, प्रतिपत्तिविधिशेषत्वेन च शास्त्रप्रमाणकत्वं ब्रह्मणः इति, तच्छास्त्रयुक्तिविरुद्धमिति सिद्धमित्युपसंहरति '**अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः**' इति ॥

## ६. विद्यानन्तरमेव मोक्षः, न स कार्यान्तरापेक्षः

( भाष्यम् )

अपि च 'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३–२–९), 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' (मुं. २–२–८), 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' (तै. २–९), 'अभयं वै जनक प्राप्तोऽसि' (बृ. ४–२–४), 'तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्' (बृ. १–४–१०), 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ई. ७) इत्येवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति । 'तथा तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च' (बृ. १–४–१०) इति ब्रह्मदर्शनसर्वात्मभावयोर्मध्ये कर्तव्यान्तरवारणायोदाहार्यम् । यथा तिष्ठन् गायतीति तिष्ठतिगायत्योर्मध्ये तत्कर्तृकं कार्यान्तरं नास्तीति गम्यते ॥

६९. **ज्ञानानन्तरमेव मोक्षं दर्शयन्त्यः श्रुतयः** – अशरीरत्वलक्षणस्य मोक्षस्य कूटस्थनित्यत्वान्न कार्यत्वम् – इत्युक्तम् । तेन, यदुक्तं कार्यविधिवादिना ब्रह्मोपासनादेव शास्त्रदृष्टोऽदृष्टो मोक्षो भविष्यतीति, तदपहस्तितं भवति । अथेदानीं मोक्षस्य कार्यत्वाभ्युपगमो न केवलं युक्तिविरुद्धः, किं तर्हि, श्रुतिविरुद्धोऽपीति दर्शयिष्यन्नाह – **अपि चेत्यादिना** । यदि हि ब्रह्मज्ञानादूर्ध्वं शास्त्रविहितक्रियानुष्ठानेन लभ्यो मोक्षः – इति श्रुत्यर्थोऽभविष्यत्, तर्हि ज्ञानोत्पत्तिनान्तरीयकत्वेन मोक्षं नावक्ष्यन् श्रुतयः ; सन्ति च नैकाः श्रुतयो ब्रह्मविद्यासमनन्तरमेव मोक्षं दर्शयन्त्यः । अतः श्रुतिविरुद्धोऽप्ययं कार्यविधिवादः – इत्यभिप्रायः । ता एव श्रुतीः कतिचन समुदाहरति '**ब्रह्म वेद ब्रह्मैव** भवति ' (मुं. ३–२–९) इत्याद्याः । तत्र 'ब्रह्म वेद' इत्याथर्वणी श्रुतिर्ब्रह्मविद्याजन्ममात्रेण ब्रह्म भवतीत्याह, न तु कार्यान्तरापेक्षया भवतीति । तत्प्राप्तये विद्योत्पत्त्यनन्तरं न किञ्चित् कार्यान्तरमनुष्ठेयं विधत्ते । कार्यान्तरावशेषाभावश्च वाक्यशेषादवगम्यते, 'तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति' इति पाप्माख्यधर्माधर्मतरणस्यापि विद्याफलत्वेन श्रवणात् । अस्त्येव चान्यो मन्त्रो ब्रह्मज्ञानानन्तरमेव सर्वकर्मणां क्षयं स्फुटमेव दर्शयन्नितीत्याह '**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे**' (मुं. २–२–८) इति । परावरे कार्यकारणोभयरूपेणावस्थिते तस्मिन् ब्रह्मणि दृष्टे साक्षादयमहमस्मीति विज्ञाते अविद्याकामकर्माणि क्षीयन्ते –इति तदर्थः । ' भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ' इति

मन्त्रपूर्वार्धे कर्महेतुभूताविद्याकामयोरपि विनिवृत्तेरुक्तत्वात् । '**आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन**' (तै. २–९) इति तैत्तिरीयकं वाक्यम् । अत्र वाङ्मनसयोरगोचरस्य ब्रह्मानन्दस्य वेदनमात्रेण भयहेतु-निवारणं भवतीत्युच्यते। न च वाङ्मनसागोचरस्योपास्यत्वं शक्यकल्पनमिति स्पष्टमेव । अतोऽत्रापि ब्रह्मविद्यामोक्षप्राप्त्योर्मध्ये कार्यान्तरं वार्यत इति गम्यते । '**अभयं वै जनक प्राप्तोऽसि**' (बृ. ४-२-४) इति जनकं प्रति याज्ञवल्क्यवचनम् । 'इन्धो ह वै नामैषः' (बृ. ४–२–२) इत्यारभ्य जाग्रत्स्वप्नसुषुप्तपुरुषरूपाण्यतीत्य 'स एष नेतिनेत्यात्मा' (बृ. ४–२–४) इति निरुपाधिकात्मानमावेद्य जनकं प्राह मुनिः 'हे जनक, संसारभयशून्यब्रह्मात्मतां प्राप्तोऽसि' इति । न तु कार्यान्तरानुष्ठानेन मोक्षं प्राप्स्यसीति । 'तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्व-मभवत्' (बृ. १–४–१०) इत्यपि बृहदारण्यकवाक्यम् । अत्र हि 'तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते, किमु तद्ब्रह्मा-वेद्यस्मात्तत्सर्वमभवत्' (बृ. १–४–९) इति पूर्वकण्डिकायाम्, 'ब्रह्म-विद्यायाश्चेत् सर्वभावः फलम्, तद् ब्रह्म किमु विदित्वा सर्वमभवत्? न हि ब्रह्मणोऽन्यद् ब्रह्मान्तरं विद्यते यद् विदित्वा सर्वमभवद् ब्रह्म–इत्युच्येतापि' इति चोदिते प्रतिवचनमाह – 'ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदहं ब्रह्मास्मीति, तस्मात्तत्सर्वमभवत्' (बृ. १–४–१०) इति । इदं शरीरस्थं यद् गृह्यते जीवाख्यं द्रष्टृ, श्रोतृ, मन्तृ–इत्यादिविशेषविज्ञानवदिव, तदिदं प्राक् प्रतिबोधादपि ब्रह्मैवासीत् सर्वात्मकम्, तद् ब्रह्म आत्मनमेवावेद 'अहं ब्रह्मास्मि' इति ; तस्माच्च स्वात्मतत्त्ववेदनात्, तत्सर्वमभवत् प्राक्स्वस्मिन्नध्यारोपितम् अब्रह्मत्वम्

असर्वत्वं चोज्झित्वा – इत्यर्थः । इहापि वेदनादेव सर्वमभवत् – इत्युच्यते कार्यान्तरानुष्ठानफलं स्यात् सर्वभाव इति शङ्कानिवारणाय – इति स्पष्टम् । '**तत्र को मोहः कः शोक एकत्वमनुपश्यतः**' (ई. ७) इति वाजसनेयिसंहितास्थो मन्त्रः । 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥' इति पूर्णो मन्त्रः । यत्र विद्यावस्थायां सर्वाण्यात्मैवाभूत् परमार्थं विजानतः, तत्रैकत्वमद्वितीयार्थं शास्त्रोपदेशमनुपश्यतः, को मोहः कः शोकः ? – इत्याक्षेपादेकत्वदर्शनलक्षणविद्यानन्तरं शोकमोहोपलक्षित-संसारान्मोक्षोऽर्थसिद्धः ; न तं विद्वांसं प्रति विज्ञानानन्तरं कार्यान्तर-मनुष्ठेयमस्तीति ब्रवीत्ययं मन्त्रः ॥

'**एवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यः**' इत्युक्त्या ब्रह्मदर्शनोत्तरं क्षणमप्यभ्यन्तरः कालो मोक्षप्राप्तिरहितो न वर्तत इति विवक्षितम् । नात्र विद्यामोक्षौ भिन्नौ विवक्षितौ, किं तर्हि कालान्तराभावात् विधैवोभयथा व्यपदिश्यते ; 'तत्त्वमसि' इति सिद्धवदुपदेशात् । तदेतत् स्फुटयन्नाह "**तथा 'तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च' (बृ. १–४–१०) इति ब्रह्मदर्शनसर्वात्मभावयोर्मध्ये कर्तव्यान्तरवारणायोदाहार्यम् । यथा तिष्ठन् गायतीति तिष्ठतिगायत्योर्मध्ये तत्कर्तृकं कार्यान्तरं नास्तीति गम्यते**" इति । तद् ब्रह्म एतत्पश्यन्, अहमस्मीति स्वात्मत्वेन पश्यन् ऋषिर्वामदेवः प्रतिपेदे किल – एतान् 'अहं मनुरभवं सूर्यश्च' इत्यादीन् मन्त्रान् ददर्श – इति ब्रह्मविद्याफलं मोक्षं

सर्वभावापत्तिं विद्यासमसमयमेव प्राप्तवानित्येतद् वाक्यं दर्शयतीत्यभिप्रायः । अत्र निदर्शनार्थमाह '**यथा तिष्ठन् गायतीति**'– इत्यादि । अत्र तिष्ठतिक्रियासमानकालैव गानक्रिया–इति गम्यते, न तु 'उत्थाय गायति' इत्यत्र उत्थानं तावत् प्रथमं, तदुत्तरं गानम् इतिवद्भिन्नकालिकं क्रियाद्वयम् । एवमत्रापि 'पश्यन् सर्वात्मभावं प्रतिपेदे' इति दर्शनसमसमयमेव सर्वात्मभावं स्वतःसिद्धमेव प्राप्तवान्, दर्शनं तु अदर्शननिवृत्त्यर्थमेव न तु सर्वात्मभावप्राप्त्यर्थं व्यापारान्तरमपेक्षते स– इत्यभिप्रायेण शत्रन्तप्रयोग इति स्पष्टमिति भावः । अहं ब्रह्मेति ज्ञानं हि स्वतःसिद्धमेव ब्रह्मत्वं सर्वभावं चाभिव्यनक्ति, अविद्याव्यवधानापनयनमात्रेण – इत्यभिप्रायः ॥

( भाष्यम् )

**'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि' (प्र. ६–८), 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयतु' (छां. ७–१–३), 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः' (छां. ७–२६–२) इति चैवमाद्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवाऽऽत्मज्ञानस्य फलं दर्शयन्ति । तथा चाचार्यप्रणीतं न्यायोपबृंहितं सूत्रम् – 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' (न्या. सू. १–१–२) इति । मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद् भवति ॥**

७०. अविद्याबाधनमात्रं ब्रह्मज्ञानकृत्यम् – यथोक्तं स्पष्टयन्, एतस्मिन्नर्थे श्रुतीरुदाहरति–'त्वं हि नः पिता' इत्याद्याः । अत्र केचिन्मन्यन्ते–उपासनेनात्मविषयं विज्ञानान्तरं भावयेत्, तेनात्मा ज्ञायते, अविद्यानिवर्तकं च तदेव, नाऽऽत्मविषयकं वेदवाक्यजनितं विज्ञानम्; 'विज्ञाय प्रज्ञां कुर्वीत' (बृ. ४-४-२१) इत्यादिश्रुतेः–इति । अर्वाचीनास्तु भगवत्पादीयभाष्यव्याख्यानकाराः केचिद्-वृत्तिकार-संमतम् उपासनाऽपूर्वजन्यत्वं मोक्षस्यानभ्युपयन्तोऽपि वाक्यमात्रान्न ब्रह्मविज्ञानजनिमनुमन्यन्ते । गान्धर्वशास्त्रोपासनावासनायाः षड्जादि-साक्षात्कारे, वेदान्तार्थोपासनावासनाया जीवस्य ब्रह्मभावसाक्षात्कारेऽ-पूर्वानपेक्षाया एव सामर्थ्यान्न कार्यविधिरङ्गीकार्यः; अविद्यापनयस्य च वेदान्तार्थविज्ञानादवगतिपर्यन्तादेव संभवात्, उपासनायाः संस्कारस्य च साक्षात्कारोपजनने मनःसाचिव्यस्य च यथोक्तरीत्या मानान्तर-सिद्धत्वात्, विधिं विनाऽपि ब्रह्मसाक्षात्कार उपासनेनाऽऽसादयितव्य इत्याचक्षते । भाष्यकारस्तु विद्यामात्रेण श्रुत्याचार्यवाक्यजनितेना-ऽविद्यालक्षणप्रतिबन्धनिवृत्त्युपपत्तेः, न कथमपि ब्रह्मज्ञानोत्तरं कर्तव्यान्त-रावशेषः – इति मत्वा तादृशीरेव श्रुतीरुदाहरति । 'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि' (प्र. ६–८) इति प्रश्नोप-निषद्गतं वाक्यम् । सुकेशा भारद्वाजः, शैब्यः सत्यकामः – इत्यादयो भगवन्तं पिप्पलादं ब्रह्मज्ञानार्थमुपसन्नाः, तेषां च पिप्पलादः (१) कर्मिणां ज्ञानयुक्तकर्मनिष्ठानां च गतिम्, (२) प्राणस्य प्रजापतित्वम्, (३) प्राणस्य जन्मवृत्त्यादिविशेषम्, (४) परब्रह्मणोऽक्षरसंज्ञकस्य महिमानम्,

(५) ओंकारोपासनाप्रकारं तत्फलं च, (६) षोडशकलपुरुषतत्त्वं चेति षट् प्रश्नानपाकृत्य परापरब्रह्मतत्त्वं प्रबोध्य 'एतावदेवाहमेतत् परं ब्रह्म वेद नातःपरमस्ति' (प्र.६-७) इति प्रोवाच। ते च तमर्चयन्तः प्रोचुः– 'त्वं हि नः पिता' इत्यादि। योऽस्माकमविद्यायाः, विपरीतज्ञानात्, परं पारं संसारसागरस्य परं पारं मोक्षाख्यं तारयसि, स त्वमेव नः पिता –इति। अत्राविद्यायाः परपारभूतो मोक्षः–इति कथनात्, आचार्योपदेशजनिताया विद्यायाः कृत्यम् अविद्यालक्षणप्रतिबन्धनिवृत्तिमात्रम्; न च सा विद्या स्वोत्पत्त्यनन्तरमपि किञ्चित् कर्तव्यान्तरमपेक्षते स्म – इति गम्यते॥

'श्रुतं ह्येव मे भगवद्दृशेभ्यः' (छां. ७–१–३) इत्यादिवाक्यं नारदस्य सनत्कुमारं प्रति। आत्मविद्यया शोकतरणं भवतीति शिष्टप्रवादं श्रुत्वा शोकपरीतोऽहं भगवन्तं शरणं गतोऽस्मि; तं मां शोकसागरे निमग्नं शोकस्य परं पारं प्रापयतु भगवान् आत्मविद्योपदेशेन – इति प्रार्थनावाक्यस्यार्थः। आत्मविषयकाविद्यानिवृत्त्यर्थैवैषा प्रार्थना – इत्यस्माद् उपक्रमवाक्यादेवावगम्यते। 'सोऽहं भगवो मन्त्रविदेवास्मि' इति ह्यवधारयति नारदः। ऋग्वेदादिसर्पदेवजनविद्यान्तं सर्वं जानन्नपि मन्त्रविदेवास्म्यद्ययावत्, कर्मनिष्ठ एव न त्वात्मतत्त्ववित्; अतो मां आत्मविद्योपदेशेन कृतार्थं करोतु भगवान्–इत्यभिप्रायः। एतेनोपक्रमवाक्येन, अविद्याकार्यत्वाच्छोकस्य, आत्माविद्यानिवृत्तिमात्रं विद्यया क्रियते इत्युक्तम्। अथोपसंहारवाक्येनाप्येतदेव स्पष्टतरमुच्यते इत्याविष्कर्तुमुदाहरति – 'तस्मै मृदितकषायाय तमसः पारं दर्शयति

भगवान् सनत्कुमारः ' (छां. ७-२६-२) इति । तस्मै प्रक्षालित-रागद्वेषादिकषायाय योग्याय नारदाय स भगवान् विद्याविद्याविवेकज्ञः सनत्कुमारः, अविद्यालक्षणस्य तमसः पारं परमार्थलक्षणं दर्शयति स्म-इति श्रुत्यर्थः । अत्राचार्यवचनेन तमोनिवृत्तिमात्रं कृतं न तु कार्यान्तरमुपदिष्टमिति स्पष्टमेव । एवमेव 'एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकरतीह सोम्य' (मुं. २-१-१०), 'यो वेद निहितं गुहायां परमे व्योमन्, सोऽश्नुते सर्वान् कामान् सह ' (तै. २-१) इत्यादिश्रुतयोऽपि द्रष्टव्याः, 'आदि'शब्दात् । सर्वा एताः श्रुतयः मोक्षप्रतिबन्धभूताज्ञाननिवृत्तिमात्रमेवाऽऽत्मज्ञानस्य फलं दर्शयन्ति, न तु ज्ञानानन्तरमपि किञ्चित्कार्यं दर्शयन्तीत्यभिप्रायः ॥

७१. विद्यानिवर्त्याविद्यास्वरूपम् – अत्र शोकादेरविद्या-कार्यत्वात् शोकाद्युपादानकारणभूताविद्यानिवृत्तिरेव गम्यते इति केचिन्मन्यन्ते । तदयुक्तम् । न हि शोकादिरनादिभावरूपाविद्यायाः परिणाम इति लोके दृष्टं श्रुत्या विज्ञाप्यते वा, येन तथा अध्यवस्येत ; अध्यासलक्षणाविद्यानिमित्तास्तु शोकादयः । श्वेतकेतुनारदादीनां भ्रान्तिकृतशङ्कापरम्परापरिहारः सद्गुरूपदेशेनैव त्वनुभवानुसारियुक्ति-सहकृतेन कृतः, ब्रह्मात्मैकत्वविज्ञानं च तेषां तावतैव सञ्जातम् इति श्रूयते । दृश्यते च लोके मिथ्याज्ञानकृतानर्थपरिहारः सम्यग्ज्ञानोप-देशेन । तस्मात्, मिथ्याज्ञानाध्यासादिशब्दवाच्याविद्यैव मोक्षप्रतिबन्ध-वाचोयुक्त्या परामृश्यते भाष्यकारेणेति सर्वैः श्रुतियुक्त्यनुभवानुसारिभि-रभ्युपेयम् । न हि लोके शुक्तिरजतरज्जुसर्पादिप्रतीतिव्यतिरेकेण

तदुपादानभूता काचिदन्या अविद्या शुक्त्यादिविषया अपोह्यत इति कल्प्यते कैश्चिद् प्राकृतैर्व्युत्पन्नमतिभिर्वा । भ्रान्तिमात्रस्य निवर्तिका विद्या—इति तु सर्वसंप्रतिपन्नम् । भाष्यकारश्चाह – 'एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः, कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः ; अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते' (सु. पा. ९०–९५) इति । इहापि च "वस्तुमात्रकथनेऽपि 'रज्जुरियं नायं सर्पः' इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टम्, तथेहापि असंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात्" (पा. १०४) इति । अपि च सूक्ष्मेक्षिकया विचार्यमाणे न ब्रह्मविद्या अविद्यानिवृत्तावपि सव्यापारा ; न हि प्रदीपालोकोदयव्यतिरेकेण तमोनिवृत्तौ आलोकव्यापारोऽस्तीति केनचिदभ्युपगम्यते । एवं ब्रह्मविद्योदयसमसमयमेव ब्रह्मविषयाऽविद्यानिवृत्तिरपीत्यतः, तन्निवृत्तौ यत्नान्तरं हेत्वन्तरं वा न कल्पनीयम् । तदेवम्, यथा लोकप्रसिद्धाग्रहणान्यथाग्रहणसंशयितग्रहणलक्षणाविद्यात्रयनिवर्तने न विद्याया व्यापारः, विद्याप्रकाशभावे स्वत एव तु तेषामभावगमनम्, एवमिहापि ब्रह्मण्यध्यारोपिताविद्याविनिवृत्तये न विद्यायाः स्वोत्पत्तिव्यतिरेकेण व्यापारान्तरं समपेक्ष्यते इत्यलमति प्रपञ्चेन ॥

**७२. मिथ्याज्ञाननिवृत्तिमात्रेण सर्वसंसारदुःखनिवृत्तिरित्यत्र दर्शनान्तरसम्मतिः** – उक्तार्थे न्यायाचार्याणां सम्मतिमाह "तथा चाऽऽचार्यप्रणीतं न्यायोपबृंहितं सूत्रम् 'दुःखजन्म-

प्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः'
(न्या.सू. १-१-२) " इति । अत्र पाठक्रमेण उत्तरमुत्तरं कारणम्, पूर्वपूर्वं तु तत्कार्यम्। सूत्रे उत्तरोत्तरं पठितस्य कारणस्यापाये तत्समनन्तर-पूर्वपठितस्य कार्यस्यापायः । तद्यथा दुःखं जन्मकृतमिति कारणभूत-जन्मापाये दुःखापायः । कारणभूतप्रवृत्त्यपाये तत्कार्यस्य जन्मनोऽपायः । प्रवृत्तेर्दोषकृतत्वात, तदपाये प्रवृत्त्यपायः । दोषश्च मिथ्याज्ञानकार्यमित्यतो मिथ्याज्ञानापाये दोषापायः । तदेवं यदा तत्त्वज्ञानान्मिथ्याज्ञानमपैति, तदा आत्यन्तिकं निःश्रेयसं भवतीत्यत्र अक्षपादाचार्यस्यापि सम्मति-रस्ति । एतच्च तत्प्रणीतं सूतं न्यायोपबृंहितमित्यतोऽस्माभिरपि तदर्थोऽनु-मन्यते । मिथ्याज्ञानस्वरूपं च तन्मते अनात्मन्यात्मज्ञानम्, तत्त्व-ज्ञानं तु अनात्मविविक्तस्य आत्मतत्त्वस्य ज्ञानम् ; एतत्तु अनात्मनोऽ-नृतत्वमुपपादयद्भिरस्माभिर्नानुमन्यते । उपपादितं चाऽऽत्मानात्मनोः सत्यानृतयोरन्योन्याध्यास एवाविद्याख्यं मिथ्याज्ञानमिति, तच्चात्मैकत्व-ज्ञानादेवापैतीति च । तदाह – ' **मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्व-विज्ञानाद् भवति** ' इति । तस्मात्, सिद्धमिदं यन्मिथ्याज्ञानलक्षणा-विद्याया मोक्षप्रतिबन्धरूपाया वेदान्तवाक्यार्थजनितविद्यया निवृत्ति-मात्रादेव निःश्रेयसमधिगम्यते, न तु ज्ञानात्परमनुष्ठीयमानोपासनासाध्यो मोक्षः इतीत्यर्थः । तदेवं यथावस्थितब्रह्मवस्तुज्ञानमात्रादेव मोक्षप्राप्ति-रित्यत्र न्यायोपबृंहिताः श्रुतयः प्रमाणम् । तस्मात्, कार्यविधि-प्रयुक्तस्यैव ब्रह्मणः शास्त्रप्रमाणकत्वमिति न युक्तः पक्षः – इत्यभिप्रायः ॥

# ७. ब्रह्मात्मैकत्वज्ञानं न संपदादिरूपम्

( भाष्यम् )

न चेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपम्; यथा 'अनन्तं वै मनोऽनन्ता विश्वेदेवाः अनन्तमेव स तेन लोकं जयति' (बृ. ३-१-९) इति। न चाध्यासरूपम्, यथा 'मनो ब्रह्मेत्युपासीत' (छां. ३-१८-१), 'आदित्यो ब्रह्मेत्यादेशः' (छां. ३-१९-१) इति च मनआदित्यादिषु ब्रह्मदृष्टयध्यासः। नापि विशिष्टक्रियायोगनिमित्तम्, 'वायुर्वाव संवर्गः', 'प्राणो वाव संवर्गः' (४-३-१, ३) इतिवत्। नाप्याज्यावेक्षणादिकर्मवत् कर्माङ्गसंस्काररूपम्। संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने 'तत्त्वमसि' (छां. ६-८-७), 'अहं ब्रह्मास्मि' (बृ. १-४-१०), 'अयमात्मा ब्रह्म' (बृ. २-५-१९)—इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत। 'भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः' (मुं. २-२-८) इति चैवमादीनि अविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन्। 'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३-२-९) इति चैवमादीनि तद्भावापत्तिवचनानि संपदादिपक्षे न सामञ्जस्येनोपपद्येरन्। तस्मात्, न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानम्॥

७३. उत्तरग्रन्थसंबन्धः – तदेवं ब्रह्मविद्योत्पत्तिसमनन्तरमेवाविद्यापगममात्रेण मोक्षो दृष्टं फलम्, न तूपासनापूर्वद्वारेणादृष्टो मोक्षः प्राप्यः – इति राद्धान्तिते कार्यविधिवादी प्रकारान्तरमवलम्ब्य प्रत्यवतिष्ठेत ।· कथम्? भवतु नाम मोक्षप्रतिबन्धभूताविद्यानिवृत्तिमात्रं ब्रह्मात्मैकत्वज्ञानस्य कृत्यमित्यपि, तथापि तदेव ब्रह्मात्मैकत्वविज्ञानं विधीयमानोपासनारूपम्, तदपूर्वमेव त्वविद्यानिवृत्तौ साधनम् इति किं न स्यात्? दृष्टं खलु नैयोगिकमपि फलम् ऐहिकम्; यथा कारीर्यादेः । तस्मान्मा नाम भूत् अदृष्टो मोक्षः ब्रह्मात्मोपासनात् । दृष्ट एव सोऽविद्यानिवृत्तिद्वारकः स्यात्– इति । तामेतामसम्भावितामपि शङ्कां परिहरिष्यन्नाह – 'न चेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपम्' इत्यादिना । अथवा सिद्धान्तिनोक्तं सर्वमप्यनादृत्य स एव ध्याननियोगवादी शङ्कते, न केवलं ब्रह्मात्मैकत्ववस्तुप्रतिपादनेन मोक्षः फलं लप्स्येत । ब्रह्मात्मैकत्वश्रवणोत्तरमप्यविद्याया अनुवृत्तिदर्शनेनोक्तदोषतादवस्थ्यात् । यत्तु ब्रह्मात्मैकत्वविज्ञानेन दृष्टं फलं भवतीति, एष भवतो दुराग्रहः; प्रवृत्तिनिवृत्तिपरत्वादेव शास्त्रस्य । यस्तु 'तत्त्वमसि' इत्यादिब्रह्मात्मैकत्वोपदेशाभासः श्रुतेः, तत्राप्युपासनायामेव संपदादिरूपायां नियुज्यते मुमुक्षुरित्येव युक्तं कल्पयितुम् । 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' (छां. ६–१४–२) इति देहपातानन्तरमेव सत्संपत्तिरूपमोक्षफलप्राप्तिश्रवणात् । तस्मात् आत्मनि ब्रह्मत्वसंपादनम्, ब्रह्मदृष्ट्यध्यासः, बृंहणक्रियायोगनिमित्तं ब्रह्मबुद्धिकरणं संस्कारार्थं ब्रह्मधीकरणं वा–अत्रापि विधीयते; तेन च शास्त्रदृष्टोऽदृष्टो

मोक्षो भविष्यति – इति । तामपि कल्पनामपहस्तयन्नाह – ' न चेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपम् ' इत्यादिना ॥

संपन्नाम अल्पत्वेन ज्ञाते कस्मिंश्चिदालम्बने, केनचित् सामान्ये-नोत्कृष्टवस्त्वभेदभावना । तत्रोदाहरणम् ' अनन्तं वै मनः ' इत्यादि-श्रुत्युक्तम् । 'कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायति ?' इत्यश्वलेन पृष्टो याज्ञवल्क्यो निर्णयं चकार, एकयेति । पुनः कतमा सा एका ? – इति पृष्टस्य प्रतिवचनम् ' मन एवेत्यनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति ' (बृ. ३–१–९) इति । अत्र मनस्तावद् वृत्तिभेदेनानन्तमिति प्रसिद्धम् ; अनन्ताश्च तदभि-मानिनो विश्वेदेवाः । तेनानन्त्यसामान्यात् मनसि विश्वेदेवत्वसंपादनेन अनन्तमेव लोकमश्नुते–इत्युक्तम् । एवमेव तत्त्वमसीत्यत्रापि जीवात्मनो ब्रह्मत्वसंपादनमुपदिश्यते चैतन्यसामान्याज्जीवब्रह्मणोः – इति नाशक्यं कल्पयितुम्– इति पूर्वपक्ष्यभिमानः । तदेतन्निराचष्टे 'न चेदम्' इति । कुतः ? सद्रूपत्वमेव हि प्रतिपर्यायमभ्यासेनोपपाद्यते ' स आत्मा तत्त्वमसि श्वेतकेतो ' इति ॥

' न चाध्यासरूपम् ' एतद् ब्रह्मात्मैकत्वविज्ञानम् । अध्यासो हि नाम अतद्रूपे एव शास्त्रोक्तरीत्या तद्दृष्टिक्षेपः । पूर्वत्र मनआदे-स्ततोऽप्युत्कृष्टवस्तुदृष्ट्या ध्यानम्, इह तु ध्येयवस्तुन एवानपेक्ष्य कञ्चित् सामान्यादिकं हेतुं केवलं शास्त्रेण विहितं ध्यानमिति । तद्यथा 'मनो ब्रह्मेत्युपासीत' (छां. ३–१८–१) इत्यध्यात्मम्, 'आदित्यो ब्रह्मेत्यादेशः ' (छां. ३–१९–१) इति चाधिदैवतम् । अब्रह्मैव

मनः, अब्रह्मैव च सन्नादित्यः ब्रह्मेत्युपास्यत्वेनोपदिश्यते । न चैवम् ' अयमात्मा ब्रह्म ' इत्यत्र । ब्रह्मैव हि सन्नयमात्मा अविद्यया अन्यथा गृहीतः, परमार्थतो ब्रह्मैवेत्यवधार्यते श्रुत्या–इत्यभिप्रायः ॥

' **नापि विशिष्टक्रियायोगनिमित्तम्** ' इदं ब्रह्मात्मैकत्वोपासनम् । क्रियायोगनिमित्तोपासनाविधौ दृष्टान्तः '**वायुर्वाव संवर्गः**', ' **प्राणो वाव संवर्गः** ' (छां. ४–३–१, ३) इतिवत् – इति । संवर्गविद्यामादिशन्तु जानश्रुतिं रैक्व आह – " वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति वायुमेवाप्येति यदा सूर्योऽस्तमेति वायुमेवाप्येति यदा चन्द्रोऽस्तमेति वायुमेवाप्येति ॥ यदाप उच्छुष्यन्ति वायुमेवापियन्ति वायुर्ह्येवैतान् सर्वान् संवृङ्क्त इत्यधिदैवतम् ॥ (छां. ४–३–१, २), अथाध्यात्मं प्राणो वाव संवर्गः स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः प्राणो ह्येवैतान् सर्वान् संवृङ्क्त इति (छां. ४–३–३) " इति च । तावेतौ वायुप्राणौ प्रलये स्वापे च अग्न्यादीनां वागादीनां च संवर्जनात् संग्रहणात् संग्रसनाद् वा समानक्रियायोगात् ' संवर्गौ ' इत्युच्येते, तथोपासनार्थम् । न तथेह कोऽपि विशिष्टक्रियायोगो निमित्तत्वेन श्रूयते आत्मनो ब्रह्मत्वे इति वैषम्यम् ॥

अथान्योऽप्युपासनाप्रकारो भवति, योऽपीह न संभवतीत्याह- ' **नाप्याज्यावेक्षणादिकर्मवत् कर्माङ्गसंस्काररूपम्** ' इति । न हि यथा ' पत्न्यवेक्षितमाज्यं भवति ' (शा.भा. ६–१–१७) इत्युपांशुयागाङ्गसंस्कारार्थं पत्न्यवेक्षणं विधीयते, यथा वा ' व्रीहीन् प्रोक्षति ' इति संस्कारार्थं प्रोक्षणम्, तथेह त्वंपदार्थसंस्कारार्थं ब्रह्मात्मत्वविज्ञानं विधीयत इति शक्यं कल्पयितुम् – इति भावः ॥

७४. **ब्रह्मात्मैकत्वविज्ञानस्य संपदादिरूपत्वे किं बाधकम् ?** – ननु किमित्येवं विज्ञानस्य संपदादिरूपत्वविनिवारणे महानाग्रहः ? का वा हानिः स्याद् वेदान्तसिद्धान्तस्य संपदादिरूपत्वाभ्युपगमे विज्ञानस्य ?–इत्याशङ्क्याह '**संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने ………**' इत्यादि । अयमभिप्रायः – अत्रोदाहृतवाक्यानां संपदादिध्यानविधानपरत्वं नैवावगन्तुं शक्यते । ब्रह्मैवाऽऽत्मा, आत्मैव ब्रह्म – इति निरुपचरितं तयोरैक्यमेव प्रतिपाद्यत इति हि पदसमन्वयादवगम्यते । न च वाक्यगतानां पदानां ब्रह्मस्वरूपमात्रविषये निश्चिते समन्वये अवगम्यमाने, उपासनाविध्याद्यर्थान्तरपरत्वकल्पनं न्याय्यम्, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् इत्युक्तं भाष्य प्रथमवर्णके (पा. ४४) । न चात्रोपलभ्यन्ते 'उपासीत' इत्यादिविधायकाः शब्दाः, न च निराकाङ्क्षे वाक्यार्थे विधिकल्पनमध्याहारादिना न्याय्यं भवेत् । किञ्च "**'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः' (मुं. २–२–८) इति चैवमादीन्यविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन्**" । न चाविद्यानिवृत्तिरप्युपासनापूर्वमपेक्षत इत्युत्प्रेक्षितुं शक्यते, यथावस्थितवस्तुज्ञानेनैवाविद्यानिवृत्तेर्दृष्टत्वात्, अदृष्टोपासनाद्यपूर्वकल्पनानुपपत्तेः । किञ्चान्यत् "**'ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३–२–९) इति चैवमादीनि तद्भावापत्तिवचनानि संपदादिपक्षे न सामञ्जस्येनोपपद्येरन्** ।" यद्यपि 'ब्रह्म वेद ब्रह्मैव भवति' इत्यपि विद्याविधानमेवेति स्वीक्रियते वृत्तिकारैः, तथापि तदनादेयं मतम् । 'तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो

विमुक्तोऽमृतो भवति ' इतिवाक्यशेषेण शोकाधर्मादितरणाविद्यामोक्षणयोरपि वेदनफलत्वेन श्रूयमाणत्वात् । उपासनारूपविद्याङ्गब्रह्मज्ञानमात्रात्तद्भावापत्तेर्मुख्यवृत्त्याऽनवक्लृप्तेश्च – इतिभावेन ' संपदादिपक्षे न सामञ्जस्येनोपपद्येरन् ' वचनानीत्युक्तम् ॥

एतावता विचारेण फलितमर्थम् उपसंहरति – ' तस्मात्, न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानम् ' इति । तस्मात्, 'तत्त्वमसि' इत्यादिवाक्यस्थानां पदानां ब्रह्मात्मैकत्ववस्तुस्वरूपे एव निश्चितसमन्वयस्यावगम्यमानत्वात्, वाक्यजन्यज्ञानेनैवाविद्यानिवृत्तेः प्रत्यक्षं श्रूयमाणत्वात्, वेदनमात्रेणैव ब्रह्मभावापत्तिवक्तॄणां वाक्यानां सामञ्जस्यात्, अश्रुतसंपदाद्युपासनाविधिकल्पनायां गौरवाच्च ब्रह्मात्मैकत्वं यथावस्थितमेव ज्ञाप्यते तत्त्वमस्यादिवाक्यैः, तेनैव च वाक्यजनितज्ञानेनाविद्यानिवृत्तिद्वारा अमृतत्वं प्राप्यते, न तूपासनाद्यनुष्ठानद्वारा –इत्येवाभ्युपगन्तव्यं वाक्यप्रमाणशरणैरित्यभिप्रायः ॥

## ८. ब्रह्मणस्तज्ज्ञानस्य च न कार्यानुप्रवेशः शक्यकल्पनः

( भाष्यम् )

**अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या, किं तर्हि प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद् वस्तुतन्त्रा । एवंभूतस्य ब्रह्मणः, तज्ज्ञानस्य च न कयाचिद् युक्त्या**

शक्यः कार्यानुप्रवेशः कल्पयितुम् । न च विदिक्रिया-कर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः, 'अन्यदेव तद्विदिता-दथोऽविदितादधि' (के. १–४) इति विदिक्रियाकर्मत्व-प्रतिषेधात्, 'येनेदं सर्वं विजानाति तं केन विजानी-यात्' (बृ. २–४–१४) इति च । तथा उपास्ति-क्रियाकर्मत्वप्रतिषेधोऽपि भवति 'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते' इत्यविषयत्वं ब्रह्मण उपन्यस्य 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' (के. १–५) इति ॥

७५. ब्रह्मज्ञानस्य वस्तुतन्त्रत्वम्—तदेवं जिज्ञास्यवैलक्षण्यम्, जिज्ञासयोः फलवैलक्षण्यम्, ब्रह्मविद्योत्पत्तिसमनन्तरमेवाविद्यालक्षण-प्रतिबन्धापनयमात्रेण मोक्षप्राप्तिं च प्रसाध्य कार्यविधिशेषत्वं प्रत्याख्यातं ब्रह्मणः । ब्रह्मात्मैकत्वप्रतिपादकपदसमन्वयाविरोधाय ब्रह्मवेदनमात्रेण तद्भावाप्तिवाक्यानां सामञ्जस्याय च ब्रह्मज्ञानस्योपासनारूपत्वं ब्रह्मणश्च विधिशेषत्वं च परित्यक्तव्यमित्युपपादितम् । अथेदानीं ब्रह्मणस्तज्ज्ञानस्य च स्वभावपर्यालोचनेनापि कार्यानुप्रवेशं प्रत्याचिख्यासुर्ब्रह्मविद्यायाः क्रियारूपत्वानुपपत्तौ हेत्वन्तरमाह – 'अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या, किं तर्हि प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद् वस्तु-तन्त्रा' इति । संपदादिवत् क्रियारूपत्वे हि विद्या विधीयत इति स्यादपि ; न त्वेतदस्ति । अतो न ब्रह्मविद्या विधेया । अत एव यदुक्तं पूर्वपक्षिणा कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वं वेदान्तेषु–इति, तदयुक्तम् ; 'द्रष्टव्यः', 'सोऽन्वेष्टव्यः' इत्यादिवाक्येषु विद्याविधाना-

भावात् । यथावस्थितवस्तुमात्रप्रतिपादनाच्च – इति भावः । किञ्च ब्रह्म सर्वस्यापि प्रत्यगात्मैव, अतो संपदादिजातीयकोपास्तिप्राप्यं तदिति कल्पनं मृषैव ; तत्स्वरूपज्ञानमात्रेण तद्भावापत्तिश्रवणात् इत्युक्तम् । अतः '**एवंभूतस्य ब्रह्मणः, तज्ज्ञानस्य च न कयाचिद् युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुम्** ' । ब्रह्म हि स्वतःसिद्धं सर्वस्य प्रत्यगात्मभूतम् , तज्ज्ञानं च वस्तुतन्त्रम् – इति स्थिते ब्रह्मज्ञानेन मुक्तिरित्युपदेशः ' ज्ञानक्रियासाध्यो मोक्षः ' – इत्येवमर्थः इति नेतुं न कथञ्चिदपि शक्यते – इत्यभिप्रायः ॥

७६. **ब्रह्मणो न विदिक्रियाकर्मत्वम्**– ननु समस्तक्रियानुप्रवेशविरहेऽपि, विदिक्रियानुप्रवेशो दुर्वारणः । ब्रह्मविद्येति हि ब्रह्मकर्मकैव विद्या उच्यते, तत्र विदिरेव क्रिया भवतीति तद्विषयत्वं कथं वार्येत ? विदिरेव खलु विधेया प्रतिपत्तिः । तत्कर्मतैव च प्रतिपत्तिविधिशेषवाचोयुक्त्या विवक्ष्यतेऽस्माभिः – इति पूर्वपक्षिणोऽभिमतमाशङ्क्य प्रतिवक्ति '**न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः** ' इति । तदेतत् कस्मात् ? '**अन्यदेव तद्विदितादथोऽविदितादधि** ' (के. १–४) इति **विदिक्रियाकर्मत्वप्रतिषेधात्** ।' अत्रेदमवधेयम् । विदिधातुः खलु वेदनार्थमास्थीयमानां क्रियाम् , तत्फलमवगतिं चेत्युभयं वक्ति । यथा उद्यम्योद्यम्य निपातनं परश्वादेः, छेद्यकाष्ठस्य द्वैधीकरणं चेत्युभयमपि छिनत्तीत्येकेनैव शब्देनोच्यते, छिदिक्रियावसानेऽभिव्यज्यमानत्वाद् द्वैधीभावरूपफलस्य, एवमिन्द्रियैर्मनसा च वेदनार्थं व्यापारः, विषयप्राकट्यं तत्फलं चेत्युभयमप्येकेनैव शब्देन

व्यवह्रियते। तत्र विद्यारूपं फलं न क्रिया, तदर्थमास्थीयमानव्यापारस्तु क्रियाशब्दवाच्यः। तत्र क्रिया विधातुं शक्यते, न तु फलम् – इत्येवं स्थिते विदिक्रियाकर्मत्वेन यद्युपयुज्येत ब्रह्म तदा स्यादपि क्रियाशेषत्वं ब्रह्मणः, न तु तदस्ति। न हि विदिक्रियया व्याप्यते तद्ब्रह्म, क्रियोत्पत्तेः पूर्वमेव विविदिषोरात्मत्वेन सिद्धत्वात्। तदेव च स्वयंसिद्धं वस्तु वाक्येन प्रतिपाद्यते, वाक्यगतपदानां तत्प्रतिपादकत्वेनैव समन्वयावगमात् – इति ॥

विदिक्रियाव्याप्तत्व वेदितृव्यतिरिक्तस्यैव, न तु वेदितृस्वरूपस्येति न केवलं युक्त्या साध्यते किं तर्हि श्रुतिबलादपि। 'अन्यदेव तद्विदितादथोऽविदितादधि' इतीयं हि तलवकारश्रुतिः, 'न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः। न विद्मो न विजानीमो यथैतदनुशिष्यात्' (के. १–३) इति चक्षुरादिज्ञानेन्द्रियाणि, वागादिकर्मेन्द्रियाणि, अन्तःकरणं च स्वात्मभूतं ब्रह्म स्वव्यापारेण व्याप्तुं न प्रभवन्ति, स्वात्मनि स्वक्रियाकर्मत्वासंभवादेव – इत्युक्त्वा, सर्वथाप्युपदेष्टुमशक्यमेव ब्रह्मेति प्राप्ते, 'विदिताविदिताभ्यां व्याकृताव्याकृतरूपाभ्यां विलक्षणं तत्' इति प्राप्तविदिक्रियाकर्मत्वापह्नवेनैव ब्रह्म ज्ञापयति। न च वेदितुरात्मनो व्यतिरिक्तं विदिताविदिताभ्यां विलक्षणं समस्तीत्यतो वेदितुरात्मैव ब्रह्म – इत्यनेन विदिक्रियाकर्मत्वप्रतिषेधेनावगम्यते। आत्मनश्चाऽऽत्मत्वात्, तदन्तत्वाच्च सर्वप्रमाणानां प्रमाणत्वस्येत्यतोऽयमेव स्वात्मभूतब्रह्मोपदेशप्रकारः। प्रमाणाविषयत्वादेवमेवायं ब्रह्मात्मा अतत्स्वभावव्यावृत्त्या आचार्योपदेश-

परमात्मा प्रमाणानामगोचरो नैवावगन्तव्यः – इति वाक्यशेषादवगम्यते ' इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ' (के. १–४) इत्यस्मात् ॥

अत्र कश्चिन्मन्येत – नात्र विदिक्रियाकर्मत्वप्रतिषेधः विदिक्रियाकर्मान्तरत्वमात्रं त्विह कथ्यते । तेन लोके यथा इन्द्रियव्यापारजनितज्ञानकर्मत्वं घटादिविषयाणाम्, न तथेह ब्रह्मणः – इत्येतावदुच्यते । करणान्तरद्वारेण तु विदिक्रियाकर्मत्वमनुज्ञायत एवेति । तादृशमपि भ्रमं व्युत्पादयिष्यन् स्फुटतरं विदिक्रियाकर्मनिषेद्धृ श्रुत्यन्तरम् उदाहरति ' येनेदं सर्वं विजानाति तं केन विजानीयात् ' (बृ. २–४–१४) इति । मैत्रेयीं प्रति याज्ञवल्क्य आह – येन आत्मभूतेन विज्ञानस्वरूपेण सर्वमिदं ज्ञातृज्ञानज्ञेयादिमिथ्याप्रतीतिमात्रशरीरं विजानाति, अवभासयति, तं परमात्मानं केन करणेन विजानीयात् ? न हि तादृशं करणं विद्यते, यद्व्यापारेण परमात्मानमपि विजानीयात् । सर्वं हि करणं विज्ञेयविज्ञाने एव विनियुक्तम्, स्वयमपि विज्ञातृस्वरूपचैतन्येनैवावभास्यते- इति कृत्वा ' येनेदं सर्वं विजानाति ' इति विशेषणम् । परमार्थदृष्ट्या तु केवलोऽद्वय आत्मा विज्ञानैकस्वभावत्वाद् ' विज्ञाता ' इत्युपचर्यते । 'प्रकाशयिता' इति सवितेव । तदानीं तु विज्ञाने करणव्यापारः सुतरां नास्तीति वाक्यशेषे प्राह ' विज्ञातारमरे केन विजानीयात् ' (बृ. २ ४ १४) इति । एतेनेदमपि चोद्यम् अपहस्तितं भवति, यन्मिथ्याप्रमाणगमनार्थं कश्चिदुपस्थापयेत् ' विज्ञानकर्तृत्वमेव ब्रह्मात्मनः क्रियाविषयशेषत्वं सम्पादयति '– इति । न ह्यात्मा विज्ञानक्रियाकर्तापि

वस्तुतः, येन कार्यविधिप्रयुक्तप्रतिपादनं तस्येत्याशङ्क्येतापि । वस्तुतस्तु समस्तक्रियाकारकफलव्यवहारातीतत्वमात्मनः प्रदर्शयितुमेवेदं प्रकरणम् ; यत आह सुस्पष्टम् 'यत्र वा अस्य सर्वमात्मैवाभूत्तत्केन कं जिघ्रेत्तत्केन कं पश्येत् .... तत्केन कं विजानीयात्' (बृ. २-४-१४) इति । तस्मात्, साध्वेतदुक्तम् 'न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः' इति ॥

७७. **उपास्तिक्रियाकर्मत्वमपि नास्ति ब्रह्मणः** – ननु कण्ठरवेणेदमुक्तमस्माभिः 'प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते' इति । सा च प्रतिपत्तिर्ब्रह्मोपासनारूपैव ; ब्रह्मोपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षो भविष्यतीत्यवोचाम । तत्र कोऽयमस्थाने संभ्रमः 'विदिक्रियाकर्मत्वं नास्ति ब्रह्मणः' – इति ? न च भवन्तोऽपि ब्रह्मणो वेदान्तविहितोपासनाकर्मत्वं निह्नुवते ; 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' (छां. ३-१४-१) इत्यादिवाक्यैः प्रत्यक्षं ब्रह्मोपासनस्य विधीयमानत्वाभ्युपगमात् । न च तदुपासनात् शास्त्रदृष्टोऽदृष्टो मोक्षो भविष्यतीत्येतदपि शक्यमपलपितुम् । 'एष म आत्माऽन्तर्हृदये .... एतद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मि' (छां. ३-१४-४) इत्यादिस्थलेषु तादृशमोक्षस्य विस्पष्टमुदीरितत्वात – इत्याशङ्क्याह '**तथा उपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति**' इति ॥

अयमभिप्रायः – अकाण्डे ताण्डवितमिदम् ; यत्कारणम् 'अनुष्ठेयकर्मफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यम्' (पा. ११६) इति, 'कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत अनित्य एव स्यात्' (पा. ११८)

इति, मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति श्रुतयः (पा. १२८) इति चावेदितम् । ब्रह्मविद्या न पुरुषतन्त्रा, किं तु प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद् वस्तुतन्त्रा—इति चेदानीमेवास्माभिरुपपादितम् । तदेवं स्थिते, उपास्तिक्रियाकर्मत्वं ब्रह्मण आश्रीयते चेद् बधिरेष्विव गानं स्याद् यदेतावता निरूपणेनोपपादितं ब्रह्मणो नित्यसिद्धस्वरूपत्वं तज्ज्ञानस्य यथावस्थितवस्तुमात्राभिव्यञ्जकत्वं च—इति ॥

अपि च श्रुत्यैव कण्ठरवेण कृतोऽस्ति ब्रह्मण उपास्तिक्रियाकर्मत्वप्रतिषेधः । कथम् ? 'यद्वाचाऽनभ्युदितं येन वागभ्युद्यते', 'यन्मनसा न मनुते येनाहुर्मनो मतम्', 'यच्चक्षुषा न पश्यति ....', 'यच्छ्रोत्रेण न शृणोति ....', 'यत्प्राणेन न प्राणिति ....' —इति च सर्वबाह्यान्तःकरणानवभास्यत्वं सर्वकरणावभासकत्वं च ब्रह्मण उक्त्वा प्रतिपदं 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' (के. १-५, ६, ७, ८, ९) इति निर्विशेषमेव ब्रह्मेति विद्धि, न त्विदं यत् विषयीकृत्योपाधिभेदविशिष्टमुपासते ध्यायिनः—इत्युपास्तिकर्मत्वं ब्रह्मणः प्रतिषेधति श्रुतिः । अतो नोपास्तिकर्मत्वं ब्रह्मण इति सिद्धम् ॥

ननूदाहृतं मया यथा श्रुतिर्ब्रह्मण उपास्यत्वं स्वयमेवाहेति । कथं स्वयमेवोपास्यत्वं ब्रह्मणो विधाय स्वयमेव तत्प्रतिषेधेत् ? 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्'—इति चेत्, अत्रोच्यते—अविद्यावस्थायां ब्रह्मण उपास्योपासकत्वादिलक्षणः सर्वो व्यवहारः — इत्युदर्के प्रतिपादयिष्यते ; 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति.... तदितर इतरं विजानाति' (बृ. ४-५-१५) इति श्रुतेः । अतः क्रिया-

कारकफलभेददर्शनावस्थायां भवति ब्रह्मण उपास्यत्वमपि ; आत्मैकत्व-प्रतिपत्त्यवस्थायां तु तस्योपास्तिक्रियाकर्मत्वं प्रतिषिध्यते । अतो न विरोधः । तस्मात्, अविषयस्य ब्रह्मणः शास्त्रप्रमाणकत्वं कार्यविधि-प्रयुक्तस्यैव प्रतिपादनं शास्त्रे—इत्येतद् व्याहतम् । अविद्यापनयनदक्ष-वस्तुतन्त्रज्ञानमेव हि मुख्यवृत्त्या ब्रह्मविद्येति ॥

## ९. अविषयस्य ब्रह्मणः शास्त्रयोनित्वं कथम् ?

( भाष्यम् )

अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिः इति चेत्, न ; अविद्याकल्पितभेदनिवृत्तिपरत्वात् शास्त्रस्य । न हि शास्त्रम् इदन्तया विषयभूतं ब्रह्म प्रतिपिपादयिषति, किं तर्हि, प्रत्यगात्मत्वेनाविषयतया प्रतिपादयत्, अविद्याकल्पितं वेद्यवेदितृवेदनादिभेदम् अपनयति । तथा च शास्त्रम् 'यस्याऽमतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम्' (के. २–३), 'न दृष्टेर्द्रष्टारं पश्येः .... न विज्ञातेर्विज्ञातारं विजानीयाः' (बृ. ३–४–२) इति चैवमादि । अतोऽविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणात्, न मोक्षस्यानित्यत्वदोषः ॥

७८. **ब्रह्मणोऽविषयत्वे शङ्का** – यद्येवं सर्वथा क्रियाविषयत्वप्रतिषेधः, तर्हि नैव संभवेत् कश्चन नियोगोऽत्र । न च प्रवृत्तिनिवृत्त्यन्यतरनियोगमन्तरेण तच्छेषत्वमवकल्पते ब्रह्मणः । न च वस्तुमात्रप्रतिपादनं संभवति ; निष्प्रयोजनत्वात् । प्रतिषिध्यते च कण्ठरवेण भवतापि विदिक्रियाविषयत्वं ब्रह्मणः–इत्यतः शास्त्रप्रमाणकत्वमेव दत्तजलाञ्जलि स्यात् ; तच्चानिष्टम् । तस्मात्, अनुमन्तव्यं भवता अकामेनापि विदिकर्मत्वं ब्रह्मणः, उपास्तिकर्मत्वं च । तस्मात्, शास्त्रयोनित्वस्यान्यथानुपपत्तेरवश्यमभ्युपगन्तव्यं ब्रह्मणः प्रतिपत्तिविधिशेषतयैव शास्त्रप्रमाणकत्वम् – इत्याशयवान् शङ्कते '**अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेत्**' – इति ॥

सिद्धान्ती स्वाशयमाविष्करोति – '**न । अविद्याकल्पितभेदनिवृत्तिपरत्वात् शास्त्रस्य**' इति । अयमभिप्रायः – भवेदिदं चोद्यं यदि सर्वत्र यथावस्थितवस्तुतत्त्वानुशासने वेद्यवेदितृवेदनादिभेद आकाङ्क्ष्येत ; न त्वेतदस्ति । प्रत्यक्षादिप्रमाणविषय एव त्वयं नियमः, यत् प्रमातृप्रमेययोर्भेदेनैव भाव्यमिति । ब्रह्मणस्तु सर्वस्यापि प्रमात्रादेः प्रत्यगात्मभूतत्वात्, अद्वितीयत्वाच्च न तस्मिन् कश्चिदपि प्रमात्रादिविभागोऽस्ति । अतः शास्त्रं प्रमाणम्, ब्रह्म प्रमेयम्, जिज्ञासुश्च प्रमाता – इति भेदोऽविद्यादशायां कल्पितः । न तु तथ्यत एव शास्त्रं इदं तदिति बोधयति । तदाह – '**न हि शास्त्रम् इदन्तया विषयभूतं ब्रह्म प्रतिपिपादयिषति, किं तर्हि प्रत्यगात्मत्वेन अविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदम् अपनयति**'

इति । उक्तं ह्यभियुक्तैः – 'विकल्पो विनिवर्तेत कल्पितो यदि केनचित् । उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥' (गौ. का. १–१८) इति । अत एव हि शास्त्रम् 'अन्त्यं प्रमाणम्' इति व्यपदिश्यते ; यतः शास्त्रं प्रमात्रादिविभागम् अविद्याकल्पितं पुरस्कृत्यैव प्रवृत्तं ज्ञानोत्पत्त्यनन्तरं न प्रमाणत्वेनावतिष्ठते, कल्पित-प्रमेयत्वे ब्रह्मण्यधिगते हि नैव पुनः प्रमाणव्यवहारोऽवशिष्यते । 'नास्ति शास्त्रं प्रमाणभूतम् , न ब्रह्म प्रमेयम्, नैव चाहं प्रमाता ; किं तु प्रमाणादिसर्वविभागरहितं ब्रह्मैवेदं सर्वम्' इति हि ब्रह्मज्ञान-स्वरूपम् । न चेदं शङ्क्यम् , असति ज्ञानज्ञेयादिविभागे कथं कस्य वा ब्रह्मज्ञानशब्दवाच्यत्वम् ? – इति । ब्रह्मात्मानुभवरूपेणावस्थानस्यैव ब्रह्मज्ञानवाचोयुक्त्या अभिलापात् । वक्ष्यति हि भाष्यकारः 'तस्मात्, अन्त्येन प्रमाणेन प्रतिपादिते आत्मैकत्वे समस्तस्य प्राचीनस्य भेद-व्यवहारस्य बाधितत्वान्नानेकात्मकब्रह्मकल्पनाऽवकाशोऽस्ति' (२–१–१४, पा. २००) इति । तस्मात् , ब्रह्मात्मानुभवरूपे ज्ञाने जाते न पुनरपि ज्ञानज्ञेयादिविभागोऽवशिष्यत इत्यनवद्यम् ॥

७९. बाह्यप्रमेयेष्वपि न प्रमाणव्यापारविषयत्वमस्ति–अभ्युपगम्येदमुक्तम्, प्रत्यक्षादिविषयेष्विव ब्रह्मणि शास्त्रप्रमाणविषयता नास्तीति; वास्तविकेन तु वृत्तेन न बाह्येष्वपि विषयेषु स्वविषयकाज्ञान-निवृत्तिव्यतिरेकेण स्वज्ञापनरूपो व्यापारोऽप्यस्ति प्रमाणानाम् । यथोक्तं माण्डूक्यभाष्ये– 'येषां पुनस्तमोऽपनयव्यतिरेकेण घटाधिगमे प्रमाणं व्याप्रियते, तेषां छेद्यावयवसंबन्धवियोगव्यतिरेकेणान्यतरावयवेऽपि

क्रियाभिर्व्याप्रियत इत्युक्तं स्यात् । यदा पुनर्घटतमसोर्विवेककरणे प्रवृत्तं प्रमाणम् अनुपादित्सिततमोनिवृत्तिफलावसानं छिदिरिव छेद्यावयवसंबन्धविवेककरणे प्रवृत्ता तदवयवद्वैधीभावफलावसाना, तदा नान्तरीयकं घटविज्ञानम्, न तत्प्रमाणफलम्' (मां. भा. ७, पा. १८७) इति । तस्मात् अनुपादित्सितवेद्यवेदितृवेदनादिभेदनिवर्तनेन शास्त्रं प्रमाणम्—इत्यतः शास्त्रयोनित्वं ब्रह्मणो नानुपपन्नमिति ज्ञेयम् । अधिकं त्वत्राविद्यानिवृत्तिविचारात् प्राक्प्रतानितादधिगन्तव्यमित्यलं पल्लवितेन ॥

८०. **अविद्याकल्पितत्वं वेद्यवेदितृवेदनादिभेदानामिति कथम्?** – ब्रह्मणः शास्त्रप्रमाणकत्वं कथम्? – इत्यत्रोपपत्तिं व्याख्यातारो विविधं कल्पयन्ति । तद्यथा (१) वेदान्तजन्यवृत्तिकृताविद्यानिवृत्तिफलशालितया शास्त्रप्रमाणकत्वम्; वृत्तिविषयत्वेऽपि स्वप्रकाशब्रह्मणो वृत्त्यभिव्यक्तफलस्फुरणाविषयत्वादप्रमेयत्वम् – इत्येके । अत्र वेदान्तजन्या वृत्तिरेव कीदृशी? तया अविद्यानिवृत्तिः कथङ्कारं क्रियते —इति तु न स्पष्टीकृतं तैः । अविद्यानिवृत्तिकृतफलशालित्वं वा कथं निर्विशेषे ब्रह्मणि? – इत्यपि न स्फुटितम् । (२) शास्त्रीयज्ञानाधीनस्फुरणवत्स्वरूपकर्मत्वाभावेऽपि अविद्याध्वस्त्यतिशयवत्त्वात् ब्रह्मणः शास्त्रीयत्वम् – इत्यपरे । अत्रापि अनाधेयातिशयस्वरूपस्य ब्रह्मणः कथमविद्याध्वस्त्यतिशयवत्त्वमिति न प्रतीयते । (३) अन्ये तु – 'सर्वमेव हि वाक्यं नेदंतया वस्तुभेदं बोधयितुमर्हति । न हीक्षुक्षीरगुडादीनां मधुररसभेदः शक्य आख्यातुम् । एवमन्यत्रापि सर्वत्र द्रष्टव्यम् । तेन प्रमाणान्तरसिद्धे लौकिक एवार्थे यदा गतिरीदृशी

शब्दस्य, तदा कैव कथा प्रत्यगात्मन्यलौकिके ? अदूरविप्रकर्षेण तु कथञ्चित् प्रतिपादनमिहापि समानम् । त्वंपदार्थो हि प्रमाता प्रमाणाधीनतया प्रमित्या प्रमेयं घटादि व्याप्नोति – इत्यविद्याविलसितम् । तदस्याविषयीभूतोदासीनतत्पदार्थप्रत्यगात्मसामानाधिकरण्येन प्रमातृत्वाभावात् तन्निवृत्तौ प्रमाणादयस्तिस्रो विधा निवर्तन्ते । न हि पक्तुरवस्तुत्वे पाक्यपाकपचनानि वस्तुसन्ति भवितुमर्हन्तीति ' इति व्याचक्रुः । अत्र शब्दस्य पदार्थसतत्वम् इदन्तया बोधयितुं नास्ति सामर्थ्यम् इत्येतावता ब्रह्मणोऽविषयत्वं कथं निर्णीयेत ? – इत्येतन्न विशदीकृतम् । एतावतैव च ' अदूरविप्रकर्षेण ब्रह्मप्रतिपादनमिति निगमनमपि न साध्विति वयं प्रतीमः । त्वंपदार्थस्याविषयीभूतोदासीनतत्पदार्थसामानाधिकरण्येन निर्दिष्टत्वात् प्रमातृत्वाभाव इति, ततश्च प्रमाणादयस्तिस्रोऽपि विधा निवर्तन्त इति तु परोक्षवस्तुकथनमेवेदं स्यात् , नानुभवारोपकम् । तस्मात् , नायमपि पन्था वेद्यवेदित्रादीनामविद्याकल्पितत्वोपपादने, तस्य च भेदस्य शास्त्रेणापनेयत्वसाधने वा इत्युत्पश्यामो वयम् ॥

कथं तर्हि कल्पितत्वं वेद्यादिभेदस्येति ? अत्राभिदध्महे – स्मर्यतामत्राध्यासभाष्यम् – ' **देहेन्द्रियादिष्वहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः** ' (सु.खं. ४१, पा. ५७) इति । इहापि चोक्तम्–अशरीरत्वं स्वाभाविकं जीवानाम्, अविद्याकृतं तु सशरीरत्वं संसारकारणम् (पा. ११६) इति । तदत्र देहादिष्वहंममेतिमिथ्याभिमानकृतत्वात् प्रमातृत्वस्य सर्वोऽप्ययं प्रमाणप्रमेयव्यवहारोऽविद्याकल्पित एव ; अस्या अविद्याया निवृत्त्यर्थमेव सर्वे

वेदान्ता आरभ्यन्ते इति प्रतिज्ञातम् । तस्मादविद्याकल्पितप्रमातृत्वबाधया आत्मैकत्वप्रतिपादनं वेदान्तार्थः– इति तत्रैव तेषां प्रामाण्यम्, न तु ब्रह्मात्मनोर्विषयीकरणे इति सर्वं सुस्थम् ॥

**८१. ब्रह्मणः सर्वथाप्यविषयत्वे शास्त्रं प्रमाणम्** – सर्वस्यापि प्रत्यगात्मत्वादविषयत्वेनैव ज्ञेयं ब्रह्म–इत्यत्र शास्त्रप्रमाणमुदाहरति–'**तथा च शास्त्रम् यस्यामतम्...**' इति। यस्य ब्रह्म अमतम् मनसो न विषयः–इति मतम् ; तस्यैव मतम्, सम्यज्ज्ञातं ब्रह्म ; यस्य तु मतं ब्रह्म ज्ञानेन विषयीकर्तुं शक्यम् – इति मतम्, न स वेद ब्रह्म – इति तलवकारश्रुतेरर्थः । विषयत्वेन साक्षात्क्रियते ब्रह्म इत्यभ्युपेयुषां ब्रह्मज्ञानं नास्त्येवेत्यवधार्यतेऽत्र । एतदेवोत्तरार्धेन स्पष्टीक्रियते '**अविज्ञातं विजानताम्**' इति। मनसो विषयत्वं पूर्वार्धेन प्रतिषिध्यते, बुद्धिविषयत्वं तूत्तरार्धेन – इति वा व्याख्येयो मन्त्रः ॥

'न दृष्टेर्द्रष्टारं पश्येः' (बृ- ३–४–२) इत्यादि वाजसनेयिब्राह्मणवचनम् । उषस्तं चाक्रायणं प्रति याज्ञवल्क्यस्य वचनमिदम् । चक्षुर्वत् विषयीकृत्य इदं तदिति ब्रह्म व्याचक्ष्व – इति, तदशक्यत्वान्न क्रियते । लौकिकदृष्टेरपि द्रष्टा ह्यात्मा तं केन कदा केन प्रमाणेन कथं वा शक्नुयाद् द्रष्टुम्! अतो न शक्नुयास्तं चक्षुषा विषयीकर्तुम्, प्रत्यगात्मनो विषयभूतया दृष्ट्या न पश्येः । सर्वकरणावभासको हि सः, अतो न कस्यापि विषयः – इति भावः । एवं विज्ञातेरपि बुद्धिवृत्तेर्विज्ञातारं स्वरूपभूतचैतन्येन व्याप्तारं न विजानीयाः । घटादिविषयानिव । अविषयत्वमेव हि स्वभाव आत्मनः – इत्यभिप्रायः ॥

८२. **अविद्याकृतभेदापनयनमेव शास्त्रकृत्यमित्यभ्युपगमे प्रयोजनान्तरम्** – तदेवम् अविषयस्यापि ब्रह्मणः शास्त्रप्रमाणकत्वमुपपद्यत इति स्थापयितुम् अविद्याकल्पितभेदनिवृत्तिमात्रं शास्त्रस्य कृत्यमित्युपपादकहेतुर्दर्शितः । अथेदानीमनेनैव हेतुना मोक्षस्यानित्यत्वं वारितं भवतीत्युपसंहारव्याजेनाह – 'अतः' इत्यादिना । अविद्याकल्पितम् आत्मनः सशरीरत्वलक्षणं संसारित्वम्, अशरीरत्वं तु मोक्षाख्यं ज्ञानफलम् – इति प्रागप्युपपादितमेव कर्मब्रह्मजिज्ञासयोः फलवैलक्षण्यप्रदर्शनप्रसङ्गेन । इदानीं तदेवानूद्य स्वपक्षो दृढीक्रियते कार्यानुष्ठानेन साध्यत्वाभ्युपगमे मोक्षस्यानित्यत्वमेव स्यादिति परपक्षेऽनिष्टं प्रसञ्जयितुम् इति विशेषः ॥

'तत्त्वमसि', 'अयमात्मा ब्रह्म' – इत्यादिशास्त्रवचनैर्हि जीवस्य संसारित्वमविद्याकृतम् अपबाध्य तस्य स्वाभाविकं ब्रह्मात्मत्वं ज्ञाप्यते । शास्त्रजन्यज्ञानं च विद्यां निवार्य तत्कृतं संसारित्वमपि बाधते । ततश्च नित्यमुक्तासंसारिब्रह्मस्वरूपता अस्य स्वयमेव प्रकाशते । एवं च मोक्षस्यापि ब्रह्मस्वरूपत्वेन न क्रियासाध्यत्वमिति नित्यत्वमुपपद्यते ॥

## १०. क्रियानुप्रवेशाभावे मोक्षस्योत्पाद्यत्वाद्यभावोऽपि हेतुः

( भाष्यम् )

**यस्य तूत्पाद्यो मोक्षः, तस्य मानसं वाचिकं कायिकं वा कार्यमपेक्षत इति युक्तम्, तथा विकार्यत्वे च ।**

तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम् । न हि दध्यादि विकार्यम्, उत्पाद्यं वा घटादि, नित्यं दृष्टं लोके । न चाप्यत्वेनापि कार्यापेक्षा, स्वात्मस्वरूपत्वे सत्यनाप्यत्वात् । स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वम्, सर्वगतत्वेन नित्याप्तस्वरूपत्वात् सर्वेण ब्रह्मणः, आकाशस्येव ॥

८३. अत्र मोक्षस्योत्पाद्यत्वादिनिराकरणे प्रयोजनम् — स्वपक्षे मोक्षस्यानित्यत्वदोषाभावः स्थापितः, अथेदानीं परपक्षे स दोषो यथा दुर्निवारणः, तथा प्रपञ्च्यते 'यस्य तूत्पाद्यो मोक्षः, तस्य मानसं वाचिकं कायिकं वा कार्यमपेक्षत इति युक्तम्; तथा विकार्यत्वे च । तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम्' इति । यद्यपि ज्ञानफलस्य मोक्षस्य अशरीरत्वलक्षणस्य नित्यत्वं न परिणामिनित्यत्वम्, किं तर्हि पारमार्थिकं कूटस्थनित्यत्वम् — इति प्रतिपिपादयिषता उत्पाद्यत्वादिविलक्षणत्वज्ञापकान्यपि विशेषणानि मोक्षस्योपात्तान्येव — तद्यथा 'पारमार्थिकम्' (नित्यत्वम्) इति कालाश्रितं घटादेरिव निराकृतम्; 'सर्वव्यापि' इत्याप्यत्वं निराकृतम्; 'सर्वविक्रियारहितम्' इति विकार्यत्वं निराकृतम्; 'निरवयवम्', 'स्वयंज्योतिःस्वभावम्' इति च दोषापनयनेन गुणाधानेन च संस्कार्यत्वं निराकृतम् इति — तथापि प्रतिज्ञामात्रं तत्, न तूत्पाद्यत्वाद्यभावे उपपत्तिरपि दर्शिता—इत्यतो वस्तुतन्त्रेण ज्ञानेन स्वविषयविषयकसतत्त्वतिरोधायकाविद्यालक्षणप्रतिबन्धनिवृत्तिमात्रं क्रियेत, न तस्य ज्ञानस्य कार्यानुप्रवेशितापि शक्या

अभ्यूहितुम्, सर्वथाप्यविषयस्य ब्रह्मात्मवस्तुनो ज्ञानक्रियाकर्मत्वेनापि कार्यानुप्रवेशो न शक्यकल्पनः – इति प्रतिपादनप्रसङ्गेन ब्रह्मज्ञानकृत्यविवेचने प्राप्ते निर्विशेषे स्वयंज्योतिषि नित्यसिद्धे ब्रह्मणि नैवास्ति ज्ञानेन कार्योऽतिशयः, अविद्याकल्पितविशेषापनयनमात्रं तु तत्र क्रियेत– इत्युपपादयितुं कार्यसाध्यातिशयम् उत्पत्त्यादिचतुष्टयत्वेन विकल्प्य ब्रह्मस्वरूपे मोक्षे तन्नास्तीत्युच्यते इत्यनवद्यम् ॥

**८४. मोक्षे नोत्पाद्यत्वविकार्यत्वाप्यत्वानि सम्भवन्ति –** यस्य तु कार्यविधिप्रयुक्तस्यैव ब्रह्मणः शास्त्रप्रमाणकत्वम्, तदुपासनेन च लभ्यो मोक्षः, तस्य पक्षे कार्यानुष्ठानेनैवोत्पाद्य इत्यतः, वाचिकम् अध्ययनादि, कायिकम् आसनादि, मानसं चोपासनं कार्यमपेक्षते सः– इति युक्तम् । अथ केचिदाहुः – संसारिणो ज्ञानध्यानाद्यनुष्ठानेन ब्रह्मस्वरूपप्राप्तिः स्यादिति ; तेषां पक्षे जीव एव ब्रह्मरूपेण विक्रियत इति विकार्यो मोक्षः । तेषामपि पक्षे कार्यमपेक्षेत मोक्ष इत्याह – **‘ तथा विकार्यत्वे ’** इति । तथा चानित्यत्वदोषः स्यादेव ; स चानिष्टः – इति भावः ॥

शास्त्रीयानुष्ठानसाध्यत्वात् तादृशोऽपि नित्यः स्यात् इत्याशङ्क्याह – **‘ तयोः पक्षयोर्मोक्षस्य ध्रुवम् अनित्यत्वम् ’** इति । कुतः ? **‘ न हि दध्यादि विकार्यम् उत्पाद्यं वा घटादि नित्यं दृष्टं लोके ’** । तत्सामान्यात् उत्पाद्यो विकार्यो वा चेन्मोक्षो तर्हि तस्यावश्यम् अनित्यत्वं भवेत् – इत्यभिप्रायः । उक्तं **चाभियुक्तैः** ‘ उपासनाश्रितो धर्मो जाते ब्रह्मणि वर्तते । प्रागुत्पत्तेरजं सर्वं

तेनासौ कृपणः स्मृतः ' (गौ. का. ३-१) इति । न हि तथ्यत एव जीवभावं गतो ध्यानाद्यनुष्ठानसामर्थ्यादमृतस्वभावं गच्छेत् । ' न भवत्यमृतं मर्त्यं न मर्त्यममृतं तथा । प्रकृतेरन्यथाभावो न कथञ्चिद्भविष्यति ' (गौ.का. ३-२१) इत्यभियुक्तवचनात् । तस्मात् तथ्यत एव ब्रह्म जीवभावं गतम्, तथ्यत एव च ध्यानाद्यनुष्ठानेन जीवोऽमृतो भविष्यति – इत्येष पक्षो न्यायबाह्यः, 'तत्त्वमसि' इत्यादिश्रुतिबाह्यश्च – इत्यभिप्रायः ॥

अथाऽऽप्यत्वेन मोक्षो नित्यः स्यात्, कार्यापेक्षश्च – इतिपक्षं प्रत्याह – ' न चाऽऽप्यत्वेनापि कार्यापेक्षा ' इति । तत्र हेतुः ' स्वात्मस्वरूपत्वे सत्यनाप्यत्वात् ' इति । ' अयमात्मा ब्रह्म ' (बृ.), ' तत्सत्यं स आत्मा ' (बृ.) इत्यादिश्रुतिप्रामाण्यान्मुमुक्षोः स्वात्मरूपमेव खलु ब्रह्म । न हि स्वात्मैव स्वात्मना कार्यानुष्ठानमपेक्ष्य प्राप्यत इति युक्तं स्याद् वच – इति भावः ॥

" ननु भवतु तर्हि स्वात्मव्यतिरिक्तमेव ब्रह्मेति ; अथवा स्वात्मत्वेऽपि कथञ्चित् श्रुतिप्रामाण्यात् प्राप्यत्वमप्युपपाद्यताम् ' एष म आत्माऽन्तर्हृदय एतद् ब्रह्मैतमितः प्रेत्याभिसम्भवितास्मि' (छां. ३-१४-४) इति हि श्रूयते । एतेन उपासनालक्षणप्रतिपत्तिविधिः, कालान्तरे ब्रह्मप्राप्तिश्च–इत्युभयमप्युपपादितं भवति "–इतिशङ्कां निवारयितुमाह– **'स्वरूपव्यतिरिक्तत्वेऽपि'** इत्यादि । अयमाशयः–' किं परमार्थदृष्ट्या जीवस्वरूपव्यतिरिक्तं ब्रह्म–इत्याश्रीयते, उत व्यवहारदृष्ट्या ? नाद्यः ; 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्यादिभिः श्रुतिभिर्जिज्ञासोः स्वरूपत्वेनैव

ब्रह्मण उद्घोष्यमाणत्वात् । अथ वैयात्याद् दर्शनान्तरीयाणामेव प्रक्रिया अवलम्ब्यते, तेषां मतेनापि 'नाप्यत्वम्; सर्वगतत्वेन नित्याप्तस्वरूपत्वात् सर्वेण ब्रह्मणः, आकाशस्येव'। द्वितीये तु कल्पे, अविद्याक्षेत्रे एवोपास्योपासकभेदाङ्गीकारात् अस्त्वपि कालान्तरे लोकान्तरे च प्राप्तिरपरब्रह्मणः, तत्रापि परमार्थज्ञानोदये अनाप्यत्वं ब्रह्मणो विज्ञायैव मोक्षः स्यादित्यविरोधः ॥

# नापि संस्कार्यत्वं मोक्षस्य

( भाष्यम् )

नापि संस्कार्यो मोक्षः, येन व्यापारमपेक्षेत । संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्यात्, दोषापनयनेन वा । न तावद् गुणाधानेन संभवति, अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य । नापि दोषापनयनेन, नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य । स्वात्मधर्म एव एव सन्, तिरोभूतो मोक्षः क्रियया आत्मनि संस्क्रियमाणे अभिव्यज्यते ; यथा आदर्शे निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वं धर्मः – इति चेत्, न ; क्रियाश्रयत्वानुपपत्तेरात्मनः । यदाश्रया क्रिया तम् अविकुर्वती नैवाऽऽत्मानं लभते । यद्यात्मा क्रियया विक्रियेत, अनित्यत्वमात्मनः प्रसज्येत । 'अविकार्योऽय-

मुच्यते' (गी. २–२५) इति चैवमादीनि वाक्यानि बाध्येरन्। तच्चानिष्टम्। तस्मात्, न स्वाश्रया क्रिया आत्मनः संभवति॥

अन्याश्रयायास्तु क्रियाया अविषयत्वात्, न तया आत्मा संस्क्रियते। ननु देहाश्रयया स्नानाचमनयज्ञोपवीतादिकया क्रियया देही संस्क्रियमाणो दृष्टः। न। देहादिसंहतस्यैव अविद्यागृहीतस्याऽऽत्मनः संस्क्रियमाणत्वात्। प्रत्यक्षं हि स्नानाचमनादेर्देहसमवायित्वम्; तया देहाश्रयया तत्संहत एव कश्चिदविद्यया आत्मत्वेन परिगृहीतः संस्क्रियते इति युक्तम्। यथा देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलम्, 'अहमरोगः' इति यत्र बुद्धिरुत्पद्यते; एवं स्नानाचमनयज्ञोपवीतादिना 'अहं शुद्धः संस्कृतः' इति यत्र बुद्धिरुत्पद्यते स संस्क्रियते; स च देहेन संहत एव। तेनैव हि अहङ्कर्त्रा अहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते; तत्फलं च स एवाश्नाति, 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' (मुं. ३-१-१) इति मन्त्रवर्णात्। 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (का. ३-४) इति च। तथा च 'एको देवः सर्वभूतेषु

गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥' (श्वे. ६-११) इति, 'स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्' (ई. ८) इति चैतौ मन्त्रौ अनाधेयातिशयतां नित्यशुद्धतां च ब्रह्मणो दर्शयतः। ब्रह्मभावश्च मोक्षः। तस्मात्, न संस्कार्योऽपि मोक्षः ॥

अतोऽन्यन्मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनचिद् दर्शयितुम्। तस्मात्, ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते ॥

८५. **संस्कार्यत्वपक्षे विशेषः** – संस्कार्यत्वपक्षे बहुवक्तव्यमस्तीति कृत्वा उत्पाद्यत्वादिकं पूर्वं निरस्य स पक्षोऽवशेषितः। इदानीं तमपि निराकुर्वन्नाह – '**नापि संस्कार्यो मोक्षः, येन व्यापारमपेक्षेत**' इति। संस्कार्यत्वे कथं व्यापारापेक्षा? तत्राह–'**संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्याद्दोषापनयनेन वा**'। उभयथापि संस्कारासंभवो मोक्षे। कुतः? तत्र विभज्योत्तरं वक्ष्यामीत्याह '**न तावद्गुणाधानेन संभवति**' संस्कारो मोक्षे, कुतः? '**अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य**'। ब्रह्म हि स्वभावतो नित्यशुद्धबुद्धमुक्तस्वरूपम्, सर्वज्ञं सर्वशक्तिसमन्वितं च – इत्युक्तं जिज्ञासाधिकरणे (जि. भा. ९–३०) तत्तादृशे वस्तुनि कमतिशयमादध्यात् संस्कारः? न चास्ति गुणो नाम ब्रह्मस्वरूपे निर्विशेषे, नापि

तद्व्यतिरिक्तो गुणः, अद्वितीयत्वाद् ब्रह्मणः । अपि च गुणेनातिशयश्चेदाधीयते ब्रह्मणि, तेनागन्तुकेन भाव्यम्, तथा चोपयन्नपयन्नंशो भवेदित्यतो तेन विक्रियते ब्रह्म – इत्यनिष्टप्रसङ्गः । अपाकृतश्च विकार्यत्वलक्षणो धर्मो ब्रह्मस्वभावानतिरिक्ते मोक्षे, विकार्यत्वे तस्यानित्यत्वमेव स्यादिति प्रसञ्जनेन । तस्मान्न तावद्गुणाधानेन संस्कार्यो मोक्ष इति स्थितम् ॥

'नापि दोषापनयनेन' । कुतः ? '**नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य**' । एतदपि नित्यशुद्धत्वं ब्रह्मणो ब्रह्मशब्दव्युत्पत्तेरेव सिध्यतीत्युक्तं यथोदाहृतजिज्ञासाधिकरणभाष्ये ॥

स्यादेतत् – न वयं संस्कारक्रियया ब्रह्मात्मनि मोक्षोऽभिनवः कार्य इति ब्रूमहे, किं तर्हि ? '**स्वात्मधर्म एव सन्, तिरोभूतो मोक्षः क्रियया आत्मनि संस्क्रियमाणे अभिव्यज्यते, यथादर्शे निघर्षणक्रियया संस्क्रियमाणे, भास्वरत्वं धर्मः**' इति । इदमत्राकूतम्–मोक्षः क्रियानुष्ठानसाध्यः–इत्यङ्गीकारे हि तस्यानित्यत्वप्रसङ्गः – न तु तथाङ्गीक्रियते, कथं तर्हि ब्रह्मविद्यालक्षणया क्रियया ब्रह्मस्वभावतिरोधायिका अविद्या अपनीयते ; स एवास्य संस्कारोऽस्तु । तेन च संस्कारेण तिरोधानापनये सति स्वात्मधर्म एव नित्यमुक्तत्वम् अभिव्यज्यते, अतो नानित्यत्वदोषः – इति ॥

अस्य कल्पस्य निराकरणम् '**न । क्रियाश्रयत्वानुपपत्तेरात्मनः**' इति । अत्र केचिद्व्याख्यातारो भाष्याशयं वर्णयन्ति– 'नाविद्या ब्रह्माश्रया, किं तु जीवे । सा त्वनिर्वचनीयेत्युक्तम् ।

तेन नित्यशुद्धमेव ब्रह्म । अभ्युपेत्य त्वशुद्धिं क्रियासंस्कार्यत्वं दूष्यते ' इति । तदेतद् भाष्यबाह्यं प्रक्रियारचनम् । न हि ब्रह्माश्रया वा अविद्या, जीवाश्रया वा ? -- इति विकल्पनं भाष्यसिद्धान्ते स्थाने स्यात् । ब्रह्मव्यतिरिक्तो जीवशब्दशब्दितश्चेतन एव तावन्नास्ति । 'नान्योऽतोऽस्ति द्रष्टा ' (बृ. ३-७-२३) इत्यादिश्रुतेः - इति खलु सिद्धान्तः । एकस्यैव तु भेदव्यवहारो जीवः, ब्रह्मेति चोपाधिकृतो यथा घटाकाशो महाकाश इति च-इति, भाष्ये प्रतिपदम् उपदिश्यते । तस्मात्, ब्रह्मण एवाविद्यातिरोहितस्वरूपत्वमापाद्योच्यते पूर्वपक्षिणा संस्कारेणाविद्यामलापनये सति ब्रह्मस्वरूपमभिव्यज्यत इति । तत्र 'संस्कारकर्मत्वमेव तावद् ब्रह्मणो नोपपद्यते; अविद्यया तत्स्वरूपं तिरोहितं चेत्, मिथ्याप्रत्ययप्रत्याख्यानेन ब्रह्मस्वरूपत्वमेवावेदयितव्यम् । न त्वनुपपद्यमानसंस्कारक्रियायां नियोजनीयो मुमुक्षुः ' - इति सिद्धान्ती प्रतिवदतीत्येव सम्यग्व्याख्यानं भाष्यस्येत्युत्पश्यामः ॥

कथं क्रियाश्रयत्वानुपपत्तिरात्मनः ? -- इत्याशङ्क्य स्वाशयमाविष्करोति सिद्धान्ती **'यदाश्रया क्रिया तमविकुर्वती नैवात्मानं लभते । यद्यात्मा क्रियया विक्रियेत अनित्यत्वमात्मनः प्रसज्येत '** इति । अयं भावः । युक्तं तावद् यदादर्शः सावयवः सन्, इष्टकाचूर्णादीना निघर्षणे स्वाश्रयं मलं विमुञ्चेत् इति ; निघर्षणक्रियाश्रयत्वोपपत्तेस्तस्य, तद्व्यतिरिक्तनिघर्षणकर्तुः सत्वाच्च । इह पुनर्ब्रह्मस्वरूपस्यात्मनो निरवयवत्वात्, अद्वयत्वाच्च न क्रियाश्रयत्वं स्वव्यतिरिक्तसंस्कर्ता वा समस्तीति वैषम्यम् । न च संस्कारेण

विकार्यत्वमात्मनोऽवकल्पते । 'अविकार्योऽयमुच्यते' (गी. २–२५) इति चैवमादीनि वाक्यानि बाध्येरन् । तच्चानिष्टम् । **तस्मात्, न स्वाश्रया क्रिया आत्मनः सम्भवति,** विक्रियमाणत्वे सति अनित्यत्वप्रसङ्गात् इति स्थितम् ॥

८६. **न चानात्मसंस्कारेणाऽऽत्मा संस्क्रियते** – ननु देहादिसंहतमात्मानं स्वीकृत्य शास्त्रे संस्कारा विधीयन्ते । तत्किमेतर्हि संस्कारविधायीनि शास्त्रवचनान्यप्रमाणान्येव ? – इत्याशङ्क्य तत्प्रामाण्यम् अविद्यावद्विषयम् इति परिहारः । 'तमेतमविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहाराः लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि' इत्युक्तमध्यासभाष्ये ; इह तु नित्यशुद्धत्वान्निर्विकारत्वाच्च ब्रह्मात्मतत्त्वं न संस्कार्यमित्युच्यते, अतो न विरोधः – इत्यभिसंधायाह **'अन्याश्रयायास्तु क्रियाया अविषयत्वात्, न तया आत्मा संस्क्रियते'** इति ॥

अत्राह पूर्वपक्षी – **'ननु देहाश्रयया स्नानाचमनयज्ञोपवीतादिकया क्रियया देही संस्क्रियमाणो दृष्टः'** इति । धर्मशास्त्रेषु–इति शेषः । अत्र परिहारः **'न । देहादिसंहतस्यैवाविद्यागृहीतस्याऽऽत्मनः संस्क्रियमाणत्वात्'** । संग्रहवाक्यं विवृणोति – **'प्रत्यक्षं हि स्नानाचमनादेर्देहसमवायित्वम् । तया देहाश्रयया तत्संहत एव कश्चिदविद्यया आत्मत्वेन परिगृहीतः संस्क्रियत इति युक्तम्'** इति । अयमभिप्रायः–चिदात्मा हि नित्यं विषयी विषयभूतेन धर्मेण न जातुचित् संसृज्यत इति स्पष्टम् । तथापि तस्यासङ्गस्यैव

देहादिसंहतत्वं प्रकल्प्य देहादेर्गुणदोषान् आत्मन्यध्यारोपयति लोकः। आत्मनश्च प्रत्यक्त्वादीन् अन्तःकरणादिष्वध्यारोप्य देहादिसङ्घाते एव अहंममेति बुद्धिं करोति। वस्तुतस्तु देहादिरनृतम्, नित्यसत्यस्वरूपे आत्मनि न कमप्यतिशयमाधातुमलम् – इति प्रतिपादितम् **अध्यासभाष्ये**। एवं स्थितेऽपि व्यवहारदृष्ट्या 'देहादिसंहतोऽहम्' इति मन्यते यः, तस्य ऐहिकामुष्मिकेष्टानिष्टप्राप्तिपरिहारोपायमन्वेषमाणस्य तादृशोपायभूतं कर्म निर्दिशति शास्त्रम्, तदेवं साध्यसाधनसंबन्धमात्रमुपदिशत् शास्त्रं क्रियाकारकफलविभागस्य सत्यतामसत्यतां वा न प्रतिजानीते – इति स्थितिः। तत्राविद्यावस्थायां क्रियाकारकफलभेदरूपम् अविद्याप्रत्युपस्थापितमपि सत्यत्वेनाभिनिविशमानः, 'प्रमाणभूतेन शास्त्रेण मम चोदितं कर्म, ममेदं कर्तव्यम्, अनेन चाहं कालान्तरे फलं भोक्ष्ये' इत्यभिमन्यते। तदेवम् आत्मनि देहादिसंहतत्वं क्रियाकर्तृत्वं फलभोक्तृत्वं चाध्यारोपितवत एव कर्मकृतः संस्कारो भवतीति शास्त्रेणोच्यते व्यवहारदृष्ट्या, न तु नित्यशुद्धस्यात्मन इति। तदिदमाविष्कर्तुमाह सिद्धान्ती '**कश्चित्** अविद्यया आत्मत्वेन परिगृहीतः संस्क्रियते' इति। तत्रैव लौकिकं कर्मफलभोक्तृत्वं दृष्टान्तत्वेनोदाहरति– "**यथा देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलम् 'अहम् अरोगः' इति यत्र बुद्धिरुत्पद्यते ; एवं स्नानाचमनयज्ञोपवीतादिना 'अहं शुद्धः' इति यत्र बुद्धिरुत्पद्यते स संस्क्रियते**" इति। दृष्टान्ते देहादिर्ममप्रत्ययविषयः, आत्मा तु तद्व्यतिरिक्तो यद्यपि, तथापि वातपित्तकफाख्य-

धातूनां वैषम्येण व्याधिग्रस्ते शरीरे 'अहम्' इत्यभिमन्यमानः, 'अहं रुग्णः' इति मन्यते; तथा चिकित्सया धातुसाम्ये संपादिते शरीरस्यारोग्येण आत्मानं एवेति मन्यते – इत्यविद्यैवैत्र देहधर्माध्यास आत्मनीति गम्यम् । एवं शास्त्रीयेणापि कर्मणा देहादिसङ्घाते व्यावहारिकदृष्ट्या संस्कृते 'अहमेव संस्कृतः, शुद्धो जातश्च' इत्यभिमन्यते आत्मयाथात्म्यज्ञानरहितत्वात् – इत्यर्थः ॥

८७. अहंप्रत्ययविषय आत्मा संस्कार्यः, तत्साक्षी तु शुद्धः – एवं तावद् यदुक्तम् 'अविद्यागृहीतस्याऽऽत्मनः कर्तृत्वभोक्तृत्वविशिष्टस्य संक्रियमाणत्वम्' इति, तदुपपादितमिति कृत्वा परिशेषमाह 'स च देहेनासंहत एव; तेनैव चाहङ्कर्त्रा अहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते तत्फलं च स एवाऽश्नाति' इति । नित्यशुद्धब्रह्मात्मा तावन्न स्वाश्रयया क्रियया संस्क्रियते; आत्माश्रयक्रियाया असंभवादेव; देहाद्यन्याश्रयायाः स्नानादिक्रियाया अपि तदन्यत्वात् न तत्संस्कारकत्वम् । अविद्यया आत्मत्वेन कल्पितोऽहंप्रत्ययविषय एव त्वात्मा तया संस्क्रियते व्यवहारदृष्ट्या इति यत् प्रतिज्ञातं तत्र श्रुतिमुदाहरति – 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति' (मुं. ३–१–१) इति । 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते' इति पूर्वार्धम् । द्वौ पक्षिणाविवैकं वृक्षम्, समानमेव शरीरं द्वौ आत्मानौ आश्रितवन्तौ । तत्रैकः क्षेत्रज्ञोऽहंप्रत्ययविषयः, कर्मफलं विचित्रमत्ति; अन्यस्तु तत्साक्षी, परमेश्वरो नित्यशुद्धबुद्धमुक्तस्वभावः, पश्यन्नेवावतिष्ठते, न तु

कर्मफलमश्नाति–इत्याथर्वणमन्त्रार्थः । 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (का. ३–४) इति काठकं वाक्यं रथादिरूपककल्पनया आत्मनः संसारगमनाय मोक्षगमनाय च प्रयोजकोपाधिजातोदाहरणप्रसङ्गेनोपन्यस्तम् । 'आत्मानं रथिनं विद्धि शरीरं रथमेव तु । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥' (का. ३–३, ४) इति । यमस्य वचनमिदं नचिकेतसं प्रति । तत्र संसारगमने मोक्षगमने चाधिकृत आत्मैव रथी, तस्य शरीरमेव रथः, बुद्धिः सारथिः, मनस्तु रशना, इन्द्रियाणि तु हयानि ; तानि हि शरीरमाकृष्य विषयेष्वेव प्रवर्तयन्तीति । अत्रोभयत्र शरीरेन्द्रियान्तःकरणलक्षणोपाधियुक्त एव संसारस्य मोक्षस्य च भोक्ता, परिशुद्धस्य तु निरुपाधिकस्य न भोक्तृत्वम् – इति श्रुतेरर्थः ॥

तदेवं शरीराद्युपाधिसंहतमेवात्मानमभिमन्यमानस्य कर्तृत्वं भोक्तृत्वं च – इति श्रुतियुक्तिभ्यां दर्शितम् । अथेदानीम् अहंप्रत्ययसाक्षिभूतस्य प्रत्यगात्माभिन्नस्य ब्रह्मणः संस्कार्यत्वाभावं दर्शयन्तौ मन्त्रौ समुदाहरति–'**एको देवः**' (श्वे. ६–११) इति । '**स पर्यगात्**' (ई. ८) इति च ॥

तत्र **श्वेताश्वतरवाक्यस्यायमर्थः** – एक एव देवश्चैतन्यस्वभावः, सर्वभूतेषु स्थितोऽपि दर्शनश्रवणादिकर्तृत्वरूपेण गृह्यमाणत्वाद् 'गूढः'; तत्तद्भूतदेहावच्छिन्नरूपेण गृह्यमाणोऽपि स्वेन रूपेण 'सर्वव्यापी सर्वभूतान्तरात्मा' च, न देशकालपरिच्छिन्नः, अहंप्रत्ययविषयात्मवत् ।

'कर्माध्यक्षश्च', धर्माधर्मफलदाता ; न तु देहसंहतात्मवत् कर्ता भोक्ता वा। 'सर्वभूताधिवासः', देहादिधर्मसंसर्गरहितः, आकाशवदसंसर्गित्वात्। देहस्थत्वादेव कर्मलिप्तत्वं स्यादस्येति शङ्कित्वा आह 'साक्षी' इति। साक्षित्वेनैव द्रष्टृत्वमस्य धर्मः स्यात्, 'साक्षाद्द्रष्टरि संज्ञायाम्' (पा. ५–२–९१) इति स्मरणात्, इति शङ्कायामाह – 'चेता' इति। नित्याविलुप्तचैतन्यस्वभावत्वमात्रेण अस्य साक्षित्वम्, न तु विपरिलोपि-दृष्टिकर्तृत्वात्–इति भावः। साक्षित्वं साक्ष्यापेक्षं स्यात्–इति मा शङ्की-त्याह 'केवलः' इति। अद्वितीयस्वभाव एव सन् साक्षीत्युपचर्यते ; स्वरूपेण तु निरपेक्षचैतन्यस्वरूप एवेत्यभिप्रायः। सर्वभूतेषु गूढत्वा-दयोऽस्य गुणाश्चेत्, परस्य विकार्यत्वमपि स्यादित्यत आह 'निर्गुणश्च' इति। तदेवं निर्विशेषचैतन्यमात्रस्वभावत्वात् तस्मिन् न पराश्रित-क्रियासंस्कार्यत्वसंभव इति मन्त्राभिप्रायः॥

वाजसनेयिमन्त्रार्थस्त्वयम् – स आत्मा 'पर्यगात्' सर्वगतः। शुक्राकायाव्रणास्नाविरत्वविशेषणानि स्थूलसूक्ष्मशरीरराहित्यद्योतनार्थानि। अशरीरस्वभावः इत्यर्थः। 'शुद्धम्', 'अपापविद्धम्' इति च अविद्या-तत्कृतधर्माधर्मराहित्यद्योतके विशेषणे। अविद्याकामकर्मरहितासंसारि-स्वभावोऽयमित्यभिप्रायः॥

मन्त्रद्वयविवक्षितमर्थं सङ्क्षिप्याऽऽह – 'इति चेतौ मन्त्रौ अनाधेयातिशयताम्, नित्यशुद्धतां च ब्रह्मणो दर्शयतः' इति। तथा च गुणाधानदोषापनयनयोरपेक्षा नास्ति तस्य – इत्यर्थो लभ्यते॥

८८. अहंप्रत्ययविषयस्याऽऽत्मनः कर्तृत्वं कथम् ? – अत्रेदं चिन्त्यम् – एकमेवाद्वितीयं तत्त्वं परमार्थसत्यम्, ततोऽन्यत् सर्वं वाचारम्भणं विकारो नामधेयम्–इति वेदान्तसिद्धान्ते स्थिते, कथमिदमुच्यते 'आत्मा स्वाश्रयया क्रियया न संस्क्रियते, स्वाश्रयक्रियाया एवासंभवात् । अन्याश्रयक्रियायास्तु अविषयत्वात्, तयापि न स संस्क्रियते ; तदन्य एव तु देहादिसंहत आत्मा कर्ता भोक्ता च संस्क्रियते देहाश्रयक्रियया ' इति ?

उक्तपरिहारमेतच्चोद्यं भाष्यकृता 'अविद्यागृहीतस्यात्मनः संस्क्रियमाणत्वात्' इति, उपपादितं चास्माभिस्तत्रैव (खं. ८६, पा. १६१) तदर्थविवेचन्याम् – इति नैष दोषः । यद्यपि नित्यशुद्धस्वभाव एवायमात्मा वस्तुतः, तथाप्यविद्यया अस्मत्प्रत्ययगोचरोऽपि भवति व्यवहारे ; तस्मिन्नेव च देहादिधर्मा अध्यस्यन्ते । उक्तं ह्यध्यासभाष्ये 'न तावदयमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात्' (सु.खं. १८) इति । न चैतावता आत्मद्वित्वं प्रसज्यते ; एकस्यैव ह्यात्मनः परमार्थरूपेण नित्यशुद्धत्वम्, अध्यस्ताहंप्रत्ययविषयत्वरूपेण तु कर्तृत्वं भोक्तृत्वं संस्कार्यत्वं चेत्यङ्गीकारात् । न चातस्मिंस्तद्बुद्धिलक्षणाध्यासमात्रेणात्मनि किञ्चिद्दोषासञ्जनं भवति । तथा हि तत्रैवाध्यासभाष्ये सुस्पष्टमुक्तम् – 'एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः' (सु.खं. ८, पा. ९०) इति ; 'तत्रैवं सति यत्र यदध्यासः तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न संबध्यते' (सु. ३४, पा. ५०) इति च । तदेवम्, अहंप्रत्ययरूपस्याऽऽत्मनः कर्तृत्वभोक्तृत्वाङ्गीकारोऽविद्याकृतव्यवहारदृष्ट्या । तस्यैव चाकर्तृत्वप्रतिज्ञानं परमार्थदृष्ट्या – इति न विरोधः कश्चित् ।

तदेवमविद्यया आत्मन्युपाध्यविवेकादध्यस्तैर्धर्मैस्तथ्यत एवात्मा न संसृज्यत इति नित्यशुद्धत्वमात्मनो न विहन्यते । यथोक्तं भगवद्गीतासु 'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् । विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् । शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः । न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥ तत्रैवं सति कर्तारमात्मानं केवलं तु यः । पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥' (गी. १८–१४, १५, १६) इति । व्याख्यातं चैतद् भाष्यकारेण । 'तत्रैतैरात्मानन्यत्वेन अविद्यया परिकल्पितैः क्रियमाणस्य कर्मणोऽहमेव कर्ता – इति कर्तारम् आत्मानं केवलं शुद्धं तु यः पश्यत्यविद्वान् ; कस्मात् ? वेदान्ताचार्योपदेशन्यायैरकृतबुद्धित्वात असंस्कृतबुद्धित्वात्– योऽपि देहादिव्यतिरिक्तात्मवादी आत्मानमेव केवलं कर्तारं पश्यति, असावपि अकृतबुद्धिः । अतो अकृतबुद्धित्वात् – न स पश्यत्यात्मनस्तत्त्वम्, कर्मणो वा – इत्यर्थः ।' (गी.भा. १८–१६) इति ॥

तदेवं नित्यमविषयिण एव सत आत्मनोऽविद्यया अहंप्रत्ययविषयत्वं कर्तृत्वभोक्तृत्वाध्यासश्च देहाद्यविवेकादित्यतो नात्मानेकत्वम्, वास्तविककर्तृत्वं वा समाश्रितं भवतीति सर्वमनवद्यम् ॥

## मोक्षस्य ज्ञानैकनिमित्तत्वम्

८९. **उत्पाद्यादिचतुष्टयव्यतिरिक्तं क्रियानुप्रवेशद्वारं नास्ति** – यदुक्तं प्रतिपत्तिविधिवादिना कार्यविधिप्रयुक्तस्यैव ब्रह्मणः सर्वत्र प्रतिपाद्यमानत्वम्, न स्वातन्त्र्येण तस्य शास्त्रप्रमाणकत्वमुपपन्नम् ; उपासनाक्रियानुष्ठानेनैव च शास्त्रदृष्टोऽदृष्टो मोक्षो भविष्यतीति–

तदेतद् क्रियानुष्ठानस्य मोक्षं प्रति हेतुत्वं तदैवोपपद्येत यदा मोक्षस्योत्पाद्यत्वाद्यन्यतमस्वभावः संभवेत् ; न त्वेतेषाम् अन्यतममपि क्रियानुप्रवेशद्वारं समस्त्यत्रेत्युपपादितम् । अथ स्यात्, पञ्चममन्यदेवेभ्यो द्वारं भविष्यतीति, नेत्याह – '**अतोऽन्यन्मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनचिद् दर्शयितुम्**' इति । न हि लोके वेदे वा एतच्चतुष्टयव्यतिरिक्तं क्रियाफलं प्रसिद्धमस्ति–इति भावः ॥

ननु तर्हि मोक्षप्रतिपत्तये साधनमेव नास्तीत्यापन्नम्, तथा च मोक्षप्राप्तये शास्त्रोपदेशारम्भ एवानुपपन्न इति प्राप्तम् । तत्राह – '**तस्मात्, ज्ञानमेकं मुक्त्वा**' इति । उक्तमेतद् ब्रह्मस्वभावे धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तेते – इति ; ब्रह्मज्ञानं न सम्पदादिरूपम् । अत एव न पुरुषव्यापारतन्त्रा ब्रह्मविद्या, किं तर्हि प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद् वस्तुतन्त्रा ; एवंभूतस्य ब्रह्मणस्तज्ज्ञानस्य च न कयाचिद्युक्त्या शक्यः कार्यानुप्रवेशः कल्पयितुम् – इति च । क्रियाफलत्वे च मोक्षस्यानित्यत्वमेव स्यादितीदानीमेव दर्शितम् । एतदेवेह पुनरपि स्मार्यते 'ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते' इति, ज्ञानविषये अधिकं किञ्चिद् विवक्षुणा – इत्यवधेयम् ॥

## ११. ब्रह्मात्मज्ञानं न क्रिया

( भाष्यम् )

**ननु ज्ञानं नाम मानसी क्रिया । न । वैलक्षण्यात् । क्रिया हि नाम सा यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते,**

पुरुषान्तरव्यापाराधीना च । यथा 'यस्यै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेद्वषट्करिष्यन्' (ऐ. ब्रा. ३–८–१) इति । 'सन्ध्यां मनसा ध्यायेत्' ( ? ) इति चैवमादिषु । ध्यानं चिन्तनं यद्यपि मानसम्, तथापि पुरुषेण कर्तुम्, अकर्तुम्, अन्यथा वा कर्तुं शक्यम्, पुरुषतन्त्रत्वात् । ज्ञानं तु प्रमाणजन्यम् । प्रमाणं च यथाभूतवस्तुविषयम् । अतो ज्ञानं कर्तुम्, अकर्तुम्, अन्यथा वा कर्तुम् अशक्यम्; केवलं वस्तुतन्त्रमेव तत्; न चोदनातन्त्रम्, नापि पुरुषतन्त्रम् । तस्मात्, मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यम् ॥

यथा च 'पुरुषो वाव गौतमाग्निः' (छां. ५–७–१), 'योषा वाव गौतमाग्निः' (छां. ५–८–१) इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति । केवलचोदनाजन्यत्वात् क्रियैव सा पुरुषतन्त्रा च । या तु प्रसिद्धेऽग्नौ अग्निबुद्धिः न सा चोदनातन्त्रा, नापि पुरुषतन्त्रा; किं तर्हि, प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेवैतत्, न क्रिया । एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम् ॥

९०. **पूर्वपक्षस्य किमुत्थानम् ?** – अत्र यदेव वितत्य प्रतिपादयितुमन्वारम्भेणोपसंहृतम् ‘ अतो ज्ञानमेकं मुक्त्वा ’ इत्यादिना, तदेव सदृष्टान्तं सप्रमाणं च दिदर्शयिषुः पूर्वपक्षमुत्थापयति – **‘ ननु ज्ञानं नाम मानसी क्रिया ’** इति । यथोक्तं ब्रह्मस्वरूपं तज्ज्ञानसतत्त्वं च प्रस्मृत्य–अथवा स्मरन्नपि तदनादृत्यैव–शङ्कते ‘ननु’ इति । अत्रायमाशयः–ज्ञानोपासनयोरेकत्वे सति, उपासनविधेरप्राप्तत्वात्, अपूर्वविधिरेवाश्रीयते ज्ञानकाण्डे । अत्र हि कचित् ‘ न स वेद ’ इति विदिनोपक्रम्य ‘ आत्मेत्येवोपासीत ’ (बृ. १–४–७) इत्युपासिना उपसंह्रियते ; कचिच्चोपासिनोपक्रम्य विदिनोपसंह्रियते । तद्यथा ‘ मनो ब्रह्मेत्युपासीत ’ (छां. ३–१८–१) इत्युपक्रमः, ‘ भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद ’ (छां. ३–१८–३) इत्युपसंहारः । तदेवं ज्ञानोपासनशब्दयोर्वेदान्तेष्वव्यतिरेकेण प्रयोगदर्शनात् ज्ञानमुपासनमेव । न च ‘यजेत’, ‘जुहुयात्’ इत्यादिभिः कर्मविधिभिः ‘द्रष्टव्यः’, ‘श्रोतव्यः’, ‘विजिज्ञासितव्यः’ इत्यादीनां विशेषोऽवगम्यते । यथा च दर्शपूर्णमासादिप्रकरणस्य दर्शपूर्णमासादिविध्युद्देशत्वेनोपयोगः, एवं ब्रह्मात्मोपासनाप्रकरणस्य आत्मोपासनाविध्युद्देशत्वेनैवोपयोगः । तथा चावोचाम – “ उपासनाविधानेषु सत्सु ‘ कोऽसावात्मा ? ’, ‘ किं तद्ब्रह्म ? ’ इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः ” (खं. २, पा. ९८) इति । अतो ज्ञानोपासनयोरेकार्थत्वेन ज्ञानं नाम मानसी क्रियैव, ज्ञानक्रियाया एवानुप्रवेशोऽत्र सुग्राह्यो मोक्षप्राप्तिं प्रति– इति मत्वा शङ्कते ‘ ननु ज्ञानं नाम मानसी क्रिया ’ इति ॥

९१. व्याख्यातृविशेषमतेन पूर्वपक्ष्याशयः – केचित्तु " ननु किं मोक्षे क्रियैव नास्ति, तथा च तदर्थानि शास्त्राणि, तदर्थाश्च प्रवृत्तयोऽनर्थकानीत्यत उपसंहारव्याजेनाऽऽह– ' तस्मात्, ज्ञानमेकं मुक्त्वा ' इति । अथ ज्ञानं नाम क्रिया मानसी कस्मान्न विधिगोचरा ? कस्माच्च तस्याः फलं निर्वर्त्यादिष्वन्यतरं न मोक्षः ? –इति चोदयति– ननु ज्ञानमिति " इत्युपसंहारभाष्यं पूर्वपक्षभाष्यवाक्यं च व्याचक्रुः । वयं तु मन्यामहे नेदं भाष्यकाराशयवर्णनम् – इति ; भाष्याक्षर-बहिर्भूतत्वात् । यथा चैतत् तथा अनुपदमेव भाष्याभिप्रायं विभज्य व्याख्याय प्रदर्शयिष्याम इत्यास्तां तावत् ॥

९२. ध्यानज्ञानयोर्वैलक्षण्यम् – पूर्वपक्षिमतं निराकरोति – ' न । वैलक्षण्यात् ' इति । संग्रहवाक्यं विवृणोति–' क्रिया हि नाम सा यत्र वस्तुस्वभावमनपेक्ष्यैव चोद्यते, पुरुषचित्त-व्यापाराधीना च ' । नायं स्वमतेन ज्ञानस्य क्रियात्वमभ्युपगन्तुं प्रक्रमः, " न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः, ' अन्यदेव तद्विदितादथो अविदितादधि ' इति विदिक्रियाकर्मत्वप्रतिषेधात् " इति (पा. १४०) ज्ञानक्रियाकर्मत्वस्य पुरस्तादेव निरस्तत्वात् । न हि ज्ञानं क्रियैव – इत्यभ्युपगम्य ब्रह्मणो ज्ञानक्रियाकर्मत्वेन कार्यानुप्रवेशो न भवतीति च वदन्नेव ' ज्ञानक्रियामेकां मुक्त्वा क्रियान्तरानुप्रवेशो न शक्यदर्शनः ' इत्यपि वदन् अव्याहतव्याहारः स्यात् कश्चिदिति ॥

तस्मात्, नायं ज्ञानस्य क्रियात्वमभ्युपगन्तुमवसरः, किं तर्हि यत्र यत्र 'ज्ञानान्मोक्षः' इत्युच्यते तत्र तत्रापवर्गपर्यन्तं ज्ञानमेव विवक्ष्यते,

ज्ञानेन हि प्रमाणफलभूतेन, अविद्यालक्षणप्रतिबन्धनिवृत्तौ नित्यसिद्धो मोक्षः प्राप्यत इति न मोक्षस्यानित्यत्वदोषः–इति यदुक्तं तत् स्मारयितुं ध्यानज्ञानयोर्वैलक्षण्यं च स्मारयितुमारम्भः ‘ क्रिया हि नाम सा ’ इत्यादिना । यत्र स्थले या वस्तुस्वरूपनिरपेक्षैव चोद्यते, पुरुषचित्तव्यापाराधीना च चोद्यते, सा तथाविधीयमाना हि क्रिया नाम –इत्यर्थः । तत्र दृष्टान्तः –‘ यस्यै देवतायै ’ इति । अध्वर्युणा हविषि गृहीते, उद्दिष्टदेवतां मनसा ध्यायेद् वषट्करिष्यन् होता । एवं सन्ध्याभिमानिनीं देवतां मनसा ध्यायेत् – इत्यादिस्थलेषु यत्र यत्र यथोपदेशं मनसा प्रयत्नपूर्वकं ध्यानं कर्तव्यतया विधीयते, तत्र तत्र ध्यानं विधीयमानं क्रियारूपमेव । कुतः ? न हि देवतास्वरूपं दृष्टवतो दर्शनानुसारेण तत्र चित्तवृत्तिरुदेति, कथं तर्हि, यथा यथा चोदितम्, तथा तथा पुरुषः स्वप्रयत्नेन चित्तवृत्तिं भावयति । तत्र ध्यानस्य चित्तव्यापाराधीनत्वं स्फुटयति ‘ ध्यानं चिन्तनं यद्यपि मानसम् ’ इति । ज्ञानवदेव मनोवृत्तिरूपं ध्यानं यद्यपि मानसम्, ‘ तथापि कर्तुमकर्तुम् अन्यथा वा कर्तुम् शक्यम्, पुरुषतन्त्रत्वात् ’ । यदा ध्यातुं सङ्कल्पयते तदा ध्यायति, यदा तु न सङ्कल्पयते तदा ध्यानादुपरमति । किञ्च यदैव चोदनानुसारेण ध्यातुमिच्छति, तदैव तथा ध्यायति ; यदा पुनर्नास्येच्छा तथा ध्यातुम्, तदा अन्यथापि ध्यातुं शक्नोत्येव स्वेच्छानुसारम् । तदेतत्कृतकम्, पुरुषतन्त्रत्वात् । न हि ध्यानं स्वयमेव तथा तथा आत्मानं लभते । अत एव शास्त्रेण चोद्यते, ‘इत्थमेव ध्यायेत्’ इति । अथ ज्ञानस्य ध्यानेन वैलक्षण्यं

प्रपञ्चयति – 'ज्ञानं तु प्रमाणजन्यम्' इत्यादिना । न हि प्रमाणजन्यं ज्ञानं स्वेच्छया कर्तुम्, अकर्तुम्, अन्यथा कर्तुं वा शक्यते। यथा तत्तदिन्द्रियसन्निकर्षेण शब्दस्पर्शादिज्ञानं जायमानं न पुरुषचित्तव्यापाराधीनम् ; न हि यत्नवतापि चक्षुषा शब्दः शक्यते ग्रहीतुम् ; कस्मात् ? तत्तदिन्द्रियसंनिकर्षेण तस्य तस्यैवार्थग्रहणस्य नियमेन स्वयं जायमानत्वात् । तदाह – '**अतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यम्, केवलं वस्तुतन्त्रमेव तत्। न चोदनातन्त्रम्, नापि पुरुषतन्त्रम्**' इति । एवमुपपादितं मानसयोरपि ध्यानज्ञानयोर्वैलक्षण्यं निगमयति – '**तस्मात् मानसत्वेऽपि ज्ञानस्य महद् वैलक्षण्यम्**' इति । समाने एव विषये जायमानयोर्ध्यानज्ञानयोर्मानसत्वेऽपि चोदनातन्त्रत्वतदभावाभ्याम्, पुरुषतन्त्रत्वतदभावाभ्यां च वैलक्षण्यं स्फुटयितुं दृष्टान्तमाह – "**'यथा च पुरुषो वाव गौतमाग्निः' (छां॰ ५–७–१), 'योषा वाव गौतमाग्निः' (छां॰ ५–८–१) इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति। केवलचोदनाजन्यत्वात् क्रियैव सा पुरुषतन्त्रा च**' इत्यादिना । अत्र हि पुरुषे योषिति च स्वभावतोऽग्नित्वं नास्त्येवेति वस्तुस्वरूपनिरपेक्षैव चोद्यते ध्यानक्रियेति स्पष्टम् । तदेतदाह '**केवलचोदनाजन्यत्वात्**' इति। प्रमाणाजन्यत्वात् इत्याशयेन 'केवल'त्वविशेषणं चोदनायाः। 'क्रियैव सा' इत्यवधारणं तु 'न ज्ञानम्' इत्याशयेन । 'पुरुषतन्त्रा च' इति वस्तुतन्त्रत्वव्यावृत्त्यर्थम् । इदानीमग्निबुद्धिरेव यदा ज्ञानं भवति, न क्रिया, तादृशं स्थलमुदाहरति –'**या तु प्रसिद्धे अग्नावग्निबुद्धिः,**

**न सा चोदनातन्त्रा, नापि पुरुषतन्त्रा, किं तर्हि प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेवैतत्, न क्रिया '** इति । प्रमाणजन्यत्वात्, प्रमाणस्य च यथाभूतविषयत्वात्, ज्ञानमेवैतत् – इत्यभिप्रायः । ज्ञानस्य क्रियात्वाभ्युपगमो न भाष्यकारमते इत्यत्रेदमेवावधारणं क्रियात्वप्रतिषेधश्च प्रमाणम् इति स्फुटम् ॥

प्रमाणजन्यं ज्ञानं सर्वत्रापि वस्तुतन्त्रमेवेत्येतन्निगमयति – **' एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम् '** इति । यथा प्रत्यक्षादिप्रमाणजन्यं ज्ञानं वस्तुतन्त्रमेवेति न क्रिया, एवं शब्दप्रमाणजन्यं ब्रह्मज्ञानमपि न क्रिया, ब्रह्मवस्तुतन्त्रत्वात् । तथा च कार्यविधिप्रयुक्त एव ब्रह्मणि शास्त्रं प्रमाणम् इति, ब्रह्मज्ञानं च मानसी क्रियैव – इति च न समीचीनं मतम् इत्यभिप्रायः ॥

**९३. ज्ञानं क्रियेति व्याख्यानकारमतं भाष्यविरुद्धम् –** तदेवं ज्ञानस्य क्रियात्वे कण्ठरवेण प्रतिषिद्धेऽपि यद्व्याख्यानप्रस्थानीया आहुः–(१) कथं वैलक्षण्यम् ? अजन्यफलत्वात् । इदमपरं वैलक्षण्यम् ज्ञानं न चोदनाजन्यम्, वस्तुजन्यं हि तत् । वस्तु च ज्ञानात् प्रागेव स्वरूपे व्यवस्थितम् ; अतस्तत्तन्त्रम् ज्ञानम् । न तत् ज्ञानेनान्यथाकर्तुं शक्यम् । अथापि स्यात्, भवेत्प्रत्यक्षं वस्तुजन्यम्, अनुमानादिषु कथम् ? तत्रापि लिङ्गादिपरतन्त्रम्, न चोदनायास्तत्रानुप्रवेशः । किञ्च न चोदनाजन्यं ज्ञानम् एकान्ततो वस्तुपरिच्छेदकम् ; योषादिष्वग्न्यादिदृष्टिविधानदर्शनात् । अतो वस्तुविषयस्य ज्ञानस्य क्रियात्वेऽपि न चोदनाजन्यत्वम्, न वा पुरुषतन्त्रत्वम्, अपि तु प्रमाणवस्तु-

चलनात्मकम्' (पं.पा., पा. ११६५) इत्येके। (२) सत्यं ज्ञानं मानसी क्रिया, न त्वियं ब्रह्मणि फलं जनयितुमर्हति, तस्य स्वयं-प्रकाशतया विदिक्रियाकर्मभावानुपपत्तेरित्युक्तम्। तदेतस्मिन् वैलक्षण्ये स्थित एव वैलक्षण्यान्तरमाह – 'क्रिया हि नाम सा' इति। .... न हि 'यस्यै देवतायै हविर्गृहीतं स्यात्, तां ध्यायेद्वषट्करिष्यन्' इत्यस्माद्विधेः प्राक् देवताध्यानं प्राप्तम्, प्राप्तं त्वधीतवेदान्तस्य विदितपदतदर्थसंबन्धस्य, अधिगतशब्दन्यायतत्त्वस्य 'सदेव सौम्येदम्' इत्यादेः 'तत्त्वमसि' इत्यन्तात् संदर्भात् ब्रह्मात्मभावज्ञानं शब्दप्रमाण-सामर्थ्यात्, इन्द्रियार्थसंनिकर्षसामर्थ्यादिव प्रणिहितमनसः स्फीतालोक-मध्यवर्तिकुम्भानुभवः। न ह्यसौ स्वसामर्थ्यबललब्धजन्मा सन् मनुजेच्छया अन्यथा कर्तुम् अकर्तुं वा शक्यः, देवताध्यानवत्; येनार्थवानत्र विधिः स्यात्। न चोपासना वा अनुभवपर्यन्तता वा अस्य विधेर्गोचरः; तयोरन्वयव्यतिरेकावधृतसामर्थ्ययोः साक्षात्कारे वा, अनाद्यविद्यापनये वा विधिमन्तरेण प्रसत्त्वेन पुरुषेच्छया अन्यथाकर्तु-मकर्तुं वा अशक्यत्वात्। तस्मात्, ब्रह्मज्ञानं मानसीक्रियापि न विधिगोचरः'(भा.पा.१२८,१२९) इत्यपरे। तदेतदुभयमपि व्याख्यानं भाष्याक्षरबहिर्भूतमिति स्पष्टम्; केवलचोदनाजन्यत्वात्, 'क्रियैव सा' पुरुषतन्त्रा च' इति ध्यानस्य क्रियात्वमवधार्य 'ज्ञानमेवैतत् न क्रिया' इति च ज्ञानस्य सावधारणं क्रियात्वप्रतिषेधाद् भाष्ये। यत्तु द्वितीय-व्याख्यायां प्रस्थानान्तरावलम्बनं ज्ञानजन्मानन्तरमुपासनं तेन च साक्षात्कारः – इत्यादि, तदपि भाष्यबहिर्भूतं यद्यपि, तथापि न

प्रकृतोपयोगी तद्विमर्शः – इत्युपेक्ष्यते । प्रकृतं तु ज्ञानस्य क्रियातो वैलक्षण्यप्रतिपादनपरोऽयं भाष्यभागः, न तु ज्ञानस्य क्रियात्वमभ्युपगम्यापि तस्य विधिगोचरत्वप्रतिषेधपर इत्यलं पल्लवितेन ॥

९४. **ज्ञानं प्रमाणजन्यमिति कथम् ?** – सर्वप्रमाणविषयवस्तुष्वपि वस्त्वनुरूपं प्रमाणानुगुणं च ज्ञानं जायते, अतो मानसत्वेऽपि ज्ञानस्य ध्यानक्रियातो महद् वैलक्षण्यम् – इति यदुच्यते भाष्यकारेण, तत्रेदं विवेचनीयमस्ति । यद्यपि लोके प्रमाता प्रमाणानां व्यापारयिता प्रमाणजन्यज्ञानेन प्रमेयं जानाति, तत्र जायमानं ज्ञानं फलरूपम् तत्तद्विषयावगतिरनुभवादिशब्दवाच्या–इति व्यवहारोऽस्ति, तथापि बुद्धेरुपाधिलक्षणायाश्चक्षुरादिद्वारैः विषयाकारेण परिणामिन्या ये रूपाद्याकारावभासाः, ते जायमाना आत्मचैतन्यरूपमाश्रिता तद्व्याप्ता एव जायन्ते, त एव च ज्ञानशब्दवाच्या आत्मनो धर्माः – इति व्यवह्रियन्ते लौकिकैः । तत्र तत्तद्विषयाकारप्रत्ययान्ते जायमानमिव विभाव्यमानं फलरूपं विज्ञानं तु नित्यसिद्धकूटस्थावगतिरूपं नित्यसिद्धात्मस्वरूपमेव सदपि तत्तद्वृत्तिलक्षणोपाधिवशात्, तदात्वे एव उत्पन्नमिव लक्ष्यते, प्रत्यक्षादिप्रत्ययस्य अनित्यत्वेन स्वयमपि अनित्यमिव भवति । तत्रैवं स्थिते विषयदर्शनाद्यर्थं यत् प्रणिधानकरणम्, तदिच्छाप्रयत्नादिसाध्यत्वात् कर्तृतन्त्रमिति कृत्वा ‘ विदिक्रिया ’ इति व्यपदिश्यते । सा चेयं विदिक्रिया न ब्रह्म व्याप्तुं शक्तेत्यतः श्रूयते ‘ येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयात् ’ (बृ. २–४–१४) इति । तदेतदभिप्रेत्य ‘ न च

विधिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः ' इत्युक्तं भाष्यकृता प्राक् (पा. १४०)। तदेवं प्रमाणं व्यापारयतोऽपि ज्ञेयाभिमुखस्य ज्ञानं फलभूतं कदाचिज्जायते, कदाचिन्न जायते इति वक्ष्यति। " लोकेऽपि 'इदं पश्य', 'इदमाकर्णय'– इति चैवञ्जातीयकेषु निर्देशेषु 'प्रणिधान-मात्रं कुरु ' इत्युच्यते, न ' साक्षाज्ज्ञानमेव कुरु ' इति " (सू. भा. ३–२–२१) इति। एवं जायमानं ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तु-मशक्यमितीहोच्यते। तदेतदपि वक्ष्यत्युदर्के भाष्यकृत् ' तस्मात् तं प्रति ज्ञानविषय एव दर्शयितव्यो ज्ञापयितुकामेन। तस्मिन् दर्शिते स्वयमेव यथाविषयं यथाप्रमाणं च ज्ञानमुत्पद्यते ' (सू.भा. ३–२–२१) इति। तत्र विषयानुसारेण जायमानं वृत्तिरूपं ज्ञानं यद्यपि मानसम्, तथापि न पुरुषतन्त्रमितीहोच्यते; प्रत्ययावसाने अभिव्यज्यमानं त्ववगति-रूपं कूटस्थनित्यचैतन्याव्यतिरिक्तमिति तत्रांशे ज्ञानं प्रमाणजन्यमिति वाचोयुक्तिरुपाध्यपेक्षया औपचारिक्येवेत्यदोषः॥

# १२. ब्रह्मज्ञानविषये श्रूयमाणानां लिङादीनां गतिः

( भाष्यम् )

तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम्। तद्विषये लिङादयः श्रूयमाणा अपि,

अनियोज्यविषयत्वात् कुण्ठीभवन्ति उपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत् ; अहेयानुपादेयवस्तुविषयत्वात् । किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः' (बृ. २–४–५) इत्यादीनि विधिच्छायानि वचनानि ? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानि इति ब्रूमः । यो हि बहिर्मुखः प्रवर्तते पुरुषः 'इष्टं मे भूयात्, अनिष्टं मा भूत्' इति, न च तत्रात्यन्तिकं पुरुषार्थं लभते, तम् आत्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसङ्घातप्रवृत्तिगोचराद् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि । तस्य आत्मान्वेषणाय प्रवृत्तस्य अहेयम् अनुपादेयं चाऽऽत्मतत्त्वम् उपदिश्यते 'इदं सर्वं यदयमात्मा' (बृ. २–४–६), 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् ... केन कं विजानीयाद् ... विज्ञातारमरे केन विजानीयात्' (बृ. ४–५–१५), 'अयमात्मा ब्रह्म' (बृ. २–५–१९) इत्यादिभिः ॥

९५. ब्रह्मात्मज्ञानं न चोदनातन्त्रम् – तदेवं ज्ञानं न क्रिया, प्रमाणजन्यत्वात्, वस्तुतन्त्रत्वाच्च – इति सामान्यतोऽनुभवारूढं कारयित्वा ब्रह्मात्मज्ञानमपि तथैवेत्यतिदिशति 'तत्रैवं सति' इति । तयोर्ज्ञानध्यानयोर्मध्ये प्रमाणजन्यं वस्तुविषयं ज्ञानं न चोदना-

[illegible] इति स्थिते, ब्रह्मात्मज्ञानमपि वेदान्तप्रमाणजन्यत्वात्, प्रमाणभूतब्रह्मात्मवस्तुविषयत्वाच्च न चोदनातन्त्रं भवितुमर्हति। तद्विषये लिङादयः श्रूयमाणा अपि कुण्ठीभवन्ति उपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत्; कुतः? अनियोज्यविषयत्वात्। न हि असति नियोज्ये नियोगविषये वा कर्तव्यविधिः स्वात्मानं लभते। ननु कुत एतत्? तत्रापि साधको नियुज्यताम्। ज्ञानमेव तत्र नियोगविषयो भविष्यति – इत्याशङ्क्य नियोज्यविषययोरभावे हेतुमाह 'अहेयानुपादेयवस्तुविषयत्वात्' इति। न हि ब्रह्म मुमुक्षोरात्मभूतमेव सत्, हेयम् उपादेयं वा भवितुमर्हति अनात्मविषयत्वाद्धानोपादानयोः। न चात्मैवात्मनो हेयः, उपादेयो वा; न चासति हेये उपादेये वा कश्चिन्नियुज्येत। न च नित्यतृप्तब्रह्मस्वरूप एव ब्रह्मात्मा नियोज्य इति संभवति। नाप्यपुरुषतन्त्रे ज्ञाने नियोगविषयता संभवति क्रियानुष्ठाने इव। तत्रैवं सति यदुच्यते नियोगवादिना 'आत्मा वा अरे द्रष्टव्यः' इत्यादिविधानेषु सत्सु दर्शनादिविषयभूतं ब्रह्मात्मवस्तु समर्पयच्छास्त्रं तत्र प्रमाणं भवतीति तदसदिति [illegible]भिप्रायः। न हि दर्शनविषयादिज्ञानं चोदनातन्त्रम्, [illegible] स्यादिति भावः॥

९६. **द्रष्टव्यादिवचनानां गतिः** – अत्र नियोगवादी शङ्कते – '**किमर्थानि तर्हि?**' – इति। किमेतर्हि ज्ञानप्रकरणे श्रूयमाणानां लिङ्-लोट्-तव्यादीनां निरर्थकतैव, यावता श्रूयमाणान्यपि कुण्ठीभवन्तीत्युच्यते? अस्मत्पक्षे तु द्रष्टव्यादिशब्दाः क्रियाविधिपरा

इति सार्थका भवेयुः । श्रूयन्ते च विधिच्छायानि वचनानि ; न च तेषां विध्यर्थकता न युक्ता स्वाध्यायविध्यधीनग्रहणानामिति भावः । न वैयर्थ्यं तेषाम्, अन्यथैव सार्थक्योपपत्तेः, इत्याह सिद्धान्ती – ‘स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः’ इति । संग्रहवाक्यं विवृणोति – ‘यो हि’ इत्यादिना । “आत्यन्तिकपुरुषार्थवाञ्छिनं प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति ‘आत्मा वा अरे द्रष्टव्यः’ इत्यादीनि वचनानि” । अयमभिप्रायः – यद्यपि ज्ञाने न विधिः संभवति, तथापि या स्वाभाविकी अविद्यास्वभावनिमित्ता कार्यकरणसङ्घातप्रवृत्तिः, तद्गोचरात् पुरुषं विमुखीकृत्य आत्यन्तिकपुरुषार्थहेतुभूतप्रत्यक्प्रवणतायां प्रवर्तयन्ति तानि वचनानि । बहिर्विषयप्रवणा हि निसर्गतो जन्तवः । कश्चिदेव तु विवेकी शास्त्रदृष्टिमवलम्ब्य प्रत्यगात्मदर्शनाय प्रयतत इति । तदुक्तं श्रुत्या ‘पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराङ् पश्यति नान्तरात्मन् । कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्’ (का. ४–१) इति । अतो ‘लिङादिश्रवणान्यथानुपपत्त्या कार्यविधिरभ्युपगन्तव्यः’ इतिनिर्बन्धो निरर्थकः – इत्यभिप्रायः ॥

एतेन यद्व्याख्यानप्रस्थानान्तरम् – अत्रामृतत्वसाधनम् आत्मदर्शनमनूद्य मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नामाङ्गि विधीयते । तदधिकार्यादिनिर्णयार्थमेव हि प्रथमं सूत्रं प्रवृत्तम् । अत इह श्रवणादीनां विहितत्वं न निराक्रियते, किं तर्हि ज्ञानस्य विधेयत्वम् । अत एवेह “किमर्थानि तर्हि ‘आत्मा वा अरे

द्रष्टव्यः श्रोतव्यः ' इत्यादीनि विधिच्छायानि वचनानि " इति शङ्कायां पूर्वपक्षिणोपस्थापितायामपि, उपसंहारे श्रवणपदं प्रविहाय "प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि " इति दर्शनमात्रस्य विधेयता प्रतिषिद्धा–इति, तदपि दूरोत्सारितं वेदितव्यम् । तेषामपि प्रत्यगात्माभिमुखीकरणेनैव सार्थक्ये सिध्यति सति, अविधिप्रकरणेऽपि विहितत्वकल्पनायां कारणाभावात् । सर्वत्र हि आत्मज्ञानप्रकरणे श्रूयमाणानि विधिच्छायानि एवमेव नेयानीति न्यायोपबृंहितभाष्यवाक्यादेवावगम्यते । उदाहारि च भाष्यवचनं दर्शनश्रवणादिविधिच्छायेषु वचनेषु प्रणिधानमात्रे पुरुषो नियुज्यते, न तु सर्वथा ज्ञानमेव विधित्स्यत (पा. १७७) इति । यथा च जिज्ञासासूत्रं सर्वथा न विधिविचारपरं तथा जिज्ञासासूत्रभाष्यार्थविवेचन्यां प्रपञ्चितम् (खं. ५३, ५४, ५५) इत्यलमिह विस्तरेण ॥

९७. **द्रष्टव्यादिश्रुतीनामविधिपरत्वं वाक्यशेषेणापि गम्यते** – इतश्च न द्रष्टव्यादिविधिच्छायानि वचनानि ज्ञानविधायकानि, यत्कारणं तानि पुरुषार्थवाञ्छिनं पुरुषं प्रत्यगात्मस्रोतस्तया प्रवर्तनेनैव कृतार्थानि भवन्ति नातःपरं विधिवाक्यवत् स्वार्थपरिपूर्त्यर्थं किम्, केन, कथम् ?–इति नैवाकाङ्क्षाम् उत्थापयन्ति । अत एव हि वाक्यशेषे केवलमात्मतत्त्वमेवोपदिश्यते, उपदेशजन्यं च ज्ञानं तावतैवाज्ञानप्रहाणद्वारा मुमुक्षुं कृतार्थयति । तदेतदाह – **तस्यात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चाऽऽत्मतत्त्वमुपदिश्यते** ' इति । न ह्यहेयमनुपादेयं च तत्त्वं ज्ञातं सत् प्रवृत्तिं निवृत्तिं वा समाकाङ्क्षते,

येन विधिप्रयुक्तमेव तदुपदिश्यत इति कल्प्येत । सर्वव्यापारोपशम-हेतुर्हि उपदेशवाक्यजन्यं ज्ञानम् -- इति भावः ॥

यथा स्वात्मज्ञाने जाते न प्रवृत्तिर्न वा निवृत्तिः काचिदवकल्पते, तथाऽनुभवारूढं कर्तुं तत्त्वोपदेशीन्येव वाक्यान्युदाहरति – '**इदं सर्वं यदयमात्मा**' इत्यादीनि । 'आत्मा वा अरे द्रष्टव्यः' इत्यमृतत्वकामेनाऽऽत्मैव द्रष्टव्यो नानात्मा इति प्रत्यगात्मप्रवणतामापाद्य तत्र हेतुं वाक्यशेषेणाह याज्ञवल्क्यः 'आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्' (बृ. २–४–५) इति । अत्र हि क्रियाकारकफलात्मकमविद्याविषयम् उपमर्दयन्नाह आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवतीति । अविद्याकल्पितस्य सर्वविकल्पास्पदभूतादात्मनो व्यतिरेकेणाभावादेव स्वात्मनि विज्ञाते न पृथग्विज्ञेयत्वेनान्यदवशिष्यत इत्येतद्द्रढयितुं पुनरप्याह – '**इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदं सर्वं यदयमात्मा**' (बृ. २–४–६, ४–५–७) इति । न ह्यपेतब्रह्मक्षत्रादिभेदे असंसार्यात्मतत्त्वेऽद्वैते विज्ञातेऽपि सर्वकार्यविरोधिनि पुनरपि ब्रह्मोपासनादि कर्तव्यमवशिष्यते इति शक्यं कल्पयितुम् । '**यत्र त्वस्य सर्वमात्मैवाऽभूत्तत्केन कं पश्येत् ... केन कं विजानीयाद्विज्ञातारमरे केन विजानीयात्**' (बृ. ४-५-१५) इति । द्रष्टव्यादिवाक्यशेषभूतमेतत् । तत्र हि आत्मैकत्वविज्ञानावस्थायां दर्शनश्रवणमननादीनि सर्वथा न संभवन्ति नित्यविज्ञानस्वरूपं विज्ञातारं विज्ञातुं कस्यचिदपि करणस्याभावात्–इति सर्वक्रियाकारकफलप्रतिषेध

एव विद्यते । तथा ‘ अयमात्मा ब्रह्म ’ (बृ. २–५–१९) इति वाक्यं मधुब्राह्मणान्ते मधुविद्यास्तुत्यर्थमानीतमपि व्याख्येयम् । तत्र हि ‘ इदं सर्वं यदयमात्मा ’ (बृ. २–४–६) इति द्रष्टव्यवाक्यशेषे यदुक्तं प्रतिज्ञामात्रेण, तदुपपादितम् । ‘ सर्वस्यापि जगतः आत्मत एवोत्पत्तिस्तत्रैव स्थितिर्लयश्च ’ इति । तस्य निगमनमस्यां मधुविद्यायां क्रियते ‘तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः’ इति । न चात्र कस्यचित्कार्यस्यानुष्ठातव्यस्याऽवकाशोऽस्ति । ब्रह्मात्मतत्त्वप्रतिपादन एव पदसमन्वयात् ; ‘ इत्यनुशासनम् ’ (बृ. २–५–१९) इति विद्यापरिसमाप्तिवचनाच्च । यदपि ज्योतिर्ब्राह्मणस्थं वाक्यम् ‘ स वा अयमात्मा ब्रह्म विज्ञानमयः ’ (बृ. ४–४–५) इत्यादि, तदपि ‘ कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु ’ (बृ. ४–३–७) इति प्रश्नप्रतिवचनरूपेण प्रक्रमात्, ‘ योऽयमात्मा उपाधिनिमित्तं संसरतीव, स परमेव ब्रह्म ’– इत्येवं पदसमन्वयात्, ब्रह्मात्मतत्त्वोपदेशपरमेव, न तु कस्यचिन्नियोगस्य शेषत्वेनाऽऽत्मानं समर्पयतीति स्फुटम् ॥

तदेवमन्यत्रापि यत्र यत्र विधिच्छायानि वचनानि ‘ आत्मेत्येवोपासीत ’ (बृ. १–४–७), ‘ आत्मानमेव लोकमुपासीत ’ (बृ. १–४–१५) इत्यादीनि समुपलभ्यन्ते तत्र सर्वत्रापि स्वाभाविकप्रवृत्तिविषयविमुखीकरणपूर्वकं प्रत्यगात्मस्रोतस्तया चित्तप्रवर्तने वाक्यतात्पर्यम्; यानि तु जिज्ञासोरात्मतत्त्वोपदेशीनि, तानि तावतैवोपक्षीणानि न तु क्वचित् प्रवर्तयन्ति कुतश्चिन्निवर्तयन्ति वेति वाक्यसमन्वयात् स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकम् । न तु विधिशेषतयेति सिद्धम् ॥

# १३. आत्मज्ञाने सर्वकर्तव्यताहानिः, कृतकृत्यता च

( भाष्यम् )

यदप्यकर्तव्यप्रधानम् आत्मज्ञानं हानाय उपादानाय वा न भवतीति, तत् तथैवेत्यभ्युपगम्यते । अलङ्कारो ह्ययमस्माकं यद् ब्रह्मात्मावगतौ सत्यां सर्वकर्तव्यताहानिः, कृतकृत्यता च – इति । तथा च श्रुतिः 'आत्मानं चेद् विजानीयादयमस्मीति पूरुषः । किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ॥' (बृ. ४-४-१२) इति । 'एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ॥' (गी. १५-२०) इति च स्मृतिः । तस्माच्च प्रतिपत्तिविधिविषयतया ब्रह्मणः समर्पणम् ॥

९८. वस्तुमात्रबोधकस्यापि शास्त्रस्य सप्रयोजनत्वमस्ति– अथेदानीं नियोगवादिनः शङ्कान्तरमनूद्य समाधत्ते – यदपीत्यादिना । उक्तमेतत् पूर्वं शङ्कावादिना 'वस्तुमात्रकथने हानोपादानासंभवात् वेदान्तवाक्यानामानर्थक्यमेव स्यात्' (पा. १०२, १०३) इति । तत्र यद्यपि पूर्वं समाधानमुक्तमेव 'संसारित्वभ्रान्तिनिवर्तनेन अर्थवत्त्वं स्यात्' इति, तथापि तत्रापि पूर्वपक्षिणा यच्छङ्कान्तरमुत्थापितं तत्समाधानमुत्तरत्र वक्ष्यामीति कृत्वा आनर्थक्यपरिहारायैव तावत् समाधानान्तरमाह–'तत्तथैवेत्यभ्युपगम्यते' इति । आत्मज्ञानं हानाय, उपादानाय

वा न भवत्येव – इत्यभ्युपगम्यते, इष्टापत्तिरेव सा – इत्यभिप्रायः । कथमेतदिति ? तत्रोत्तरम् 'अलङ्कारो ह्ययमस्माकं यद् ब्रह्मात्मावगतौ सत्यां सर्वकर्तव्यताहानिः कृतकृत्यता च – इति ।' यत्र हि ज्ञातव्यम् उपादातव्यं वा नावशिष्यते, तत्र सर्वकर्तव्यताहानेः परमपुरुषार्थप्राप्तिरेवेति भूषणमेवैतन्न दूषणमित्यर्थः । श्रुत्याप्येतदेवोच्यत इत्याह – 'तथा च श्रुतिः' इति । आत्मानं सर्वस्यापि साधारणं परमात्मानमेव साक्षात् 'अयमहमस्मि' इति विजानीयाच्चेत्–'चेत्' इति विज्ञानस्य दौर्लभ्यमाह । पुरुषेषु सहस्रेषु कश्चिदेव हि परमात्मानमहमयमस्मीति साक्षाद्विजानीयात् इत्यभिप्रायः – तदा परमात्मन्येवाऽऽत्मत्वेन विज्ञाते 'किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ?' 'किमिच्छन् ?' इतीच्छाविषयाक्षेपः, द्वितीयस्येच्छाविषयस्याभावात् । 'कस्य कामाय ?' इति आत्मनः परस्य वा आत्मीयत्वेनाभिप्रेतस्य कृते । अतितीयमेवाऽऽत्मानं स्वात्मत्वेन विज्ञातवांस्तु परमार्थतोऽशरीर एव भवतीत्यतः शरीरमनुसंज्वरेदिति कथं युज्यते ? – इत्याक्षेपात् , ज्ञानी कृतकृत्यः – इत्युक्तं भवति ॥

एवं स्मृतिरपि वक्तीत्याह – 'इति च स्मृतेः' इति । सकलशास्त्रार्थ एतावानेव यत् परमात्मतत्त्वं क्षराक्षराभ्याम् उत्तममिति । अत एतद्रहस्यं बुद्ध्वा बुद्धिमान् स्यात् , नातःपरं बोद्धव्यमवशिष्यते ; न चैवं विज्ञातवतः कर्तव्यतावशिष्यते इति कृतकृत्योऽप्यसौ–इति हि भगवानाह । तस्मात् , ब्रह्मात्मावगतौ परमपुरुषप्राप्तेः सर्वकर्तव्यताहानिः स्यादित्यलङ्कार एवास्माकम् – इति साधूक्तम् इत्यभिप्रायः ॥

९९. उपसंहारः — पूर्वपक्षनिराकरणम् उपसंहरिष्यन्नाह — 'तस्मात्' इति । (१) कर्मकाण्डे भव्यो धर्मो जिज्ञास्यः, इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यम्—इति जिज्ञास्यवैलक्षण्यात्, (२) कर्मब्रह्मविद्याफलयोः सशरीरत्वनिमित्तभाविसुखदुःखभोगतारतम्यवत्त्वेन, प्रियाप्रियसंस्पर्शरहितनित्यसिद्धाशरीरत्वेन च वैलक्षण्यात, (३) अशरीरत्वस्य च कूटस्थनित्यब्रह्मस्वभावत्वेन कर्मकार्यवैलक्षण्यात्, (४) ब्रह्मविद्यासमनन्तरमेवाविद्यारूपप्रतिबन्धमात्रनिवृत्त्या मोक्षप्राप्तेः न्यायोपबृंहितश्रुतिभिरुद्घोषणात्, (५) ब्रह्मात्मैकत्वविज्ञानस्य संपदादिरूपत्वासंभवात्, (६) श्रुतिप्रमाणजन्याया अवगतेः प्रत्यक्षादिप्रमाणविषयवस्तुवद् वस्तुतन्त्रत्वेन पुरुषव्यापारतन्त्रत्वानुपपत्तेः, (७) ब्रह्मणश्च विद्युपास्तिक्रियाकर्मत्वाभावात् कार्यानुप्रवेशासंभवात्, (८) शास्त्रस्याविद्याकल्पितभेदनिवृत्तिपरत्वादेव ब्रह्मणः शास्त्रयोनित्वोपपत्तेः, (९) अत एव च शास्त्रसमर्पितस्य ब्रह्मात्मतालक्षणस्य मोक्षस्यानित्यत्वदोषवारणात्, (१०) ब्रह्मस्वरूपभूतस्य मोक्षस्य उत्पाद्यादिचतुर्विधद्रव्यविलक्षणत्वादपि नित्यत्वोपपत्तेः, (११) शास्त्रोक्तसंस्कारस्य चाविद्याकल्पितशरीरादिसंहतात्मविषयत्वेनैवोपक्षयात्तच्छास्त्रविरोधाभावात्, (१२) ज्ञानमेकं मुक्त्वा क्रियानुप्रवेशस्य कथमप्यनुपपत्तेः ; ज्ञानध्यानयोश्च वस्तुतन्त्रत्वेन चोदनातन्त्रत्वेन च वैलक्षण्याज्ज्ञानस्य क्रियात्वानुपपत्तेरेव चोदनातन्त्रत्वासंभवात्, ज्ञानविषये श्रूयमाणानां लिङादीनां बहिर्मुखपुरुषस्य प्रत्यगात्माभिमुखीकरणमात्रेण विधिच्छायत्वोपपत्तेर्न विधिशेषत्वं ब्रह्मण इत्यर्थः ॥

यदप्युच्यते ज्ञानस्याकर्तव्यप्रधानत्वे हानोपादानार्थत्वासंभवात्, तदुपदेशस्यानर्थक्यमेव स्यादिति, तदप्यदूषणम् ; हातव्योपादातव्यानवशेषादेव सर्वकर्तव्यहानिः कृतकृत्यता च भविष्यतीति ब्रह्मात्मज्ञानात्परमपुरुषार्थः- इति सिद्धान्तस्य भूषणमेव तत् स्यादिति । तस्मान्न प्रतिपत्तिविधिविषयतया ब्रह्मसमर्पणमिति साधूक्तमित्यभिप्रायः ॥

# १४. केवलवस्तुवाद्यपि वेदभागोऽस्ति

( भाष्यम् )

यदपि केचिदाहुः – ‘ प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण केवलवस्तुवादी वेदभागो नास्ति ’ इति, तन्न । औपनिषदस्य पुरुषस्य अनन्यशेषत्वात् । योऽसौ उपनिषत्स्वेव अधिगतः पुरुषोऽसंसारी ब्रह्म, उत्पाद्यादिचतुर्विधद्रव्यविलक्षणः, स्वप्रकरणस्थोऽनन्यशेषः । नासौ नास्ति नाधिगम्यत इति वा शक्यं वदितुम्, ‘ स एष नेतिनेत्यात्मा ’ (बृ. ३-९-२६, ४-२-४, ४-४-२२, ४-५-१५) इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुमशक्यत्वात्, य एव निराकर्ता तस्यैवाऽऽत्मत्वात् ॥

नन्वात्मा अहंप्रत्ययविषयत्वात् उपनिषत्स्वेव विज्ञायत इत्यनुपपन्नम् । न । तत्साक्षित्वेन प्रत्युक्त-

त्वात् । न हि अहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी, सर्वभूतस्थः, समः, एकः, कूटस्थनित्यः पुरुषः, विधिकाण्डे तर्कसमये वा केनचिदधिगतः, सर्वस्याऽऽत्मा । अतः स न केनचित् प्रत्याख्यातुं शक्यः, विधिशेषत्वं वा नेतुम् । आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः । सर्वं हि विनश्यद् विकारजातं पुरुषान्तं विनश्यति । पुरुषो विनाशहेत्वभावादविनाशी, विक्रियाहेत्वभावाच्च कूटस्थनित्यः, अत एव नित्यशुद्धबुद्धमुक्तस्वभावः । तस्मात्, 'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः' (का. ३–११) । 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ. ३–९–२६) इति चौपनिषदत्वविशेषणं पुरुषस्योपनिषत्सु प्राधान्येन प्रकाश्यमानत्वे उपपद्यते । अतः, भूतवस्तुपरो वेदभागो नास्तीति वचनं साहसमात्रम् ॥

१००. औपनिषदः पुरुषोऽप्रत्याख्येयः – अथैवं सर्वथापि प्रतिपत्तिविधिशेषत्ववादे निरस्ते, केचिन्नियोगवादिनो वस्तुमात्रप्रतिपादको वेदभागो नास्त्येवेति वैयात्यात् प्रत्यवतिष्ठन्ते ; तन्मतमुत्थापयति – 'यदपि केचिदाहुः' इत्यादिना । अत्र, ये केचिदर्वाचीनवेदान्तिनः, भक्त्युपासनादिशब्दवाच्यविधेयप्रतिपत्तिमेव मोक्षसाधनब्रह्मविद्यात्वेनातिष्ठन्ते 'नास्त्येव वस्तुमात्रसमर्पकं वेदान्त-

वाक्यं कञ्चिदपि ' इति दुराग्रहग्रस्ताः, ते सर्वेऽप्येतत्पूर्वपक्षिभुजावलम्बित्वेन संगृहीता भवन्ति । तदेतादृशां सर्वेषामपि पूर्वपक्षिणाम् एकेनैव प्रयत्नेन दूरीकरणार्थमाह – ' **न, औपनिषदपुरुषस्यानन्यशेषत्वात्** ' इति ॥

संग्रहवाक्यार्थं विवरीतुकाम आह – ' **योऽसावुपनिषत्स्वेवाधिगतः पुरुषः** ' इत्यादि । इदमत्रानुसंधेयम् – ' ज्ञानकाण्डत्वेन समाख्यातो वेदभागः, उपनिषच्छब्दवाच्यः कर्मकाण्डाद् विलक्षणः, स्वासाधारणाभिधेयभूतम् आत्मैकत्वज्ञानमेव ज्ञापयन् प्रमाणं भवतीति प्रतिज्ञातम् अध्यासभाष्ये ' **अस्यानर्थहेतोः प्रहाणाय, आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते** ' इति । तस्यास्य प्रतिज्ञातस्यार्थस्य न्यायतो निर्णयार्थं शारीरकमीमांसाप्रवृत्तिरित्यभिप्रायेण ' **यथा चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः** ' (सु. खं. ९, पा. ९५) इति चोक्तम् । यद्यपि सन्त्येव कानिचिदभ्युदयसाधनार्थानि उपासनावाक्यानि कानिचिच्च कर्मसमृद्ध्यर्थोपासनापराणि च कर्मवाक्यसमानयोगक्षेमाण्यत्रापि, तथापि न तेषां वेदान्तासाधारणाभिधेयसमर्पकत्वमस्ति । यद्यपि च कानिचिदुपासनारूपमानसकर्तव्योपदेशीन्यपि सन्त्येव, यत्र ब्रह्मणः कार्यविधिप्रयुक्तस्यैव प्रतिपाद्यत्वम् ; तथापि तेषां ब्रह्मलोकप्राप्त्यनन्तरं जायमानेन ज्ञानेन क्रममुक्तिः फलं श्रूयत इति, न तेषामप्यत्रासाधारणाभिधेयसमर्पकत्वं समस्ति । अथ च केचिद् वावदूकाः कार्योपासनाविधिशेषत्वेनैव ब्रह्मणोऽत्रोपयुक्तत्वं मत्वा प्रवृत्तिनिवृत्तिपरत्वमेव शास्त्रस्य शास्त्रशब्दवाच्यत्वे प्रवृत्तिनिमित्तमित्यभिनिविष्टाः । अतोऽत्र

तानेव वादिनोऽभिलक्ष्य अस्ति सिद्धवस्तुबोधकोऽपि भागोऽत्र ज्ञानकाण्डे; ब्रह्मरूपं सिद्धवस्त्वेव चात्र प्राधान्येन प्रतिपाद्यते, सा च ब्रह्मप्रतिपत्तिर्वस्तुतन्त्रैव न चोदनातन्त्रोपासनालक्षणा – इत्युपपिपादयिषुराह भाष्यकृत् **'योऽसावुपनिषत्स्वेवाधिगतः पुरुषः'** इत्यादिना **'अनन्यशेषः'** इत्यन्तेन विशेषणपूगेन पुरुषं विशिंषन् ॥

अत्र पुरुषस्य विधिशेषत्वव्यावर्तकानि विशेषणान्यनुक्रामति – असंसारीत्यादीनि । तत्र **'असंसारी'** इति यथाप्रसिद्धजीवव्यावृत्तिः; **'ब्रह्म'** इति, कार्यधर्मव्यावृत्तिः; **'उत्पाद्यादिचतुर्विधद्रव्यविलक्षणः'** इति, कर्माङ्गकर्मफलयोर्व्यावृत्तिः । **'स्वप्रकरणस्थः'** इति, विध्यपेक्षितकर्तृदेवतासगुणब्रह्मणां व्यावृत्तिः; न ह्ययं प्रत्यस्तमितसमस्तविशेष आत्मा कर्मप्रकरणे उपासनाप्रकरणे वा प्रकृतः, किं तु आत्मस्वरूपप्रतिपादनार्थमेवारब्धे प्रकरणे । तथा हि शाकल्यब्राह्मणे तावत् – शरीरहृदयवायवोऽन्योन्यप्रतिष्ठाः सङ्घातेन नियता यदर्थप्रयुक्ता वर्तन्ते तस्य निरुपाधिकं स्वरूपं साक्षान्निर्देष्टव्यमिति 'स एष नेतिनेत्यात्मा' (बृ. ३–९–२६) इत्युच्यते । एवं जनकयाज्ञवल्क्यसंवादेऽपि 'इतो विमुच्यमानः क्व गमिष्यसि' (बृ. ४–२–१) इति पृष्टो जनकः 'नाहं तद्भगवन्वेद' इति प्रत्युक्तवान्; तं प्रतिबोधयितुं प्रवृत्तो याज्ञवल्क्यः, वैश्वानरतैजसप्राणात्मनः क्रमेण बोधयित्वा प्राणात्मानमपि प्रत्यगात्मन्युपसंहृत्य तुरीयमात्मानं प्रतिपद्यते इति दर्शयितुं 'स एष नेतिनेत्यात्मा' (बृ. ४–२–४) इत्युक्त्वा तेनैवात्मना विदितेन कृतार्थतां जिज्ञासोराह 'अभयं वै जनक प्राप्तोऽसि' (बृ. ४-२-४)

इति । अतः स्वप्रकरणे एवायमात्मा अनन्यशेषः प्रोक्त इति गम्यते । तथा ज्योतिर्ब्राह्मणेऽपि 'कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु' (बृ. ४–३–७) इति प्रक्रम्य विज्ञानात्मनोऽवस्थात्रयसञ्चारमुत्क्रान्तिगतिक्रमं च परीक्ष्य याज्ञवल्क्यो मोक्षस्वरूपं निर्दिश्यान्ते उपसंजहार 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु .... स एष नेतिनेत्यात्मा' (बृ. ४–४–२२) इति । एवं मैत्रेयीब्राह्मणे 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्' (बृ. ४–५–६) इत्यात्मज्ञानमेव प्रक्रम्य 'स एष नेतिनेत्यात्मा' इत्युपसंहृत्य 'उक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वम्' इति तावतैव मैत्रेय्याः कृतकृत्यतां वदन् याज्ञवल्क्य आत्मप्रकरणस्थमेवानन्यशेषं पुरुषमाहेति गम्यते ॥

तदेवंविशेषणविशिष्टः पुरुषः 'नास्ति नाधिगम्यत इति वा न शक्यं वदितुम्' । कुतः? यथोक्तप्रकारेण 'स एष नेतिनेत्यात्मा' (बृ.) इत्यसकृदुपदेशात् । तत्र कथं तावन्नास्त्यसौ इत्यशक्यं वदितुम्? तत्राह – 'इत्यात्मशब्दात्' इति । कथं पुनर्नासौ नास्तीति वदितुमशक्य इत्यात्मशब्दग्रहणमात्रादवगम्यते? तत्रोत्तरम्–'आत्मनश्च प्रत्याख्यातुमशक्यत्वत्वात्' । कथमशक्यत्वं प्रत्याख्यातुम्? 'य एव निराकर्ता तस्यैवाऽऽत्मत्वात् ।' श्रुतिर्हीमं पुरुषम् आत्मशब्देन व्यपदिशति । आत्मशब्दश्च मुख्यवृत्त्या प्रत्यगात्मवाचकः । न केवलं रूढ्या किं तु यौगिकत्वपक्षेऽप्यात्मशब्दः प्रत्यगात्मन्येव वर्तते, 'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।

यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते ॥ '(  ?  ) इति स्मृतेः[1] । न हीदृशः सर्वस्याऽऽत्मा प्रत्याख्यातुं शक्यः । न हि ऋते निराकर्तारं निराकरणमात्मानं लभते इत्यभिप्रायः । न च स्वात्मैव सन्, अभ्यासेन 'नेतिनेत्यात्मा' इति सर्वविशेषप्रत्याख्यानेन प्रतिपाद्यमानो 'नाधिगम्यते' इति शक्यं वदितुम् । अधिगमो ह्यनधिगतस्य प्रमेयस्य 'भवेद्वा न वा' इति शङ्क्यमानस्य प्रमाणेन कर्तव्यो भवति । न तु शङ्कितुरात्मैव नित्याधिगतस्वरूपोऽपि सन्नात्मपरिच्छित्तये प्रमाणमपेक्षत इति युक्तम् । तस्मादौपनिषदः पुरुषो नास्तीति वा, असकृदुपदिष्टोऽपि नाधिगम्यत इति वा, न शक्यं वक्तुमिति स्थितम् ॥

**१०१. उपनिषत्प्रतिपाद्य आत्मा नाहंप्रत्ययविषयः —** श्रोतुरात्मैवाऽऽत्मा इत्युक्ते आत्माभासमेवात्मत्वेन प्रतिपद्यमानः पूर्वपक्षी शङ्कते – '**नन्वात्माऽहंप्रत्ययविषयत्वात् उपनिषत्स्वेव विज्ञायत इत्यनुपपन्नम्**' इति । अयमाशयः – भवेदेतदेवं यदि लोकवेदप्रसिद्धादहंप्रत्ययविषयाद् व्यतिरिक्तः कश्चिदन्योऽप्यात्मा समस्ति । अहंप्रत्ययविषय एव ह्यात्मा नाम । स च कर्ता भोक्ता, क्रियाविधिशेषश्च वेदे । न तु निरस्तसमस्तविशेष आत्मा लोके प्रसिद्धोऽस्ति, न चासौ उपनिषत्सूपदिश्यमानोऽपि शक्य अधिगन्तुम् । कथं चोपनिषदः सर्वविशेषरहितमात्मशब्देन प्रत्याययितुं शक्नुयुः ।

1. कुत्रत्यमिदं वाक्यमिति न विज्ञायते । काठकभाष्येऽपि (२–१–१) एतद्वाक्यमुदाहृतम् । बृहदारण्यकवार्तिकेऽपि (१–४–७३७) एव श्लोक उदाहृतः । व्यासवाक्यमिति तु टीकाकारः ॥

न ह्यहंप्रत्ययविषयश्च निर्विशेषश्च – इत्यन्याहतं स्याद् वच इति । आत्मा मानसप्रत्यक्षगम्य इति मीमांसकाः, अहंप्रत्ययविषयत्वलिङ्गेनानुमेय इति तार्किकाश्च मन्यन्ते । तर्कपराहतश्चायं तद्व्यतिरिक्तात्मवादः । तस्मादुपनिषत्स्वपि स एवायमहंप्रत्ययविषय आत्मा विज्ञायत इति ॥

प्रत्याह सिद्धान्ती – '**न, तत्साक्षित्वेन प्रत्युक्तत्वात् ।**' इति । अयमभिप्रायः – बाढम्, अस्ति लोके शास्त्रान्तरे चाहंप्रत्ययविषयत्वेन प्रसिद्ध आत्मा ; स तु देहेन संहतोऽविद्ययाऽऽत्मत्वेन परिगृहीत इत्यवोचाम । स एव च क्रियाविधिशेषः ; तथा चावोचाम 'तेनैव ह्यहंकर्त्रा अहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निर्वर्त्यन्ते, तत्फलं च स एवाश्नाति' (पा. १५७) इति । तत्साक्षी त्वयमौपनिषदः पुरुषः इहास्माभिर्नेतिनेतीतिवचनबलादुच्यमान आत्मा इति न कश्चिद्विरोधः – इति । संगृहवाक्यं विवृणोति '**न ह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः समः एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा**' इति । अयं ह्यात्मा अहंप्रत्ययविषयस्यापि साक्षी, 'अनश्नन्नन्योऽभिचाकशीति' (मुं. ३–१–१) इति श्रुतेः । तथैव विद्वदनुभवाच्च । एष हि **सर्वभूतस्थः**, न तु कर्त्रात्मवत् केवलम् एकस्मिन्नेव कार्यकरणसङ्घाते स्थितः । **समः, एकः, कूटस्थनित्यश्च** ; न तु अहंप्रत्ययविषयात्मान इव प्रतिशरीरं स्वस्वकर्मानुसारेण वैषम्येन स्थितः, अनेकः, तत्तत्कर्मवशात् विक्रियमाणश्च । एतमेवात्मानमौपनिषदं पुरुषमातिष्ठामहे वयम् ; न ह्येवंविध आत्मा अन्यत्र प्रसिद्ध इत्याह–

न हि एतादृशः ' **पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्याऽऽत्मा** ' इति । अत एवेदृशम् ' आत्मतत्त्वं न कर्माधिकारे अपेक्ष्यते, अनुपयोगात्, अधिकारविरोधाच्च ' ( सु. पा. ७१ ) इत्यत्रोचामाध्यासभाष्ये – इति भावः । प्रतिज्ञातार्थमुपसंहरति – ' **अतः स न केनचित् प्रत्याख्यातुं शक्यः, विधिशेषत्वं वा नेतुम्** ' इति । आत्मत्वादेव प्रत्याख्यातुमशक्यः, अहंप्रत्ययविषय-कर्तृविलक्षणत्वादेव च विधिशेषत्वं नेतुमशक्यः – इति भावः । इतश्च विधिशेषतां नेतुमशक्य इत्याह ' **आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः** ' इति । हानोपादाने हि विधेः प्रयोजनम् । सर्वेषा-मात्मत्वात्तु नायं हेयः, नाप्युपादेयः । आत्मनोऽन्यद् हि हेयं वा स्यादुपादेयं वा, न स्वयमेव स्वस्य हेयो वा उपादेयो वा । एकस्यैव कर्मकर्तृत्वविरोधात् – इति भावः ॥

१०२. पुरुषे क्रियासाध्यातिशयाभावादेव न विधि-शेषता – एतावता, विक्रियाहेत्वभावादेव पुरुषस्य विधिशेषत्वासंभव इत्युक्तम् । अविक्रियत्वं च पुरुषस्य यथोपपादितस्वभावत्वादेव सेत्स्यतीति स्फुटयन्, तत्स्वभावनिरूपकाणि विशेषणान्यनुक्रामति – ' **सर्वं हि विनश्यद् विकारजातं पुरुषान्तं विनश्यति । पुरुषो विकार-हेत्वभावादविनाशी विक्रियाहेत्वभावाच्च कूटस्थनित्यः, अत एव नित्यशुद्धबुद्धमुक्तस्वभावः** ' इति । सर्वं हि विकारजातम् असद्रूपं विकल्पमात्रम् । ' वाचारम्भणं विकारो नामधेयम् ' (छां. ६–१–४) इति श्रुतेः । ' नासतो विद्यते भावः ' (गी. २–१६)

इति स्मृतेश्च । सर्वं हि विकारभूतं निरूप्यमाणं स्वकारणव्यतिरेकेणानुपलब्धेरसदेवेति निश्चीयते । अतोऽन्ततो गत्वा सर्वं विकारजातं सर्वविकल्पास्पदभूते पुरुषे दृष्टे तदन्तं विनश्यति, रज्ज्वां दृष्टायां सर्पादिविकल्पजातमिवेत्यर्थः । तर्हि पुरुषोऽपि तद्वदेव विनश्येद् इत्याशङ्क्य नेत्याह – '**पुरुषो विनाशहेत्वभावादविनाशी**' इति । विनश्यन् हि पदार्थः सावयवत्वादिहेतौ सति विनश्येत्, न तु निष्कले पुरुषे स्वतो हेतुरस्ति विनाशे; परतस्तु विनाशो न समस्ति, अद्वितीयत्वात्–इत्यर्थः । अत एव परिणामलक्षणविक्रियाभावात् कूटस्थनित्यः । 'अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा' (बृ. ४–५–१४) इति श्रुतेः । 'अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् । विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति' (गी. २–१७) इति स्मृतेश्च । तदेवं '**विक्रियाहेत्वभावाच्च कूटस्थनित्यः**' । '**अत एवा**'नाधेयातिशयनित्यस्वभावत्वात्, '**नित्यशुद्धबुद्धमुक्तस्वभावः**' । न त्वस्मिन् अहंप्रत्ययविषयत्वलक्षणे कर्त्रात्मनीव, अधर्माद्यशुद्धिः, अज्ञानादिक्लेशः, जन्मकर्मादिकृतबन्धो वा विद्यते इति भावः । तस्मात्, 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः ॥' इत्युक्तेभ्य इन्द्रियादिभ्य उत्तरोत्तरं सूक्ष्मतरमहत्तरप्रत्यगात्मभूतवस्त्वन्तरवद्भ्यः सर्वेभ्योऽपि सूक्ष्मतरत्वात्, परममहत्त्वात् सर्वप्रत्यगात्मत्वाच्च '**पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः**' (का. ३–११) इति श्रुतिरुद्घोषयति । अतः सुष्ठूक्तं स न केनचित्प्रत्याख्यातुं शक्यो विधिशेषत्वं

वा नेतुम् । आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः – इतीत्यभिप्रायः ॥

१०३. **अनन्यशेषः पुरुषो श्रुत्यैकसमधिगम्य इत्यत्र गमकम्** – तदेवं न्यायोपबृंहितश्रुत्या विधिशेषत्वरहिते पुरुषे दर्शितेऽपि स एव तात्पर्येण प्रतिपिपादयिषित उपनिषत्सु – इत्यत्र किमस्ति गमकम् ? – इति प्रश्नस्यापाकरणार्थम् उपक्रमे समुपन्यस्तम् औपनिषदत्वविशेषणं स्मारयति **" 'तं त्वौपनिषदं पुरुषं पृच्छामि' (बृ. ३–९–२६) इति चौपनिषदत्वविशेषणं पुरुषस्य उपनिषत्सु प्राधान्येन प्रकाश्यमानत्वे उपपद्यते "** इति । न केवलम् अहंप्रत्ययगोचरकर्त्रात्मविलक्षणस्य साक्षिणः सर्वस्याऽऽत्मत्वेन उपनिषत्स्वेव प्रतिपाद्यमानत्वात्, विधिकाण्डे तार्किकदर्शनेषु वा अनधिगतत्वाच्च वेदान्तैकप्रमाणकत्वं सिध्यति, अपि तु तस्यास्य पुरुषस्यौपनिषदत्वसमाख्यया प्रसिद्धत्वमप्येतस्योपनिषत्सु स्वातन्त्र्येण प्रतिपिपादयिषितत्वे समर्थं लिङ्गं भवति – इत्यभिप्रायः ॥

ननु याज्ञवल्क्यस्योक्तिरियं विदग्धं शाकल्यं प्रति 'स यस्तान् पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत्तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यति' (बृ. ३–९–२६) इति । अत एतदपि वाक्यम् उपनिषदन्तर्गतमेवेति कथमौपनिषदत्वविशेषणबलात् उपनिषन्मात्रगम्यत्वं पुरुषस्येत्यर्थो लभ्येत ? न हि याज्ञवल्क्यः स्ववाक्यम् उपनिषद्बहिर्भूतं कृत्वा तद्व्यतिरिक्तासूपनिषत्सु प्राधान्येन प्रकाश्यमानं मन्यते स्म पुरुषम् – इतिकल्पनं समञ्जसं स्यादिति ? नायं दोषः ;

यत्कारणम् औपनिषदः (पुरुषः) इति विशेषणं ब्रह्मविद्यामात्रगम्यत्वं पुरुषस्य ब्रूते । अतोऽयम् 'औपनिषदः पुरुषः' इति ब्रह्मविद्ययैवाधिगम्यः, न तु कर्मज्ञानेन तदनुष्ठानाद् वा—इत्येवात्र विवक्ष्यते । भाष्यकारस्तु वेदान्तानाम् उपनिषच्छब्दव्यपदेश्यत्वं तादर्थ्यादौपचारिकमिति कृत्वा ब्रवीति 'पुरुषस्योपनिषत्सु प्राधान्येन प्रकाश्यमानत्वे उपपद्यते औपनिषदत्वविशेषणम्' इति । अतः सर्वमनवद्यम् ॥

१०४. उपसंहारः – तदेवं 'प्रवृत्तिनिवृत्तितच्छेषव्यतिरेकेण केवलवस्तुवादी वेदभागो नास्ति' इति पूर्वपक्षवादो निराधारः, औपनिषदस्य पुरुषस्य सर्वस्याऽऽत्मभूतस्य सर्वैरप्यनपलपनीयत्वात्—इति श्रुत्यनुभवाभ्यामुपपाद्योपसंहरति – '**अतो भूतवस्तुपरो वेदभागो नास्तीति वचनं साहसमात्रम्**' इति । अत्र भूतवस्तुपरः इत्यन्वारम्भणोपसंहारः, अक्रियार्थानामपि वेदवाक्यानां सार्थक्यमकामेनापि क्रियाविधिवादिना अभ्युपगन्तव्यमिति तदीययैव प्रक्रियया प्रतिपिपादयिषया कृतः ॥

# १५. भूतवस्तूपदेशोऽत्र पूर्वतन्त्रे इवोपपन्नः

( भाष्यम् )

**यदपि शास्त्रतात्पर्यविदाम् अनुक्रमणम् 'दृष्टो हि तस्यार्थः कर्मावबोधनम्' (शा. भा. १–१–१) इत्येवमादि, तद् धर्मजिज्ञासाविषयत्वाद् विधिप्रतिषेध-**

शास्त्राभिप्रायं द्रष्टव्यम् । अपि च 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै.सू. १–२–१)–इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानर्थक्यप्रसङ्गः । प्रवृत्तिनिवृत्ति[1]तच्छेषव्यतिरेकेण भूतं चेद् वस्तूपदिशति भव्यार्थत्वेन, कूटस्थनित्यं भूतं नोपदिशतीति को हेतुः ? न हि भूतमुपदिश्यमानं क्रिया भवति । अक्रियात्वेऽपि भूतस्य क्रियासाधनत्वात् क्रियार्थ एव भूतोपदेशः–इति चेत्, नैष दोषः ; क्रियार्थत्वेऽपि क्रियानिर्वर्तनशक्तिमद्वस्तूपदिष्टमेव, क्रियार्थत्वं तु प्रयोजनं तस्य । न चैतावता वस्त्वनुपदिष्टं भवति । यदि नामोपदिष्टम्, किं तव तेन स्यादिति ? उच्यते । अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति ; तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्रयोजनं क्रियत इत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन ॥

१०५. **भूतवस्तूपदेशस्य नैकान्तेनानर्थक्यम्** – कर्तव्यावबोधनं शास्त्रस्य दृष्टोऽर्थः – इति यत्पूर्वपक्षिणोदाहृतं शाबरभाष्यवाक्यम् (पा. ७३), तदनूद्य तस्य सर्वशास्त्रार्थविषयकत्वाभावान्न

---

1. 'प्रवृत्तिनिवृत्ति' इत्यस्यानन्तरं 'विधितच्छेष' इति क्वचिन्मुद्रितपुस्तकेषु उपलभ्यमानः पाठोऽधिक इति भाति ; न हि विधिशेषव्यतिरेकेण भूतवस्तूपदेशोऽनुमतोऽस्ति पूर्वपक्षिणेति ॥

तदुदाहरणमत्र सङ्गतम् – इत्याह 'यदपि शास्त्रतात्पर्यविदामनुक्रमणम्, ... तद्धर्मजिज्ञासाविषयत्वाद् विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम्' इति । न हि तत्र सर्वशास्त्रार्थविचारः प्रकृतः, 'अथातो धर्मजिज्ञासा' इत्येतावत्प्रतिज्ञानात् । अतो न तद्वाक्यं कूटस्थभूतवस्तुविषयकशास्त्रेऽपि लब्धावकाशमिति मन्तुमुचितम् – इति भावः ॥

ननु च वाक्यान्तरमप्यस्ति यदुदाहृतमस्माभिः प्रकृतविषये 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (जै. १–२–१) इति, न च तन्महर्षेर्वचनं विनाकारणं कर्मशास्त्रविषयकत्वेन सङ्कुचितार्थं कर्तुं युज्यते । यदि तत्सूत्रं प्रमाणम्, तर्हि वेदान्तस्याप्यर्थवत्त्वाय क्रियार्थतैवास्यापि शास्त्रभागस्याङ्गीकर्तुं न्याय्या– इत्याशङ्क्य, नैतदस्ति; यतः सूत्रस्यास्य पूर्वपक्षसमर्पकत्वात्, न तद्बलेन सर्वस्य शास्त्रस्य क्रियार्थतैकान्तेनेत्यभ्युपगन्तुं शक्यते, अन्यथा अनिष्टप्रसङ्गात्, इत्यभिप्रेत्याह–'अपि चेत्यादि' । अयमत्राशयः–मृषैवायमभिमानो यद् भूतवस्तूपदेशः सर्वत्रापि निरर्थक एवेति ; स्वाभ्युपगमविरोधात् । भवतापि खलु भूतोपदेशोऽभ्युपगम्यत एव 'तद्भूतानां क्रियार्थेन समाम्नायः' (जै. १–१–२५) इत्यभियुक्तवचनमुदाहरता । न च तत्र भूतोपदेशस्यानर्थक्यमनुमन्यते भवान् । 'प्रवृत्तिनिवृत्ति[1]-व्यतिरेकेण भूतं चेद् वस्तूपदिशति भव्यार्थत्वेन, कूटस्थनित्यं भूतं नोपदिशतीति को हेतुः ?' । अत्र सिद्धान्तिहृदये एतत्

1. भाष्यपाठानुवादे १९८तमपत्रपार्श्वे दत्तं टिप्पणम् अत्रानुसंधेयम् ॥

स्थितम्, यत् क्रियाविधिशेषभूतं वा भवतु कूटस्थनित्यं स्वतन्त्रं वा, सर्वथापि शास्त्रेण वस्तूपदिष्टमेवेति न विशेषः इति –। अक्रियार्थानामुपदेशोऽनर्थकश्चेत्, सर्वथापि भूतं नोपदिश्येत; उपदिश्यते तु; अतो नायमेकान्तो यद्भूतोपदेशोऽनर्थक इति – इति भावः। अथ पूर्वपक्षी दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं शङ्कते '**अक्रियात्वेऽपि भूतस्य क्रियासाधनत्वात्**' इति। कर्मकाण्डे ह्यनुमन्यमानो भूतोपदेशो नानर्थकः; क्रियार्थत्वात् तस्यापि। भवन्मते तु ब्रह्मवस्तु न क्रियार्थमनुमतमिति वैषम्यम्–इति भावः। प्रत्याह सिद्धान्ती–'**नैष दोषः। क्रियार्थत्वेऽपि...वस्तूपदिष्टमेव; क्रियार्थत्वं तु प्रयोजनं तस्य। न चैतावता वस्तूपदिष्टं भवति**' इति। अयं भावः, वस्तूपदिश्यत इत्युभयत्र समानम्। अतो न वैषम्यम्। तत्र कुतोऽयमभिनिवेशः, कर्मशास्त्रे वस्तूपदेश्यम्, न तु ब्रह्मशास्त्रे–इति ?

१०६. **ब्रह्मवस्तूपदेशोऽपि सप्रयोजनः**–पूर्वपक्षी कर्कशाशयः पृच्छति '**यदि नामोपादिष्टम्, किं तव तेन स्यात् ?**' इति। कर्मकाण्डे हि क्रियार्थं भूतवस्तूपदिश्यत इत्यस्मद्राद्धान्तः। कूटस्थनित्यं ब्रह्म तु वेदान्तशास्त्रोपदिष्टम् इत्यभ्युपगच्छतः किं तव तेन स्यात् ? न हि तज्ज्ञानं हानायोपादानाय वा भवेदिति शङ्कितुरभिप्रायः॥

सिद्धान्ती प्रत्याह– '**उच्यते। अनवगतवस्तूपदेशश्च तथैव भवितुमर्हति**' इति। यथा अनवगतक्रियासाधनत्वम् उपदिष्टं क्रियार्थत्वेनादृष्टफलकारणं भवतीति शास्त्रप्रमाणकम्, एवमेवानवगतं ब्रह्मात्मवस्त्वपि उपदिष्टं शास्त्रप्रमाणकमिति सिध्यतीति भावः। ननु

मम भूतवस्तूपदिष्टं कर्मसाधनं भवति ; कर्मावगतिश्च स्वर्गादिफलाय भवतीति सप्रयोजनमित्युक्तम् । तत्राऽऽह—बाढम्, एवमेवाऽऽत्मावगत्या '**मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्रयोजनं क्रियत इत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन**' इति । तदेवं सप्रयोजनत्वात् कूटस्थब्रह्मवस्तूपदेशस्य नानर्थक्यम् — इत्यभिप्रायः ॥

# १६. निवृत्त्युपदेशानामिव ब्रह्मवस्तूपदेशस्यापि सार्थक्यम्

( भाष्यम् )

अपि च 'ब्राह्मणो न हन्तव्यः' (१) इति चैवमाद्या निवृत्तिरुपदिश्यते । न च सा क्रिया, नापि क्रियासाधनम् । अक्रियार्थानाम् उपदेशोऽनर्थकश्चेत् 'ब्राह्मणो न हन्तव्यः' इत्यादिनिवृत्त्युपदेशानाम् आनर्थक्यं प्राप्तम् ; तच्चानिष्टम् । न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुम्, हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण । नञश्चैष स्वभावो यत् स्वसम्बन्धिनोऽभावं बोधयतीति । अभावबुद्धिश्चौदासीन्यकारणम् । सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति । तस्मात्, प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव 'ब्राह्मणो न हन्तव्यः' इत्यादिषु प्रतिषेधार्थं मन्यामहे, अन्यत्र

प्रजापतिव्रतादिभ्यः । तस्मात् पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यम् ॥

१०७. क्रियातत्साधनव्यतिरिक्तोपदेशस्यानर्थक्यमिति शङ्का पूर्वपक्षिणः स्वाभ्युपगमविरुद्धा—भूतार्थोपदेशाभ्युपगमविरुद्धा ब्रह्मवस्तूपदेशानर्थक्यशङ्का, धर्मार्थभूतवस्तूपदेशवदेव मोक्षार्थभूतवस्तूपदेशस्यापि सप्रयोजनत्वोपपत्तेः—इत्युक्तमेतावता समाधानग्रन्थेन। अथेदानीं निवृत्त्युपदेशवदेव वस्तूपदेशस्यापि शास्त्रीयत्वोपपत्तिरिति स्फुटयितुमारभते – अपि चेति ॥ यत्तु निवृत्त्युपदेशोऽपि क्रियोपदेश एवेत्यभिमन्यते पूर्वपक्षी, तन्मृषैवेत्यभिप्रायः। तदेवाह – न च सा क्रिया, नापि क्रियासाधनम्। अस्त्वेवमपि, ततः किमित्यत आह "अक्रियार्थानामुपदेशोऽनर्थकश्चेत् 'ब्राह्मणो न हन्तव्यः' इत्यादिनिवृत्त्युपदेशानामानर्थक्यं प्राप्तम्। तच्चानिष्टम्" इति। 'भवतः' इति शेषः। 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इति खलु दुराग्रहो भवतः। तत्र निवृत्त्युपदेश एवाक्रियार्थ इत्यभ्युपगम्यते चेत्, महदेतदनिष्टं प्रसज्येतेति स्पष्टम् – इति भावः। ननु मया नैवाभ्युपगम्यते निवृत्तेरक्रियार्थत्वम् – इति शङ्कामपहस्तयितुं स्वाभिप्रायमाविष्कर्तुमारभते—न चेति। ननु 'न हन्तव्यः' इति तव्यप्रत्ययस्यार्थवत्त्वाय निवृत्तिरपि क्रियैवेति किं न स्यात्? – इत्यत्राऽऽह 'न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यम् अप्राप्तक्रियार्थत्वं कल्पयितुम्, हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण' इति ॥

स्वभावतो हि रागद्वेषादिना हन्त्यर्थः प्राप्तो जन्तोः, न तु शास्त्रकारितः । न हन्तव्यः –इति नञा तु हन्त्यर्थनिवृत्तिमात्रं गम्यते न तु किञ्चिद्विधीयते इत्यतस्तस्यापि न क्रियार्थत्वम्, कस्या अपि क्रियाया अत्राप्राप्तत्वात् । अतोऽत्र नञा स्वभावप्राप्तहननाभावमात्रं बोध्यते, तेन 'न हन्तव्यो ब्राह्मणः' इतिबुद्ध्या हनने प्रवृत्तः पुरुषः औदासीन्यं भजत इति स्थितिः ॥

ननु क्रियातो निवृत्तौ विशिष्टः प्रयत्नः देहेन्द्रियमनसां विधारणरूपः कर्तव्यो भवति, तत एव क्रियार्थत्वमत्रापीति कल्पयितुं युक्तम् – इति शङ्कायाम्, तादृशप्रयत्नस्य अप्राप्तत्वं स्पष्टयितुमाह '**नञश्चैष स्वभावो यत् स्वसंबन्धिनोऽभावं बोधयतीति । अभावबुद्धिश्च औदासीन्यकारणम् ।**' इति । न हि नञा प्रयत्नो बोध्यते, तस्य मुख्यवृत्त्या स्वसंबन्धिनोऽभावबोधकत्वात्; अत्र च स्वसंबन्धि हननमिति तदभावबुद्धिजननमात्रेण नञ उपक्षीणत्वात् न विधारकप्रयत्नबोधनपर्यन्तं तस्य वृत्तिरवकल्पते । न च औदासीन्यं विधेयम्, तस्य अभावबुद्ध्यैव फलितत्वात् इति भावः । यदैव ह्यभावबुद्धिर्जायते, तदा हननक्रियोन्मुखः पुरुषः स्वयमेव क्रियाया उपरतो भवतीत्यभिप्रायेण 'अभावबुद्धिश्चौदासीन्यकारणम्' इत्युच्यते । सा चाभावबुद्धिर्हन्तव्यबुद्धिनिवृत्तौ '**स्वयमेवोपशाम्यति ।**' '**दग्धेन्धनाग्निवत्**' इति दृष्टान्तः । यथा इन्धनाभावे अग्निव्यापारोपशमः, एवम् हन्तव्यबुद्ध्यभावे तदभावबोधनव्यापारोपशमो नान्तरीयक इति न चित्रम् – इति भावः । अतस्तत्र नैवास्ति क्रियाप्रसक्तिः ॥

एवं च किं फलति ? – इत्यत आह, "तस्मात् प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव 'ब्राह्मणो न हन्तव्यः' इत्यादिषु प्रतिषेधार्थं मन्यामहे" इति ॥

तत्किमिदानीं सर्वत्र प्रसज्यप्रतिषेध एवार्थो नञः ? – इत्याशङ्कायामाह 'अन्यत्र प्रजापतिव्रतादिभ्यः' इति । प्रजापतिव्रते हि ब्रह्मचारिणो व्रतमनुक्रान्तम् 'नेक्षेतोद्यन्तमादित्यम्' इत्यादिना ; व्रतस्य चानुष्ठेयत्वात् 'नेक्षेत' इति न केवलम् ईक्षणाभावो गम्यते, किं तर्हि ईक्षणविरोधिसङ्कल्पपूर्वकप्रयत्नविशेषोऽपि – इति भावः । 'आदि'शब्दात् पर्युदासप्रतिषेधा अपि 'अब्राह्मणः', 'अमित्रम्', 'अधर्मः' इत्यादिस्थलेषु तदन्यतद्विरोधिलक्षणाः संग्राह्याः ॥

१०८. अक्रियार्थानामानर्थक्यं कुत्र ? – तदेवमत्र, अक्रियार्थानामपि भूतोपदेशानां निवृत्त्युपदेशानां चार्थवत्त्वदर्शनात् तदन्यत्रैवानर्थक्यवचनस्य सावकाशत्वम् – इति तादृशस्थलान्यादर्शयति 'तस्मात्, पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यम्' इति । अक्रियार्थानाम् आनर्थक्याभिधानं पूर्वपक्षसूत्रे, विध्यर्थस्तावकत्वेनार्थवत्त्वाभिधानं च सिद्धान्तसूत्रे यथोदाहृतभूतार्थवादमात्रानर्थक्यविवक्षया, न तु फलवन्निश्चितार्थबोधकवेदान्तवाक्यादिविषयम् – इत्यभिप्रायः ॥

# १७. वस्तुमात्रकथनेऽपि सप्रयोजनत्वं दृष्टम्

( भाष्यम् )

यदप्युक्तम् – कर्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमानमनर्थकं स्यात् ‘ सप्तद्वीपा वसुमती ’ इत्यादिवत् – इति, तत्परिहृतम् ‘रज्जुरियं नायं सर्पः’ इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात् (इति १) । ननु श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम् । अत्रोच्यते – नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुम् । वेदप्रमाणजनितब्रह्मात्मभावविरोधात् । न हि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति तस्यैव वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुम् । न हि धनिनो गृहस्थस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति । न च कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानरहितस्य तदेव कुण्डलित्वाभिमाननिमित्तं सुखं भवति । तदुक्तं श्रुत्या ‘ अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः ’ (छां. ८–१२–१) इति ॥

१०९. **वाक्यश्रवणमात्रादवगतब्रह्मात्मभावस्य तावतैव कृतार्थत्वम्** – एवं तावद् ब्रह्मणो भूतार्थत्वात्तदुपदेशकवाक्यानामानर्थक्यं स्यादित्यतस्तेषामर्थवत्त्वाय उपास्तिक्रियार्थत्वं वक्तव्यम् – इति पूर्वपक्ष्यभिप्रायो निराकृतोऽक्रियार्थानामपि शास्त्रोपदिष्टानामर्थवत्त्वमस्तीत्युपपादनेन । अथेदानीं वस्तुमात्रबोधने वेदान्तानां हानोपादानलक्षणप्रयोजनासंभवात् आनर्थक्यं स्यादिति शङ्कायाः, सर्पभ्रान्तिनिवर्तकरज्जूपदेशवाक्यवत् संसारित्वभ्रान्तिनिवर्तनेन ब्रह्मात्मवस्तूपदेशस्याप्यर्थवत्त्वं स्यात् इति (पा. १०३) परिहृतत्वेऽपि श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनात् वैषम्यं दृष्टान्तदार्ष्टान्तिकयोर्यदाशङ्कितं ध्याननियोगवादिना, तद्विस्तरेण विमृश्य निराचिकीर्षुः पुनरन्वारम्भेण यथोक्तं पूर्वपक्षं तत्परिहारं चानुवदति –'**यदप्युक्तम्**' इत्यादिना '**न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम्** ' इत्यन्तेन ॥

तत्र स्वहृदि स्थितमभिप्रायं विशदयति ' अत्रोच्यते । **नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुम्, वेदप्रमाणजनितब्रह्मात्मभावविरोधात्**' इति । अयमभिसन्धिः–' कृतश्रवणस्यापि कदाचिदवगतिर्जायते, कदाचिन्न ; अधिकारतारतम्यात् । तत्र यस्य ब्रह्मावगतिर्जाता, तस्य विषये चोद्यस्यानवकाश एवेति । एतदेव विशदयति दृष्टान्तादानेन '**न हि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति** ' इत्यादिना '**तस्यैव कुण्डलित्वाभिमाननिमित्तं सुखं भवति** ' इत्यन्तेन । यथेदं दृष्टान्तद्वयम् , एवमेव सशरीरत्वाभिमानिनोऽज्ञस्य ये सुखदुःखे, तयोर्ब्रह्मात्मावगतिमति

सशरीरत्वभावनाशून्ये ज्ञानिन्यप्यनुवृत्तिर्नैव शक्यशङ्का इत्यभिप्रायः । उक्तं ह्येतत् पूर्वमेव (पा. ११६) कर्मब्रह्मविद्याफलयोर्वैलक्षण्यप्रदर्शन-प्रसङ्गेन, यदशरीरत्वमेव स्वाभाविकम्, सशरीरत्वं त्वविद्यादिदोष-विजृम्भितमिति । तदेवेहाप्युच्यते शब्दान्तरेण ' न हि शरीराद्यात्माभि-मानिनो दुःखभयादिमत्त्वं दृष्टमिति तस्यैव वेदप्रमाणजनितब्रह्मात्माव-गमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुम् ' – इति, सशरीरत्वस्य मिथ्याभिमानमात्र-कल्पितत्वं स्मारयितुम् । अत एव प्रागुदाहृतश्रुतिमुदाहरतीहापि यथोक्तार्थे स्फुटतरं कर्तुम्–इति ज्ञेयम् ॥

११०. अत्र व्याख्यानप्रस्थानीयैरानीतः साक्षात्कार-वादो भाष्याक्षरानारूढः, अप्रकृतश्च –तमिमं भाष्यग्रन्थम् अन्यथैव व्याचक्रुः केचित् – कथम् ? यथोपवर्णितपूर्वपक्षमुपस्थापितवन्तं वृत्तिकारं प्रत्याह भाष्यकृत् " सत्यम् । न ब्रह्मज्ञानमात्रं सांसारिकधर्म-निवृत्तिकारणम्, अपि तु साक्षात्कारपर्यन्तम् । ब्रह्मसाक्षात्कारश्चान्तः-करणवृत्तिभेदः श्रवणमननादिजनितसंस्कारसचिवमनोजन्मा षड्जादि-भेदसाक्षात्कार इव गान्धर्वशास्त्रश्रवणाभ्याससंस्कृतमनोयोनिः । स च निखिलप्रपञ्चमहेन्द्रजालसाक्षात्कारं समूलमुन्मूलयन् आत्मानमपि प्रपञ्चत्वाविशेषादुन्मूलयति....। तस्मात्, रज्जुस्वरूपकथनतुल्यतैवात्रेति सिद्धम् । अत्र च वेदप्रमाणमूलतया ' वेदप्रमाणजनित'–इत्युक्तम् " (भा. पा. १५०) इति ॥

नैतद् व्याख्यानं भाष्याभिप्रायानुगुणम्, कण्ठरवेणोक्त-भाष्याक्षरविरोधित्वात्। तथा हि। ' येषां पुनर्निपुणमतीनां नाज्ञानसंशय विपर्ययलक्षणः पदार्थविषयः प्रतिबन्धोऽस्ति, ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुमिति तान् प्रत्यावृत्त्यानर्थक्यमिष्टमेव ; सकृदुत्पन्नैव ह्यात्मप्रतिपत्तिरविद्यां निवर्तयतीति नात्र कश्चिदपि क्रमोऽभ्युपगम्यते । सत्यमेवं युज्येत यदि कस्यचिदेवं प्रतिपत्तिर्भवेत् ; बलवती ह्यात्मनो दुःखित्वादिप्रतिपत्तिः। अतो न दुःखित्वाद्यभावं कश्चित्प्रतिपद्यत इति चेत्, न; देहाद्यभिमानवद्दुःखित्वाद्यभिमानस्य मिथ्याभिमानत्वोपपत्तेः' (सू.भा.४-१-२, पा.४६२,४६३) इति हि भाष्यकृदुदर्के सकृच्छ्रुतादेव वाक्यात् साक्षादनुभवोत्पत्तिं निपुणमतीनां जायमानामाख्यास्यति। अतो भाष्यविरुद्धोऽयं वादः, वाक्यश्रवणमात्रात्सांसारिकदुःखनिवृत्तिर्न भवतीति । न च वेदवाक्यश्रवणज्ञानोत्तरं मननादिसंस्कारसचिवान्तःकरणवृत्तिजन्मैव साक्षात्कारः— इति वाद उपलभ्यते क्वचिदपि भाष्ये। वेदप्रमाणजनितब्रह्मात्मभावो नाम न साक्षाद्वेदवाक्यश्रवणजनितः, अपि तु श्रवणमननादिसंस्कारसचिवमनोजन्मैव तथोपचर्यमाण – इत्यपि वादो न कुत्रापि दृष्टचरो भाष्ये इति जानन्त्येव भाष्यश्रवणे कृतपरिश्रमाः । तस्मात्, प्रस्थानान्तरपरिचयवासितधीभिः कल्पितैवेयं प्रक्रिया भाष्याभिप्रेतत्वेनेह प्रख्याप्यत इति मन्तव्यम् ॥

**१११. प्रस्थानान्तरावलम्बिनां प्रक्रिया साक्षात्कारविषये—** अन्यैस्तु प्रकारान्तरेण व्यावर्णिता साक्षात्कारप्रक्रिया । कथम्? ब्रह्मण एव सर्वसंविदुपादानत्वात्, ब्रह्माकारशब्दप्रमाणजन्यसंवेदनेऽपि

तदभिन्नतया वा तज्जनकतया वा ब्रह्मापि प्रथममेव अपरोक्षतया अवभासते। तच्च चित्तस्य अतिसूक्ष्मे अनेकाग्रतादोषात् विपर्ययसंस्कारदोषाच्च प्रतिबद्धं भ्रान्त्या परोक्षवदवभासते। तत्र, अपरोक्षज्ञानमुद्दिश्य यज्ञादीनां शमादीनां निदिध्यासनादीनां च विधानसामर्थ्यात् यज्ञादिनिर्बर्हितकल्मषप्रतिबन्धम्, शमादिनिरुद्धविपरीतप्रवृत्तिदोषम्, मननसंदर्शित प्रमेयादिसम्भावनागुणप्रदीपोज्ज्वलितम्, अतिसूक्ष्मतरब्रह्मात्मविषयनिदिध्यासनप्रचयपरिनिर्मिततदेकाग्रवृत्तिगुणं च, इन्द्रियं पारोक्ष्यविभ्रमनिमित्तप्रतिबन्धनिरासेन शब्दादेवापरोक्ष्यनिश्चयनिमित्तं भवतीति गम्यते। लोके च, अतिसूक्ष्मवस्तुनिर्धारणे चित्तैकाग्र्यापेक्षाया दर्शनात्। तर्कशब्देन चात्रैतादृशं सर्वप्रतिबन्धनिरासिचित्तदर्पणमुच्यते; लौकिकासंभावनाविपरीतभावनानिरासितर्काणां प्रथमज्ञानेऽन्तर्भूतत्वात्। एवं च 'तं त्वौपनिषदम्' इति तद्धितप्रत्ययेन ब्रह्मावगमहेतुत्वं शब्दस्य दर्शितम् उपपन्नं भवति; अपरोक्षावगतेरेव सम्यगवगतित्वात्" (पं. वि. ५०९-५१०) इति॥

इत्येवमेकं मतं वर्णयित्वा तत्रारुच्या त एव व्याख्यानप्रस्थानीया प्रक्रियान्तरमपि रचयन्ति। तद्यथा – 'अन्यन्मतम् – न प्रथमोत्पन्नं शाब्दज्ञानं प्रतिबन्धविगमापेक्षया अपरोक्षावभासं भवति, किं तु शब्द एव प्रथमं ब्रह्मणि परोक्षज्ञानम् उत्पाद्य पुनर्वर्णितचित्तदर्पणसहकारिकारणापेक्षया द्वितीयम् अपरोक्षं ज्ञानम् उत्पादयति। .... न च स्वयंप्रकाशे ब्रह्मणि परोक्षज्ञानं विभ्रमः; स्वयंप्रकाशेऽपि पुरुषान्तरसंवेदने परोक्षानुमानदर्शनादिति' (पं. वि. ५०९-५१०) इति॥

नैतदपि भाष्याक्षरारूढं व्याख्यानम् इत्यस्मन्मतिः। कुत्रापि भाष्ये यथोक्तमतद्वयपरामर्शानुपलब्धेः, क्रियास्विव वस्तुनि विकल्पासंभवाच्च। शब्दादेव तत्त्वमसीत्यतोऽपरोक्षज्ञाने जातेऽपि पारोक्ष्यविभ्रमः स्यात्, इति कल्पयितुमप्यशक्यत्वात्। अपरोक्षज्ञानं हि नाम 'अद्वैतब्रह्मात्माऽहम्' इत्यनुभवः। न च तस्मिन् बाधशङ्का सम्भवति; बाधकज्ञानान्तरस्यैवाभावात् तत्र। न च 'तत्त्वमसि' इति सिद्धवदुपदेशस्य परोक्षज्ञानजनकत्वमवकल्पते। प्रतिबन्धवशादेव तु ज्ञानं नोत्पद्यते मननादिसाहाय्येन च शाब्दज्ञानमपरोक्षं भविष्यतीत्येव युक्तं कल्पयितुम्। भाष्योदितरीत्या निपुणमतीनां श्रवणमात्रेणापरोक्षज्ञानोत्पत्तिः, इतरेषां तु मननादिसहकृतश्रवणेन – इति कल्पनायाः श्रुतियुक्त्यनुभवानुसारित्वात् – इत्यलमतिविस्तरेण॥

## १८. जीवतोऽपि विदुषोऽशरीरत्वम्

(भाष्यम्)

शरीरे पतिते अशरीरत्वं स्यात्, न जीवतः–इति चेत्, न; सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्। न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम्। नित्यमशरीरत्वम्, अकर्मनिमित्तत्वात् – इत्यवोचाम। तत्कृतधर्माधर्मनिमित्तं सशरीरत्वम् इति चेत्, न; शरीरसंबन्धस्य

असिद्धत्वात्, धर्माधर्मयोरात्मकृतत्वासिद्धेः । शरीर-संबन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गात्, अन्धपरम्परैषा अनादित्वकल्पना ॥

क्रियासमवायाभावाच्चाऽऽत्मनः कर्तृत्वानुपपत्तेः । संनिधानमात्रेण, राजप्रभृतीनां दृष्टं कर्तृत्वमिति चेत्, न ; धनदानाद्युपार्जितभृत्यसंबन्धित्वात् तेषां कर्तृत्वोपपत्तेः । न त्वात्मनो धनदानादिवच्छरीरादिभिः स्वस्वामिसंबन्धनिमित्तं किञ्चिच्छक्यं कल्पयितुम् । मिथ्याभिमानस्तु प्रत्यक्षः सम्बन्धहेतुः । एतेन यजमानत्वमात्मनो व्याख्यातम् ॥

११२. शरीरसंबन्धो जीवस्य मिथ्याज्ञाननिमित्तः – शरीराद्यात्माभिमानवतो दुःखभयादिमत्त्वलक्षणः संसारः, न तु विदुषोऽभिमानरहितस्य ; अवगतब्रह्मात्मभावत्वात् तस्य – इति दृष्टान्तमुखेनोपपादितम् । तमेतं सिद्धान्त्यभिसन्धिमजानन् शङ्कते ‘ शरीरे पतिते अशरीरत्वं स्यात् । न जीवतः – इति चेत् ’ इति । ‘ अशरीरं वाव सन्तम् ’ इतिश्रुतिर्विदेहमुक्तविषया न तु जीवन्मुक्तविषया । जीवतो हि प्रारब्धवशादवश्यं शरीरादिसम्बन्धोऽनुवर्तत एव । अतो यदुक्तमस्माभिः, श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वं दृश्यत इति, तत्तथैव स्थितम् । अत एव हि श्रुतिर्वाक्यशेषेण शरीरात् समुत्थितस्यैव स्वरूपेणाभिनिष्पत्तिमाह – ‘ एवमेवैष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय

परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते ' (छां. ८–१२–३) इति । एवं हि ' मघवन्मर्त्यं वा इदं शरीरमात्तं हि मृत्युना तदस्यामृतस्याऽऽत्मनोऽधिष्ठानम् ' इत्यादिना, सशरीरस्य मर्त्यत्वमशरीरस्य प्रियाप्रियासंस्पृष्टत्वं च ब्रुवाणस्य प्रजापतेर्वाक्यं सामञ्जस्येनावकल्पते – इति भावः ॥

तदेतत् सर्वथापि युक्त्यनुभवविरुद्धमित्युपपादयिष्यन्नाह **' न, सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्'** इति । संग्रहवाक्यं विवृणोति **' न ह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम् '** इति । एतदेव कथम् ?– इत्याशङ्क्य ज्ञानफलस्य **कर्मफलतो** वैलक्षण्यप्रदर्शनावसरे यदुक्तं तत् स्मारयति **' नित्यमशरीरत्वमकर्मनिमित्तत्वात्–इत्यवोचाम'** इति । ' न चानध्यस्तात्मभावेन देहेन कश्चिद् व्याप्रियते ' इति भाष्यार्थविवेचनसंदर्भेऽपि स्फुटीकृतमिदम्–**अध्यासभाष्ये**(सु.सं.४१,पा.५९)। तत्र प्रतिज्ञामात्रेणोक्तं भाष्ये देहसंबन्धोऽध्यासनिमित्त एवात्मन इति । इह पुनस्तदेवोपपत्तिभिर्दृढीक्रियत इति विशेषः ॥

**११३. सशरीरत्वं न कर्मनिमित्तमात्मनः** – अत्र शरीरित्वं पारमार्थिकमेवेति मन्वानः पूर्वपक्षी तस्य मिथ्याज्ञानकृतत्वं प्रतिज्ञातममृष्यमाणः प्रत्यवतिष्ठते **'तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेत् '** इति । अभुक्तकर्मफलभोगाय हि जन्तवः शरीरान्तरं गृह्णते । ' योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः । स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ॥ ' (का. ५–७) इति श्रुतेः । एवं च यथैव

क्रियाश्रयत्वं सत्यं जीवानाम्, एवमेव क्रियाफलभोगाय शरीरोपादानमपि सत्यमेव। अतोऽसदेवैतद्गीयते मिथ्याज्ञाननिमित्तं सशरीरत्वमिति। न हि प्रत्यक्षतोऽनुभूयमाने सशरीरत्वे कर्तृत्वभोक्तृत्वे च तदपह्नवो युक्तोऽन्यत्र वैयात्यात् इति भावः। अत्र प्रतिवचनम् '**न। शरीरसंबन्धस्यासिद्धत्वाद्धर्माधर्मयोरात्मकृतत्वासिद्धेः।**' इति॥

न तावच्छरीरसंबन्धः सिद्धः प्रत्यक्षतः। न ह्यशरीरस्य कस्यचिदपि प्रत्यक्षादिव्यवहारः समस्ति। सशरीरत्वमेव त्वद्याप्यसिद्धम्। तत्कथमसिद्धं सशरीरत्वं प्रत्यक्षतः सिद्धवत्कृत्य तदेव सशरीरत्वं सिषाधयिषति भवान्? न ह्यशरीरस्य प्रमातृत्वं समस्ति, न च प्रमातृत्वमन्तरेण प्रमाणव्यापारयितृत्वमस्ति। तदेवमसिद्धे प्रमातृत्वे कर्तृत्वे च किमिदमुच्यते तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति? सिद्धसशरीरत्वस्य हि कर्तृत्वं नाम। न चान्तरेण सशरीरत्वं कर्तृत्वं च धर्माधर्मयोर्निष्पत्तिस्तत्फलोपभोगार्थं शरीराप्तिर्वा। शरीरेन्द्रियमनोयुक्तो हि भोक्ता नाम। तदेवं सशरीरत्वस्य धर्माधर्मकर्तृत्वस्य च सिद्ध्यर्थं परस्परमुखनिरीक्षणं संवृत्तमित्याह '**शरीरसंबन्धस्यासिद्धत्वात् धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गात्**' इति। ननु नास्त्येवेतरेतराश्रयप्रसङ्गोऽत्र, यत्कारणम् अस्मिन्जन्मन्युपलभ्यमानं शरीरं पूर्वजन्मकृतधर्माधर्मयोः कार्यम्, पूर्वजन्मनि लब्धात्मकं च शरीरं पूर्वतरजन्मकृतधर्माधर्मयोः कार्यम्—इति धर्माधर्मयोः शरीरस्य च बीजाङ्कुरवत् कार्यकारणभावमभ्युपगच्छामो वयम्। हेतुफलयोर्धर्माधर्मशरीरयोश्च सन्तानस्य बीजाङ्कुरसन्तानवदनादित्वाभ्युपगमे हि न कोऽपि

दोषः प्रसञ्जयितुं शक्योऽत्र—इति चेत्, तत्रोच्यते ‘ **अन्धपरम्परैषा अनादित्वकल्पना** ’ इति । कुत्रापि जन्मनि सशरीरत्वस्य कर्तृत्व-भोक्तृत्वयोर्वा आत्मनोऽसिद्धत्वान्नैवानादित्वं कस्यचिदपि शक्यशङ्कम्; न हि जात्यन्धस्य जात्यन्धान्तरान्मार्गदर्शनं कथमपि सिद्ध्येत् – इति भावः । **यथोक्तमभियुक्तैः** ‘ हेतोरादिः फलं येषामादिर्हेतुः फलस्य च । हेतोः फलस्य चानादिः कथं तैरुपवर्ण्यते ॥ ’ (गौ. का. (४–१४) इति, ‘ बीजाङ्कुराख्यो दृष्टान्तः सदा साध्यसमो हि सः । न हि साध्यसमो हेतुः सिद्धौ साध्यस्य युज्यते ॥ ’ (गौ. का. ४–२०) इति च ॥

११४. आत्मनः कर्तृत्वमेव तावन्नास्ति – एतदेव सुस्फुटीकुर्वन्नाह ‘ **क्रियासमवायाभावाच्चात्मनः कर्तृत्वानुपपत्तेः** ’ इति । क्रिया हि प्रवृत्तिनिवृत्तिरूपा देहेन्द्रियादिष्वहंममाभिमानवत एवेत्युपपादितमध्यासभाष्ये ‘ **पश्वादिभिश्चाविशेषात्** ’ (सु. ५–४४, ४५, ४६) इति; तत्रैवोपसंहृतं च ‘एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः ’ (सु. ८–५९) इति । तदेवाभिसन्धायाऽऽह ‘ **क्रियासमवायाभावाच्च** ’ —इत्यादिना । न ह्यसङ्गस्य क्रियासमवायोऽस्ति ; न च क्रियासमवायाभावे कर्तृत्वं समस्ति – इति भावः ॥

अत्र पूर्वपक्षी शङ्कते ‘**सन्निधानमात्रेण**’ इति । अयमाशयः— यद्यपि मास्त्वेव क्रियासमवाय आत्मनः, तथापि कर्तृत्वमन्यथैवोपपद्यते । कथम् ? दृष्टं हि राजप्रभृतीनां स्वयं क्रियासमवायरहितानामपि

संनिधानमात्रेण कर्तृत्वम् – इति । राजा खलु स्वयमयुध्यमानोऽपि योधेषु युध्यमानेषु स्वयमपि 'युध्यत' इति व्यवह्रियते संनिधिमात्रेण । सेनापतिश्च संनिधिमात्रेणैव 'युध्यते' इति व्यवह्रियते । एवम् आत्मापि संनिधानमात्रेण देहादिषु कुर्वत्सु स्वयमपि करोति संनिधानमात्रेण – इति भावः । तदेतत् प्रत्याचष्टे – '**न, धनदानाद्युपार्जितभृत्य-संबन्धित्वात् तेषां कर्तृत्वोपपत्तेः**' इति । अयमभिप्रायः–न राज-प्रभृतिसमोऽयमात्मा । कस्मात् ? ते हि राजप्रभृतयो धनदानादिना भृत्यानुपार्जयन्ति । भृत्यानां योधयितृत्वेऽपि प्रेरणादिना कर्तारस्ते ; स्वयमपि च क्वचिद्युध्यन्ते चेत्यतस्तेषां कर्तृत्वमुपपद्यते । '**न त्वात्मनो धनदानादिवच्छरीरादिभिः स्वस्वामिसंबन्धनिमित्तं किञ्चिच्छक्यं कल्पयितुम्**' । स्वयं क्रियासमवायित्वं तु न चिन्तयितुमपि शक्यम् । अतो विषमो दृष्टान्तः । प्रत्युत '**मिथ्याभिमानस्तु प्रत्यक्षः सम्बन्धहेतुः**' । यथोपपादितनीत्या ह्यसिद्धेऽपि जीवात्मनः शरीरादिभिः संबन्धे, अहं ममेति च मृषैवाभिमन्यत इति सर्वलोकप्रत्यक्षमेतत् – इत्यभिप्रायः ॥

ननु 'विद्वान् यजते' इत्यादिवेदवाक्यैर्यजमानत्वमात्मनः सिद्धम् । 'स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं याति ' ( ? ) इति फलश्रुतेश्च यज्ञफलभोक्तृत्वं च । आहुश्च मीमांसकाः–'यजमानत्वमप्यात्मा सक्रियत्वात् प्रपद्यते । न परिस्पन्द एवैका क्रिया नः कणभोजिवत् ॥ ' ( ? ) इति । तत्राह– '**एतेन यजमानत्वमात्मनो व्याख्यातम्**' इति । न हि यजमान-

श्रुत्यापि क्रियासमवायित्वमात्मनः सिध्यति ; देहेन्द्रियादिष्वहंममाभिमानसहितस्यैव कर्तृत्वात्, मिथ्याभिमानप्रयुक्तं पुरुषं प्रत्येव हि यज्ञस्वर्गयोः साध्यसाधनभावं ब्रूते वेदः ; न जातुचिदपि असङ्गस्याऽऽत्मनः कर्तृत्वं सत्यमिति । तदेतत् भाष्यकारैरध्यासभाष्ये एव प्रदर्शितम् " 'ब्राह्मणो यजेत' इत्यादीनि शास्त्राण्यात्मनि वर्णाश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्ते " (सु. ६–४९) इति । तस्मात्, साधूक्तं 'मिथ्याभिमानस्तु प्रत्यक्षः संबन्धहेतुः' इति – इत्यभिप्रायः ॥

( भाष्यम् )

अत्राहुः – देहादिव्यतिरिक्तस्याऽऽत्मनः आत्मीये देहादावभिमानो गौणः, न मिथ्या – इति । तन्न । प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः । यस्य हि प्रसिद्धो वस्तुभेदः, यथा केसरादिमानाकृतिविशेषोऽन्वयव्यतिरेकाभ्यां सिंहशब्दप्रत्ययभाङ्मुख्योऽन्यः प्रसिद्धः, ततश्चान्यः पुरुषः प्रायिकैः क्रौर्यशौर्यादिभिः सिंहगुणैः संपन्नः प्रसिद्धः, तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतो नाप्रसिद्धवस्तुभेदस्य । तस्य तु, अन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतो न गौणौ । यथा मन्दान्धकारे 'स्थाणुरयम्' इत्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायाम्

अकस्माद् 'रजतम्' इति निश्चितौ शब्दप्रत्ययौ, तद्वद् देहादिसङ्घाते 'अहम्' इति निरुपचारेण शब्दप्रत्ययौ, आत्मानात्माविवेकेनोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम् ? आत्मानात्मविवेकिनामपि पण्डितानाम् अजाविपालानामिव अविविक्तौ शब्दप्रत्ययौ भवतः। तस्मात्, देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादौ अहंप्रत्ययो मिथ्यैव न गौणः ॥

११५. आत्मनः शरीरादावहंप्रत्ययो मिथ्यैव – मिथ्याभिमान एव सशरीरत्वबुद्धिकारणम् इति श्रुत्वा तदसहमाना मीमांसकानुयायिनः शङ्कन्ते ; तदनुवदति 'अत्राहुः । देहादिव्यतिरिक्तस्यात्मन आत्मीये देहादावभिमानो गौणो न मिथ्येति' इति। 'इति चेत्' इति पाठे चेदितिनिपातप्रयोगोऽतिरिच्यते। 'शरीरादिभ्योऽन्य एवाहम्' इति जानन्नेव हि आत्ममतिं करोति तत्र ; 'मम शरीरम्', 'ममेन्द्रियाणि' इत्यादिमुख्यप्रत्ययस्याप्यनुभवारूढत्वात् – इति तेषामाशयः। तदेतत् प्रत्याचष्टे 'न, प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः' इति। अस्यैव संग्रहवाक्यस्य विवरणम् 'यथा केसरादिमान्' इत्यादि। मुख्यः सिंहोऽन्यः, अन्यश्च देवदत्ताख्यः पुरुषः – इति विविच्य जानन्नेव हि 'सिंहो देवदत्तः' इति वाक्यं प्रयुङ्क्ते, तथा प्रत्येति च यः, तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतः। व्यक्तमेव हि तत्र मुख्यसिंहकृतं कर्म गौण-

सिंहस्य पुरुषस्य न भवतीति; तथापि क्रौर्यशौर्यादिभिः प्रायिकैः सिंहगुणैः संपन्नत्वेन दृष्टः पुरुषः 'सिंह' इति व्यपदिश्यते प्रतीयते च—इति। तथा, इहापि देहादिरात्मगुणैः संपन्न इति चेद्धेतोर्देहादौ अहमभिमानोऽभविष्यत्, तर्हि युक्तोऽभविष्यदपि देहादावहंशब्दप्रत्ययौ गौणाविति ; न तु तदस्ति। न हि 'अयं देहः, अयमात्मा' इति विवेकेन प्रसिद्धौ देहात्मानौ कस्यचिदपि, प्रत्युत तयोः शब्दप्रत्यययोर्मिथ्यात्वे एवास्त्यनुभवसंवादः ; देहात्मनोर्भेदस्याप्रसिद्धत्वादेव। तदाह – '**नाप्रसिद्धवस्तुभेदस्य । तस्य तु अन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव भवतो न गौणौ**' इति॥

अप्रसिद्धवस्तुभेदपुरुषस्योत्पद्यमानौ शब्दप्रत्ययौ भ्रान्तिनिमित्तावेवेत्यत्र निदर्शनद्वयम् "**यथा मन्दान्धकारे 'स्थाणुरयम्' इत्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ, यथा वा शुक्तिकायाम् अकस्माद् 'रजतम्' इति निश्चितौ शब्दप्रत्ययौ**" इति। दृष्टान्तेन विवक्षितं सामान्यं दार्ष्टान्तिकेऽपि प्रदर्शयन्नाह "**तद्वद्देहादिसङ्घाते 'अहम्' इति निरुपचारेण शब्दप्रत्ययौ आत्मानात्माविवेकेन उत्पद्यमानौ कथं गौणौ शक्यौ वदितुम्?**' इति। स्थाणुपुरुषयोरविवेकेन, शुक्तिकारजतयोरविवेकेन च स्थाणावेकस्मिन्नेव गृह्यमाणेऽपि, शुक्तिकायां चैकस्यामेव गृह्यमाणायामपि 'पुरुषः', 'रजतम्' इति च जायमानौ शब्दप्रत्ययौ यथा भ्रान्तिनिमित्तावेव न गौणौ, तद्वद् देहादिसङ्घाते एकस्मिन्नेव गृह्यमाणेऽपि तद्विवेकेनागृहीतात्मवस्तुनः पुरुषस्य 'अहम्' इति निरुपचारेण जायमानौ आत्मशब्दप्रत्ययौ न

कथमपि शक्यौ गौणाविति वदितुम्, किं तु मिथ्येत्येव सर्वैरप्यङ्गीकर्तव्यौ–इत्यभिप्रायः। प्रकृतेऽपि देहात्मनोरविविक्तयोरेव सतो', देहादावहंप्रत्ययो जायत इति मिथ्यैव स इति निगमयन्नाह – '**आत्मानात्मविवेकिनामपि पण्डितानामजाविपालानामिवाविविक्तौ शब्दप्रत्ययौ भवतः**' इति। फलितमुपसंहरति '**तस्माद्, देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैव न गौणः**' इति॥

**११६. अत्र व्याख्यानप्रस्थानीयानां कल्पनाविशेषाः**– अत्र '**सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्**' इति नित्याशरीरत्वस्वभावेऽप्यात्मनि सशरीरत्वकल्पनम्, धर्माधर्मकर्तृत्वकल्पनं च मिथ्याज्ञाननिमित्तनैसर्गिकव्यवहारमात्रम् इत्युच्यत इति वाक्यशेषादेवावगम्यत इति स्पष्टम्। 'शरीरात्माभिमानलक्षणं मिथ्याज्ञानम्' इति, 'मिथ्याभिमानस्तु प्रत्यक्षः संबन्धहेतुः', 'अन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव' इति च मिथ्याज्ञानस्य 'शरीरात्माभिमानः', 'भ्रान्तिः' इति शब्दान्तरेण व्याख्यानदर्शनाद्धि मिथ्याज्ञानशब्दः सम्यग्ज्ञानप्रतिद्वन्द्विविपरीतज्ञानवाचक इत्यवसीयते। इत्थं च "मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदम्', 'ममेदम्' इति नैसर्गिकोऽयं लोकव्यवहारः" (सु. पा. १–१२) इति यदुक्तमध्यासभाष्ये, तेनास्य '**सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्**' इति भाष्यस्यैकवाक्यता संपद्यते। तदेवं स्थितेऽपि यद् व्याख्यानकाराः केचिद्व्याचक्रुः-(१) " 'मिथ्या' इत्यनिर्वचनीयता उच्यते। 'अज्ञानम्'

इति च जडात्मिका अविद्याशक्तिर्ज्ञानपर्युदासेनोच्यते । तन्निमित्तः, तदुपादानः–इत्यर्थः " इति । तद्भाष्याशयाननुगुणम् – इत्यवसीयते ॥

(२) भाष्ये 'तस्य (अप्रसिद्धवस्तुभेदस्य) तु अन्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेव' इति स्पष्टमुद्घोषिते " यथा मन्दान्धकारे 'स्थाणुरयम्' इत्यगृह्यमाणविशेषे पुरुषशब्दप्रत्ययौ स्थाणुविषयौ " इति वाक्यम् अन्यथैव व्याचक्रुर्व्याख्यातारः केचित् । कथम् ? " तत्र संशये समारोपितांशगतौ शब्दप्रत्ययौ उदाहृतौ 'यथा' इति । पुरोवर्तिनः स्थाणुत्वेऽपि स्थाणुरित्यगृह्यमाणविशेषत्वे हेतुमाह – मन्देति । तत्र पुरुषशब्दप्रत्ययौ 'पाक्षिकौ' इति शेषः । वस्तुतः स्थाणुविषयत्वं न प्रतीतितः । प्रतीतितस्तु आरोपितविषयत्वात् " इति ॥

नेदं समञ्जसं व्याख्यानम् इति वयं प्रतीमः । न हि भाष्यकृदाह " 'स्थाणुर्वा पुरुषो वा' इति संशयफले यदा पाक्षिकौ शब्दप्रत्ययौ भवतः " इति ; नापि 'आरोपितविषयकौ शब्दप्रत्ययौ' इति । प्रत्युत विस्पष्टमेवाऽऽचष्टे 'पुरुषशब्दप्रत्ययौ स्थाणुविषयौ' इति । तस्मान्नास्ति भाष्याक्षरगतं किञ्चिद्गमकं स्थाणुपुरुषभ्रान्तौ सांशयिकौ पुरुषशब्दप्रत्ययौ, शुक्तिरजतस्थले तु निश्चितौ–इत्यत्र । समानमेव हि अगृह्यमाणविशेषत्वं विकल्पास्पदस्य । यथैव हि 'स्थाणुरयम्' इति वस्तुविशेषं न गृह्णाति प्रथमे दृष्टान्ते, तथैव 'शुक्तिकेयम्' इति वस्तुविशेषं न गृह्णाति द्वितीये । मन्दान्धकारनिमित्तं तु पुरोऽवस्थितं यत्किञ्चिद् दृष्ट्वा 'पुरुषोऽयम्' इति विपर्यस्यति प्रथमे

निदर्शने, अह्नयेव तु चाकचक्ययुक्तं पुरोऽवस्थितं दूरतो दृष्ट्वा रजतमिति निश्चिनोति द्वितीये इति वैलक्षण्यम् । इत्थं चान्धकारलक्षणोपाधिनिमित्तो विपर्यासः एकत्र, अनवधानहेतुकाविवेकमात्रकृत इतरत्र – इत्येतावान् विशेषः । उभयत्रापि त्वन्यस्यान्यत्रान्यशब्दप्रत्ययौ भ्रान्तिनिमित्तावेवा-प्रसिद्धवस्तुभेदस्य पुरुषस्य–इत्येव समीचीनं व्याख्यानमित्युत्पश्यामः ॥

(३) अथ शुक्तिरजतभ्रान्तिगतं प्रक्रियान्तरं विमृक्ष्यामः । देहादिष्वात्माभिमानो भ्रान्तिनिमित्त एवेति स्फुटीकर्तुमुदाहृतं भाष्ये दृष्टान्तद्वयम् इति तावदविवादम् । तत्र व्याख्यानप्रस्थानीया प्रक्रियां रचयन्ति – अविद्यैव बाह्यदोषलक्षणनिमित्तकारणापेक्षया रजताकारेण साक्षिचैतन्यस्थरजतावच्छेदज्ञानाभासाकारेण च परिणममाना साक्षि-चैतन्यस्य विषयभावं प्रतिपद्यते–इति । ' ननु संप्रतिपन्नोऽर्थाभावोऽत्र ' इत्याशङ्क्य यथाप्रतिभासमेव मिथ्यारजतस्योत्तरज्ञानेन निरसनयोग्य-स्यैवोपगमात्, लौकिकपरमार्थदृष्टरजतप्रतियोगिकाभावविषयत्वात् रजते त्रैकाल्याभावस्य – इति संविद्द्वयानुरोधेन व्यवस्थासिद्धेः ; अन्यतर-संविदपह्नवायोगात् । तथा चोभयसंविद्विषयानुभवः ' नास्त्यत्र रजतम् ', ' मिथ्यैव रजतमभात् ' इति – इति च ॥

सैषा प्रक्रिया न केवलं भाष्याक्षरबहिर्भूता किं तर्हि सार्वत्रिक-लोकानुभवसिद्धं दृष्टान्तमपि स्वेष्टार्थस्थापनार्थमन्यथयितुं प्रयतत इति सर्वथा अनादेया । तथा हि – उदाहृतमेव तावत् भाष्यवाक्य-मत्रत्यम् " अकस्माद् 'रजतम्' इति निश्चितौ शब्दप्रत्ययौ " इति । अन्यत्रापि वक्ष्यति भगवान् भाष्यकारः सावधारणम् –

'शुक्तिकां रजतमिति प्रत्येतीत्यत्र शुक्तिकावचन एव शुक्तिकाशब्दः। रजतशब्दस्तु रजतप्रतीतिलक्षणार्थः; प्रत्येत्येव हि केवलं रजतमिति, न तु तत्र रजतमस्ति' (सू. भा. ४–१–५, पा. ४६७) इति। अतो भाष्याक्षरबहिर्भूता लौकिकपरमार्थव्यतिरेकेण प्रातिभासिक-रजतोत्पत्तिकल्पनाप्रक्रियेति सिद्धम्। लौकिकानुभवविरुद्धा खल्वपीयं प्रक्रिया। तथा हि लौकिकाः पृष्टा सर्वत्र वदन्ति 'नासीदेव रजतम्, भ्रान्त्यैव केवलं तथा प्रतीतम्' इति। सर्वपरीक्षकासंप्रतिपन्ना च खल्वियं प्रक्रिया। न हि सर्वे परीक्षका प्रस्थानान्तरस्थिता अभ्युपगच्छन्ति, प्रातिभासिकरजताद्युत्पत्तिं भ्रान्तिस्थले। तस्मात् लौकिकपरीक्षकोभय-संप्रतिपत्त्यभावात्, सर्वथापि हेयेयं प्रक्रियेत्यलमतिप्रपञ्चेन॥

(४) अथ प्रकृतभाष्ये 'आत्मानात्मविवेकिनामपि पण्डिता-नामजाविपालानामिवाविविक्तौ शब्दप्रत्ययौ भवतः' इति देहात्मनो-र्भेदेन प्रसिद्ध्यभावदर्शनार्थं यदुदितम्, तत्र के ते आत्मानात्मविवेकिनः विवक्षिताः? – इत्यत्र व्याख्यानप्रस्थानीयाः केचित् कल्पयन्ति – "'आत्मानात्मविवेकिनाम्' इति श्रवणमननकुशलतामात्रेण पण्डितानाम्, अनुत्पन्नसाक्षात्काराणाम् इति यावत्" (भा.) इति। तदेतदनादेयम्। अतत्प्रकरणात्। न हीदं भाष्यवाक्यं केवलाभ्यां श्रवणमननाभ्यां साक्षात्कारो न जायते किं तर्हि श्रवणादिसंस्कारसचिवमनोजन्यः – इति प्रतिपादयितुं प्रवृत्तम्, येन व्याख्यातृवर्णितो भाष्याशय इत्यपि स्यात्, प्रत्युत "देहादिसङ्घाते जायमानोऽहंप्रत्ययो भ्रान्तिनिमित्त एव न गौणः, अतो वस्तुमात्रकथनेनाऽप्यवगतब्रह्मात्मज्ञानस्य तादृशमिथ्या-

प्रत्ययनिवृत्तिः स्यात्, रज्जुस्वरूपकथनमात्रेण भ्रान्तिजनितभीतिनिवृत्तिरिव " इति प्रतिपादयितुं प्रवृत्तम्–इत्युपक्रमसामर्थ्यात् गम्यते। मननिदिध्यासनयोरर्थवत्त्वं त्वनुपदमेव भाष्ये समुपपादयिष्यत इति न युक्तं प्रकृतहानाप्रकृतप्रक्रियाश्रयणमिति मन्तव्यम् ॥

तस्मात्, शास्त्रप्रमाणे श्रद्धया ये देहादिसङ्घाताद् व्यतिरिक्तमात्मानं निश्चितवन्तः, त एवेह 'आत्मानात्मविवेकिनः पण्डिताः' इति परामृष्टाः । तेषामप्यजाविपालानामिव शास्त्रज्ञानविधुराणाम् अविविक्तावेव 'अहम्' इति शब्दप्रत्ययौ देहादौ भवतः – इत्येव तु भाष्याशयः । उक्तं चेदम् **अध्यासभाष्ये** 'शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वा आत्मनः परलोकसंबन्धम् अधिक्रियते, तथापि न वेदान्तवेद्यम् अशनायाद्यतीतम् अपेतब्रह्मक्षत्रादिभेदम् असंसार्यात्मतत्त्वम् अधिकारे अपेक्ष्यते ; अनुपयोगात्, अधिकारविरोधाच्च । प्राक्च तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रम् अविद्यावद्विषयत्वं नातिवर्तते ' (सु. ६–४८, पा. ७१, ७२) इति । व्याख्यातं चास्माभिः **सुगमायाम्** इति तत एवाधिगन्तव्यमन्यत् । तदेतत् सर्वमभिसन्धायोपसंहरति–'**तस्मात् देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादौ अहंप्रत्ययो मिथ्यैव न गौणः**' इति ॥

अतो व्याख्यान्तराहृतकल्पनाः समुपेक्ष्य यथाव्याख्यात एव भाष्याशयो गृहीतव्यो जिज्ञासुभिः ॥

( भाष्यम् )

**तस्मात्, मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम् । तथा च ब्रह्मविद्विषया**

श्रुतिः 'तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते । अथाऽयमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव' (बृ. ४-४-७) इति । 'सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इव' (?) इति च । स्मृतिरपि 'स्थितप्रज्ञस्य का भाषा' (गी. २-५४) इत्याद्या स्थितप्रज्ञलक्षणान्याचक्षाणा विदुषः सर्वप्रवृत्त्यसंबन्धं दर्शयति । तस्मात्, नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वम्; यस्य तु यथापूर्वं संसारित्वम्, नासाववगतब्रह्मात्मभाव इत्यनवद्यम् ॥

११७. जीवतोऽपि विदुषोऽशरीरत्वे प्रमाणम् — एवं तावत् युक्त्युपबृंहितानुभवबलेनाशरीरत्वं जीवतोऽपि विदुषः प्रसाधितं निगमयति – '**तस्मान्मिथ्याप्रत्ययनिमित्तत्वात् सशरीरत्वस्य सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम्**' इति । अत्र 'मिथ्याप्रत्ययनिमित्तत्वात्' इति सुस्फुटमुदीरणात्, मिथ्याभूतभावरूपाज्ञानोपादानकत्वं शरीरादेरातस्थुषां व्याख्यानप्रस्थानीयानां मतमपहस्तितं भवति । मिथ्यैव हि प्रत्येति लोकः सशरीरोऽहमिति नित्यमशरीरमेव सन्तमात्मानं वेदान्तशास्त्रप्रमाणजनितब्रह्मात्मभावज्ञानाभावादित्याशयेनात्र प्रमाणभूतं शास्त्रवाक्यमुदाहरति – '**तथा च ब्रह्मविद्विषया श्रुतिः**' इतिपातनिकापूर्वकम् । 'तद्यथाऽहिनिर्ल्वयनी' इत्यादेर्मन्त्रस्यायमर्थः । यथा लोके अहिनिर्ल्वयनी सर्पत्वक् मृता प्रत्यस्ता

जीर्णत्वात् परित्यक्ता शयीत वर्तेत वल्मीके, एवमेवेदं विदुषः शरीरं अनात्मभावेनानादृतं उपेक्षितं च शेते मृतशरीरमिव वर्तते । अथायं विद्वान् व्यवहारदृष्ट्या शरीरे वर्तमानोऽपि अशरीर एव, तत्राभिमानाभावात् । अमृतः अविद्याकामकर्मलक्षणमृत्युवियोगान्मर्त्यत्वासंस्पृष्टः ; प्राण एवायम् सर्वेषामपि प्राणानां प्राणनहेतुत्वात् । ब्रह्मैव । तेज एव नित्यचैतन्यप्रकाशस्वरूप एव यत्स्वप्रज्ञया सर्वमेव जगदवभास्यते – इति । अत्र खलु श्रुतौ विद्वान् आत्मकामत्वात्, आप्तकामोऽकामश्च सन् मर्त्यत्वविमुक्तः शरीरात्मभावरहितत्वात्, सत्यपि व्यावहारिकदृष्ट्या शरीरे, स्वदृष्ट्या अशरीर एव भवतीत्युक्तम् । अथात्रैवार्थे श्रुत्यन्तरमुदाहरति – 'सचक्षुरचक्षुरिव सप्राणोऽप्राण इव' (?) इत्यादि । व्यावहारिकदृष्ट्या सचक्षुरपि अचक्षुरेव वस्तुतः, चक्षुरात्मभावाभावेन तदभिमाननिबन्धनद्रष्टृत्वबाधात् । एवं 'सकर्णोऽकर्ण इव' इत्यादेरप्यर्थोऽनुसंधेयः । सर्वकार्यकरणसङ्घाताभिमानवर्जितत्वात् सशरीरः सम्पीतरदृष्ट्या स्वदृष्ट्या अशरीर एव भवतीति पिण्डितार्थः । 'स्मृतिरपि' इति यथोदाहृतश्रुत्यभिप्रायमेवानुवदतीत्याशयेन भगवद्वचनमुदाहरति । तत्र विवक्षितार्थं संगृह्णाति 'इत्याद्या स्थितप्रज्ञलक्षणाभ्याचक्षाणा विदुषः सर्वप्रवृत्त्यसंबन्धं दर्शयति' इति । एषा हि स्मृतिः 'प्रजहाति यदा कामान् .... आत्मन्येवात्मना तुष्टः' (गी. २–५५) इति कार्यकरणसङ्घातकर्मसु सर्वथाप्यात्मीयत्वबुद्ध्यभावात्, आत्मन्येवात्मबुद्धिमतो विदुषः सशरीरत्वेनान्यैर्विभाव्यमानस्यापि स्वदृष्ट्या सर्वप्रवृत्तिरहितात्मभावेनैव स्थिति-

माचष्टे इति भावः । तदेवं श्रुतिस्मृतिप्रमाणकं युक्त्युपेतानुभवानुसारि च जीवतोऽपि विदुषोऽशरीरत्वं यत्प्रतिज्ञातमस्माभिः – इत्यभिप्रायः ॥

११८. श्रवणमात्रादवगतब्रह्मात्मभावस्यापि संसारित्वं बाध्यते – यद्यपि वाक्यश्रवणमात्रेण न सर्वस्यापि ब्रह्मात्मानुभवः सञ्जायते, तथापि यस्य पुरुषधौरेयस्य सोऽनुभवो भवति, न तस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुम् – इति यदुक्तमस्माभिः (२०६) तदव्याहतमेव स्थितम्, संसारित्वप्रयोजकस्य सशरीरत्वस्य भ्रान्तिकृतत्वात्, ब्रह्मात्मत्वानुभवेन बाधितभ्रान्तेः पुरुषस्य भ्रान्तिनिमित्तसशरीरत्वानुवृत्त्यनुपपत्तेः । एतमेव ह्युत्तमाधिकारिणमभिप्रेत्य वस्तुमात्रकथनेऽपि 'रज्जुरियम्, नायं सर्पः' इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं स्यादित्यस्माभिः प्राक् प्रत्यज्ञायि–इति भावः । अथ यस्तु नैवं शक्नोति सकृदुक्तमेव वाक्यार्थमनुभवितुम्, तं प्रतीदमुच्यते 'यस्य तु यथापूर्वं संसारित्वम्, नासाववगतब्रह्मात्मभाव इत्यनवद्यम्' इति । न तं वयं सकृद्वस्तुस्वरूपकथनमात्रेण कृतकृत्यं प्रतिजानीमहे । न हि दृष्टान्ते सकृद्रज्जुस्वरूपकथनमात्रेण सर्वस्यापि सर्पभ्रान्तिर्नियमेन निवर्तते लोके–इति भावः ॥

## १९. श्रवणवन्मनननिदिध्यासनयोरपि अवगत्यर्थत्वमेव

( भाष्यम् )

यत्पुनरुक्तम्, श्रवणात् पराचीनयोर्मनननिदिध्यासनयोर्दर्शनाद् विधिशेषत्वं ब्रह्मणः, न

**स्वरूपपर्यवसायित्वमिति, न ; अवगत्यर्थत्वान्मनननिदिध्यासनयोः। यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत, भवेत्तदा विधिशेषत्वम् । न तु तदस्ति। मनननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात् । तस्मात्, न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवतीत्यतः स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकम्, वेदान्तवाक्यसमन्वयात् इति सिद्धम् ॥**

११९. उत्तरग्रन्थसङ्गतिः – पदार्थज्ञानपूर्वकत्वाद् वाक्यार्थज्ञानस्य, यस्यैवाप्रतिबद्धं तत्त्वंपदार्थयोर्ज्ञानम्, तस्यैव 'तत्त्वमसि' – इत्येतद् वाक्यं स्वार्थे प्रमाम् उत्पादयितुं शक्नोति। यस्य तु पदौ पदार्थौ अज्ञानसंशयविपर्ययप्रतिबद्धौ, तं प्रति मनननिदिध्यासनयोरप्यावश्यकतास्ति वाक्यार्थावगत्युत्पत्तये – इति सिद्धान्तिनो मतम्। तदिदमजानन् पूर्वपक्षी सर्वेषामपि श्रवणमात्रेण ब्रह्मात्मत्वावगतिर्भवित्रीत्युक्तं सिद्धान्तिनेति भ्रान्त्या शङ्कते। तदनूद्य समाधत्ते **'यत्पुनरुक्तं श्रवणात् पराचीनयोर्मनननिदिध्यासनयोर्दर्शनाद् विधिशेषत्वं ब्रह्मणः, न स्वरूपपर्यवसायित्वम् इति, न ; अवगत्यर्थत्वान्मनननिदिध्यासनयोः'** इति । संग्रहवाक्यं विवृणोति **'यदि हि'** इत्यादिना ॥

१२०. **मनननिदिध्यासनयोरप्यवगत्यर्थत्वमित्यस्य कोऽर्थः ?** – अत्र हि पूर्वपक्षिणो हृदये अयमाशय आसीत् –

'स्यादपि ब्रह्मवस्तुबोधकवाक्यानां कर्तव्यविधिमन्तरेणापि स्वातन्त्र्येण ब्रह्मणि प्रामाण्यम्, यदि ब्रह्मस्वरूपश्रवणमात्रेणैव कृतार्थता मुमुक्षोः प्राप्येत । न त्वेतदस्ति ; श्रवणोत्तरमपि मनननिदिध्यासनयोः कर्तव्ययोर्विधिदर्शनात् । एवं हि वस्तुबोधकवाक्यानि श्रुत्वा संसारित्वनिवृत्तये मनननिदिध्यासने अपि अवश्यं कर्तव्ये – इत्यत्रैव श्रुतेस्तात्पर्यमित्यवसीयते । तस्मात्, कार्यविधिप्रयुक्तस्यैव ब्रह्मणः शास्त्रप्रमाणकत्वमित्यकामेनापि सिद्धान्तिना अङ्गीकर्तव्यम्' – इति । **निराकरणभाष्यस्य** त्वयमभिप्रायः – स्यादेतदेवं यदि श्रवणमात्रेण न कस्यचिदपि परमपुरुषार्थावाप्तिः स्यात्, श्रुतब्रह्मणो मनननिदिध्यासनसमुच्चयेनैव मोक्षो भविता इति समुपदिष्टं वा स्यात् । न त्वेवम् । क्वचिद्धि वाक्यश्रवणमात्रेण ब्रह्मात्मावगतिर्जायते, क्वचित्तु मनननिदिध्यासनयोः साचिव्येन – इति तु स्थितिः । उपपादयिष्यते च यथेदं तथा आवृत्त्यधिकरणभाष्ये । इत्थं हि भाष्यवाक्यं तत्र 'येषां पुनर्निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबन्धोऽस्ति, ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुम्.... । सकृदुत्पन्नैव ह्यात्मप्रतिपत्तिरविद्यां निवर्तयतीति नात्र कश्चिदपि क्रमोऽभ्युपगम्यते । .... यस्य तु नैषोऽनुभवो द्रागिव जायते, तं प्रत्यनुभवार्थ एवावृत्त्यभ्युपगमः । तत्रापि न तत्त्वमसिवाक्यार्थात् प्रच्याव्य आवृत्तौ प्रवर्तयेत् । न हि वरघाताय कन्यामुद्वाहयन्ति । नियुक्तस्य च 'अस्मिन्नधिकृतोऽहं कर्ता, मयेदं कर्तव्यम्' इत्यवश्यं ब्रह्मप्रत्ययात् विपरीतप्रत्यय उत्पद्यते । यस्तु स्वयमेव मन्दमतिः, अप्रतिभानात् तं

वाक्यार्थं जिज्ञासेत्, तस्यैतस्मिन्नेव वाक्यार्थे स्थिरीकार आवृत्त्यादिवाचोयुक्त्या अभ्युपेयते ' (सू. भा. ४–१–२, पा. ४६२, ४६३) इति । तदेवेहाप्युच्यते ' यदि ह्यवगतं ब्रह्मान्यत्र (उपासनादौ) विनियुज्येत, भवेत्तदा विधिशेषत्वम् ; न तु तदस्ति ' इति । अयमर्थः, श्रवणेनावगतस्य ब्रह्मणः, अन्यत्र विहितकार्यानुष्ठाने मनननिदिध्यासनलक्षणे नास्ति विनियोजनम् । कुतः ? मनननिदिध्यासनयोरपि श्रवणवदेव अवगत्यर्थत्वात् । अदृष्टमोक्षार्थोपासनायां विनियोगाभावात् इति ॥

**१२१. श्रवणादीनां विनियोगो व्याख्यानप्रस्थानरीत्या, तद्विमर्शश्च** – अत्रान्यथैवेमं भाष्यभागं व्याचक्षते व्याख्यानप्रस्थानीयाः । कथम् ? (१) श्रवणं ज्ञानकरणवेदान्तगोचरत्वात् प्रधानम्, मनननिदिध्यासनयोः प्रमेयगोचरत्वात् तदङ्गत्वम्, नियमादृष्टस्य ज्ञाने उपयोगः, सर्वापेक्षाधिकरणन्यायादिति मन्तव्यम् – इत्येके । अत्र श्रवणादयो विधीयन्ते न वा–इत्येतदेव तावद्विवादपदमारोप्य बहुधा विकल्पयन्ति व्याख्यातारः । तत्र श्रवणविध्यपेक्षाधिकार्याद्यनुबन्धं न्यायेन निर्णेतुं ब्रह्मजिज्ञासासूत्रप्रवृत्तिः – इति पक्षः प्रत्याख्यातः **जिज्ञासाधिकरणविवेचनीपरिशिष्टे** (जि. ५४, पा. ११७) ; तत्प्रकारस्तत एवावगन्तव्यः । मनननिदिध्यासनयोः प्रमेयगोचरत्वात् श्रवणाङ्गत्वम्, श्रवणस्य तु ज्ञानकरणवेदान्तगोचरत्वात् प्राधान्यम् – इति विवेचनं तावत् कुत्रापि भाष्ये नोपलभ्यते । श्रवणमात्रेण निपुणमतीनां वाक्यार्थावगतिर्जायते इति वचनबलात्

कथञ्चिच्छ्रवणस्य प्राधान्यं लभ्येतापि । ब्रह्मज्ञानमुद्दिश्य श्रवणवन्मनन-निदिध्यासनयोरप्यवान्तरवाक्यभेदेन विध्यङ्गीकारः – इत्यपि यदि "आत्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविकात् कार्यकरणसङ्घातप्रवृत्ति-गोचराद् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति ' आत्मा वा अरे द्रष्टव्यः ' इत्यादीनि " (१८०) इति भाष्याभिप्रायव्याख्यानार्थं चेत् तत्तथा नामास्तु । अथ ' आत्मज्ञानमुद्दिश्य श्रवणादीनामवान्तर-वाक्यभेदेन विध्यङ्गीकारः ', यत्कारणं श्रवणविधिमन्तरेण ज्ञानार्थ-वाक्यश्रवणे न कश्चित् प्रवर्तते–इति चेदाशयः, तदा ' आत्मवादिवाक्ये यथा विधिमन्तरेण न प्रवर्तते, तथा विधिवाक्यश्रवणेऽपि विधि-मन्तरेण न प्रवर्तिष्यत इति विध्यन्तरापेक्षा स्यात् तथा तदर्थश्रवणेऽपि – इत्येवमनवस्था स्यादिति मन्तव्यम् ॥

(२) **' मननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात् '** इति वाक्यमन्यथैव व्याख्येयम्–इत्यपरे । मननिदिध्यासनयोरपि न विधिः, तयोरन्वयव्यतिरेकसिद्धसाक्षात्कारफलयोर्विधिसरूपैर्वचनैरनु-वादात् इति भाष्याशयोऽनुमतस्तेषाम् । अत्र श्रवणादीनां विहितत्वमस्ति वा न वा ?–इत्येतस्याप्रकरणार्थत्वात् व्यर्थायास एषः – इति वयमभि-प्रैमः । वाक्यादवगतं ब्रह्म विधौ शेषत्वेन विनियुज्यते, न वा ? – इति संशये नावगतस्यान्यत्रविनियोगोऽस्तीति ह्युद्घोषयति भाष्यकारः । श्रोतव्यादीनां प्रत्यगात्मस्रोतस्तया प्रवर्तनेनैव विधिच्छायवचनानां विनियोगमादावेव कथितवांश्च भगवान् इति न श्रवणस्य विधेयत्वं पुनरिहोत्थापयितव्यम् । अथ मतम् – ' वाक्यश्रवणमात्रेण न कस्यचित्

साक्षात्काररूपावगतिर्जायते – इत्यत एव मनननिदिध्यासने श्रुतब्रह्माणमधिकारिणं प्रति विधीयेते ' इति पूर्वपक्ष्याशयनिराकरणार्थमेवं व्याख्यायत इति, तथापि भाष्यविरोधस्तदवस्थ एव । ' श्रवणमात्रेण न साक्षात्कारो जन्यते, किं तु मनननिदिध्यासनसहितेनैव ; तयोश्च मनननिदिध्यासनयोरन्वयव्यतिरेकसिद्धसाक्षात्कारफलयोर्विधिसरूपैर्वचनैरनुवादः-इति हि प्रस्थानं श्रवणमात्रेणाप्यवगतिमुद्घोषयता भाष्येण विरुद्धमेवेति न तिरोहितमेतत् । एतेन यदुच्यते एतैरेवान्यत्र ' आत्यन्तिके हि जीवपरमात्मनोरभेदे तात्त्विके अनाद्यविद्योपाधिभेदकल्पितो भेदः, तत्त्वमसीति जीवात्मनोर्ब्रह्मभावतत्त्वोपदेशश्रवणमनननिदिध्यासनप्रकर्षपर्यन्तजन्मना साक्षात्कारेण विद्यया शक्यः समूलकाषं कषितुम्, रज्ज्वामहिविभ्रम इव रज्जुसाक्षात्कारेण ' (बा. भा. पा. ४१७) इति, अत्रापि केवलश्रवणमात्रेणानुभवो न जायत इत्युक्तम् । अनाद्यविद्योपाधिकल्पितो जीवब्रह्मणोर्भेद इति त्वधिकावापः । तदेतत् सर्वं वेदप्रमाणजनित एव ब्रह्मात्मावगतिर्नान्यापेक्षा, वाक्यश्रवणमात्रेणापि जायतैव इति, आत्मानात्मनोरन्योन्याध्यासव्यतिरेकेण नास्त्येव काचिदविद्यानामोपाधिः–इति च भाष्यप्रस्थानेन विरुद्धमिति स्पष्टम् । प्रत्याख्यातश्चायं साक्षात्कारवादः पुरस्तादेवेति (खं. ११०, पा. २०७, २०८) न किञ्चिदवशिष्यते पृथगिह वक्तव्यमित्युपरम्यते ॥

(३) वार्तिकप्रस्थाने तु –

अतोऽपुरुषतन्त्रत्वादात्मज्ञाने विधिर्भवेत् ।
अन्वयाविक्रिया त्वस्य तत्तन्त्रत्वाद्विधीयते ॥

श्रवणं मननं तद्वत्तथा शमदमादि यत् ।
पुमान् शक्नोति तत्कर्तुं तस्मादेतद् विधीयते ॥
बृ. वा. २–४–१२१, १२२, पा. १०५३.

इति श्रवणादौ विधिरङ्गीकृतः ; ज्ञाने न विधिः, क्रियायां तु विधिरुपपन्नः – इत्युक्तम् । तेन भाष्यवार्तिकयोर्विरोधाभासः शक्यपरिहार एवेति स्फुटम् । यद्यपि वार्तिके –

'अपरायत्तबोधोऽत्र निदिध्यासनमुच्यते ॥'
बृ. वा. २–४–२१७

इत्यनुभव एव निदिध्यासनशब्देन व्यपदिश्यते । भाष्ये तु –

"अपि च 'उपासनम्', 'निदिध्यासनं च' इत्यन्तर्णीतावृत्तिगुणैव क्रिया अभिधीयते" सू. भा. ४–१–१

इति साधनभूतक्रियैव निदिध्यासनशब्देनोच्यत इति वैषम्यमिव, तथापि 'विज्ञानोत्पत्तिहेतुत्वं ध्यानादेः प्रागवादिषम्' (बृ.वा. २–४–२३४) इति ध्यानस्य विज्ञानसाधनत्वमप्यङ्गीकृतमेवेति 'निदिध्यासन'शब्दस्यार्थभेदस्वीकारमात्रेण न प्रस्थानयोर्वैरूप्यम् ; 'स्वार्थमेव तु विज्ञानं मुक्तिमात्रफलं स्मृतम्' (बृ.वा.२-४-२३४) इति वार्तिकेऽपि स्वीकारात् इति ध्येयम् । श्रवणमात्रेणाप्यवगतिरस्तीत्येतत्तु वार्तिककाराणामपि सम्मतमेवेति 'योऽपि वाक्यश्रवणमात्रादेव प्रतिपद्यते, तस्याप्यतीन्द्रियशक्तिमत्त्वात् न किञ्चिदप्यपेक्षितव्यमस्ति' (नै. सि. सं. ३–६४, पा. ३०५) इति नैष्कर्म्यसिद्धिवाक्यादवगम्यते ॥

तदेवम् 'मनननिदिध्यासनयोरप्यवगत्यर्थत्वात्' इतीदं भाष्यवाक्यं 'यदैव ह्युत्तमाधिकारिणः प्रत्युपदिष्टस्य श्रवणस्यावगति-

रेवोद्दिष्टं फलम्, तथैव मध्यमाधिकारिणः प्रत्युपदिष्टयोः श्रवणोत्तरयोर्मनननिदिध्यासनयोरपि प्रातिस्विकम् अवगतिरेवोद्दिष्टं फलम्' इत्यभिप्रायकम्; न पुनः श्रवणादीनां त्रयाणां समुच्चित्यानुष्ठितानामेव अवगतिः फलमिति विवक्षितं भाष्यकृता। तस्मात्, नास्त्येवावसरोऽत्र चिन्तायाः 'किमेषु श्रवणस्यैव प्राधान्यम्, किं वा निदिध्यासनस्य?' इत्यस्याः – इत्यलमतिप्रपञ्चेन॥

१२२. **प्रकृतचिन्तोपसंहारः** – तदेवं यदि श्रवणमात्रेणावगतिर्जायते, यदि वा श्रवणोत्तरं मनननिदिध्यासनयोरप्यपेक्षा अस्त्यवगत्युत्पत्तये, सर्वथापि तु ब्रह्मविज्ञानानन्तरं नावशिष्यते ध्यानादिकार्यं मोक्षार्थम्। तथा च नास्त्येवात्र वेदान्तसिद्धान्ते कार्यविधिप्रयुक्तस्यैव ब्रह्मणः शास्त्रप्रमाणकत्वमिति वृत्तिकारपक्षानुमोदनम् – इत्याह '**यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत भवेत्तदा विधिशेषत्वम्। न तु तदस्ति; मनननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात्**' इति॥

वृत्तिकारमतनिराकरणमुपसंहरति 'तस्मात्' इत्यादिना। '**स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकम्, वेदान्तवाक्यसमन्वयात् – इति सिद्धम्**' इत्यन्वारम्भणम् उत्तरार्थम्॥

## २०. ब्रह्मविषयपृथक्शास्त्रारम्भान्यथानुपपत्त्यापि शास्त्रप्रमाणकत्वं ब्रह्मणः

(भाष्यम्)

**एवं च सति 'अथातो ब्रह्मजिज्ञासा' (१–१–१) इति तद्विषयः पृथक्शास्त्रारम्भ उपपद्यते। प्रतिपत्ति-**

**विधिपरत्वे हि 'अथातो धर्मजिज्ञासा' (जै. १-१-१) इत्येवारब्धत्वान्न पृथक्शास्त्रमारभ्येत । आरभ्यमाणं चैवमारभ्येत – 'अथातः परिशिष्टधर्मजिज्ञासा' इति ; 'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' (जै. ४-१-१) इतिवत् । ब्रह्मात्मैक्यावगतिस्त्वप्रतिज्ञातेति तदर्थो युक्तः शास्त्रारम्भः 'अथातो ब्रह्मजिज्ञासा' इति ॥**

१२३. पृथक्शास्त्रारम्भान्यथानुपपत्तिरपि प्रमाणं स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकमित्यत्र । एवं तावद् ब्रह्मणः शास्त्रप्रमाणकत्वे वेदान्तवाक्यसमन्वयादयो बहवो हेतव उपस्थापिताः । वेदान्तवाक्यश्रवणमात्रादवगतब्रह्मात्मभावस्य न यथापूर्वं संसारित्वमिति चानुभवानुसारियुक्त्युपबृंहितश्रुतिस्मृती समुदाहृते । निश्चितफलवत्त्वाद् वेदान्ता ब्रह्मवस्तुमात्रकथनेनैव तत्र प्रमाणमित्यत्र श्रवणोत्तरं कर्तव्यत्वे-नोपदिष्टयोरपि मनननिदिध्यासनयोरवगत्यर्थत्वान्न कर्तव्यविधिशेषत्वेन ब्रह्म शास्त्रेण समर्प्यत इत्युपपादितम् । अतो यद्यप्येतावतैव 'सर्वोऽपि वेदः कर्तव्यविधिपरः' इतिमतं निराकृतं भवति, 'स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकम्' इति स्वमतं च साधितं भवति, तथापि पृथक्शास्त्रा-रम्भान्यथानुपपत्तिमप्युपन्यस्यन्नाहाभ्युच्चयेन कृत्स्नस्यापि शास्त्रार्थस्य निराकुलत्वप्रदर्शनाय '**एवं च सति...पृथक्शास्त्रारम्भ उपपद्यते**' इति । एवं च सति, 'स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकम्' इत्यङ्गीकारे एव 'अथातो ब्रह्मजिज्ञासा' इति तद्विषयः ब्रह्मवस्तुमात्रविषयः पृथक्शास्त्रारम्भः, धर्मशास्त्रात् पृथग्भूतस्य शास्त्रस्य फलजिज्ञास्य-

वैलक्षण्ययुक्तस्य आरम्भः, उपपद्यते नान्यथा । कुतः ? प्रतिपत्तिविधिपरत्वे शास्त्रस्य केवलोपासनाविधाने एव वेदान्तानां तात्पर्यम् इति हि स्यात् – इत्यर्थः । ननु पूर्वमीमांसायां केवलं बाह्यक्रियाविधिर्विचारितः, इह तूपासनादिर्मानसक्रियाविधिर्विचिचारयिषितः – इत्यपि जिज्ञास्यवैलक्षण्यसिद्धेः प्रतिपत्तिविधिपरत्वमेवास्तु, तथा च शास्त्रत्वमप्यन्वर्थं भविष्यति वेदान्तानाम् – इत्याशङ्क्याह '**अथातो धर्मजिज्ञासा**' इत्येवारब्धत्वान्न पृथक्शास्त्रमारभ्येत – इति । ननु धर्मस्यैव विशेषोऽत्र जिज्ञास्य इत्यप्यारम्भ उपपद्यत इत्याशङ्क्याह "**आरभ्यमाणं चैवमारभ्येत 'अथातः परिशिष्टधर्मजिज्ञासा' इति**" इति । मानसो ह्यत्र जिज्ञास्यत्वेन परिशिष्टो धर्मो ध्यानरूपो भवन्मतेन, अतः 'परिशिष्टधर्मजिज्ञासा' इत्येवमेवारभ्येत भवत्पक्षे, न तु 'ब्रह्मजिज्ञासा' इति वस्तुप्राधान्येन जिज्ञास्यमुपन्यस्यारभ्येत । ननु ब्रह्मापि जिज्ञास्यधर्मशेषत्वेनोल्लेखमर्हत्येव – इत्याशङ्क्याऽऽह '**आरभ्यमाणं च**' इति । तदापि 'परिशिष्टधर्मजिज्ञासा' इत्येवमेवारभ्येत –'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' इतिवत् । पूर्वतन्त्रे हि तृतीयाध्याये शेषशेषित्वनिर्णयानन्तरं कः क्रतुशेषः, को वा पुरुषशेषः ? – इति जिज्ञासितम् । तद्वदिहापि परिशिष्टधर्मप्रयोजककायिकवाचिकलक्षणबाह्यधर्मजिज्ञासानन्तरं परिशिष्टस्य मानसधर्मस्य जिज्ञासा कर्तव्या – इत्येव प्रतिज्ञा समभविष्यत् – इत्यर्थः । तादृशधर्मजिज्ञासां प्रस्तुत्य तदनन्तरम् 'उपासनार्था ब्रह्मजिज्ञासा' इति वा मध्ये आरभ्येत, न तु ब्रह्मवस्तुप्राधान्येन । अथ तु यथास्माकं मतं ब्रह्मज्ञानस्यैवात्र प्राधान्यम्,

तथैव ब्रह्मात्मावगतिलक्षणज्ञानार्थं जिज्ञासां सूचयतः शास्त्रारम्भः स्यात् ' अथातो ब्रह्मजिज्ञासा ' इति । एवमेव हि पूर्वस्मिन् शास्त्रे अनधिगतस्य विचारार्थं पृथक्शास्त्रमारब्धं स्यादित्याह ' ब्रह्मात्मैक्यावगतिस्तु ' इत्यादिना ॥

## २१. ब्रह्मज्ञानानन्तरं सर्वव्यवहाराभावाच्च न विधिशेषत्वं ब्रह्मणः

( भाष्यम् )

तस्मात्, ' अहं ब्रह्मास्मि ' इत्येतदवसाना एव सर्वे विधयः सर्वाणि चेतराणि प्रमाणानि । न हि अहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाणि, अप्रमातृकाणि च प्रमाणानि भवितुमर्हन्तीति ॥

अपि चाहुः –

गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् ।
सद्ब्रह्मात्माऽहमित्येवं बोधे कार्यं कथं भवेत् ॥ १ ॥
अन्वेष्टव्याऽऽत्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः ।
अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्जितः ॥ २ ॥
देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः ।
लौकिकं तद्वदेवेदं प्रमाणं त्वाऽऽत्मनिश्चयात् ॥ ३ ॥

इति ॥

इति समन्वयाधिकरणभाष्ये द्वितीयं वर्णकम् ॥

१२४. **धर्मब्रह्मज्ञानयोर्विरुद्धस्वभावत्वादपि वृत्तिकारमतं हेयम्** – अथ यदुच्यते वृत्तिकारैः – ' य आत्माऽऽपहतपाप्मा ........ सोऽन्वेष्टव्यः स विजिज्ञासितव्यः ' (छां. ८–७–१) इत्यादिषूपासनाविधानेषु सत्सु कोऽसावात्मा ? किं तद्ब्रह्म ? – इत्याकाङ्क्षायां 'तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः' (९७-९८)–इति, तदसत्; यत्कारणं जिज्ञासोरात्मैवाद्वितीयतत्त्वस्वरूपम् – इत्यवगतं ब्रह्म नान्यत्र विहिते क्रियानुष्ठाने विनियोक्तुं शक्यते। ब्रह्मात्मविज्ञानानन्तरं क्रियाकारकफललक्षणप्रपञ्चस्यैवानवशेषात् इत्यादर्शितम्। तस्मात्, अनुवृत्त एव कर्तृत्वभोक्तृत्वलक्षणे संसारित्वे प्रवृत्तिनिवृत्त्योः सावकाशत्वम्। कर्तृत्वभोक्तृत्वे च नियमेनाऽऽत्मनः प्रमातृत्वमाक्षिपतः – इति प्रत्यक्षादिप्रमाणान्यपि यथायथं धर्मजिज्ञासायामेवावकाशं भजेरन्। यद्यपि धर्मोऽतीन्द्रियः प्रत्यक्षादिप्रमाणैरनवगतत्वात् चोदनाप्रमाणक एव, तथापि स्वनिष्पत्तये चोदितकर्मानुष्ठाने प्रत्यक्षादिप्रमाणानि लोकदृष्टं कर्तृत्वं भोक्तृत्वं च यावत्तावत् आक्षिपत्येवेति व्यवहारावस्थायामेव सर्वे विषयः सावकाशा इति स्पष्टम्॥

तदेवं धर्मज्ञानजन्मन ऊर्ध्वमपि चोदितक्रियानुष्ठानाक्षिप्तप्रमातृत्वकर्तृत्वभोक्तृत्वादीनामनुवृत्तेः, सर्वे विषयः लब्धावकाशाः स्युः, सर्वाणि च प्रमाणानि। अद्वितीयब्रह्मात्मज्ञानजन्मनस्तूर्ध्वं प्रमातृत्वादीनां सर्वेषामपि मिथ्याज्ञानविलसितत्वेनाध्यवसानात् न कथञ्चित् कस्यचिदपि जिज्ञासायाः कार्यस्य वा सम्भव इति, कस्य वा उपासनविधेर्लब्धप्रसरत्वम्? कथङ्कारं च तस्यामवस्थायां ब्रह्मण उपासनाविधिशेषत्वं

शक्यं चिन्तितुमपि, कस्य वा उपासकत्वं केन वा प्रमाणेन शक्यावगमं भवेत् ? तस्मात् सर्वथा अभित्तिचित्रमेतदुपास्यस्वरूपसमर्पणेन वेदान्तानां प्रामाण्यकल्पनं धर्मब्रह्मज्ञानयोर्विरोधं नित्यनिरस्तप्रमाणप्रमेयक्रिया-कारकफलादिव्यवहारस्य ब्रह्मात्मभावस्य सतत्त्वमजानतामित्यभिसन्धाय परमसिद्धान्तमाह **'तस्मात्'** इत्यादिना **' प्रमाणानि भवितुमर्हन्ति '** इत्यन्तेन ॥

**१२५. ब्रह्मात्मत्वावगतेरूर्ध्वमपि प्रमाणाद्यनुवृत्तौ उपपत्तिः** – अत्र भवेच्छङ्का—ब्रह्मात्मत्वावगतावपि किमिति प्रत्यक्षा-दीनि प्रमाणानि शाब्दप्रमाणसहितानि नानुवृत्तजीवितानि भवेयुः ? – इति । तत्र समाधानम् **' न ह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाणि, अप्रमातृकाणि च प्रमाणानि भवितुमर्हन्ति '** इति । यत्र हि हेयमुपादेयं वा किञ्चित् स्वात्मनोऽन्यद् वर्तते तत्र तज्जिहासुरुपादित्सुर्वा प्रमाता तद्धानायोपादानाय वा किञ्चिदनुष्ठातुं प्रवर्तेतेति सम्भावनीयम् । यथाह श्रुतिः ' यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति ........ तदितर इतरं विजानाति ' (बृ. ४–५–१५) इति । यदा तु ब्रह्मात्मैकत्वावगत्या सर्वमद्वैतात्मतत्त्वमेवेति विज्ञातम्, तदा द्वितीयविषयस्याभावे जिहासोरुपादित्सोर्वा प्रमातु-रप्यभावे निश्चिते, आश्रयविषयशून्यानि प्रमाणानि कथं वा जीवेयुः, शुष्कजले कासारे निराहारा इव जलजन्तवः ? – इत्याशयः ॥

तदेवं यत्तत्प्रतिज्ञातम् अध्यासभाष्ये ' तमेतम् अविद्याख्य-मात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा

लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि ' (सु. ५, पा. ५१) इति, तदेतत् कार्यविधिवादिवृत्तिकारमतनिराकरणव्याजेन सप्रपञ्चं निरूप्यानुभवानुरूढं कृतम् । यदप्युपसंहृतं तत्र ' अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते ' (सु. ९, पा. ९५) इति, तदप्यत्र वेदान्तप्रमाणस्वरूपकृत्यफलानां निरूपणप्रसङ्गेनोपसंहृतम् ॥

१२६. अधिकरणार्थे साम्प्रदायिकोक्तिसंवादः — कृत्स्नस्यापि समन्वयाधिकरणस्य सारं संगृह्योक्त्वा स्वाभिप्राये संप्रदायविदां वचनं प्रमाणत्वेनोदाहरति ' अपि चाहुः ' इति ॥

' गौणमिथ्यात्मनोऽसत्त्वे ' इत्यादिश्लोकत्रयं कस्याचार्यस्येति न विज्ञायते । प्राचीनटीकायां तु ' श्लोकैः संगृह्णाति ' इति लिखितत्वात्, इमे श्लोका भगवत्पादानामेवेति मन्यते स तन्निबन्धकृत् इत्युन्नीयते । भामत्यां तु ' ब्रह्मविदां गाथाम् उदाहरति ' इति लिखितं दृष्ट्वा वाचस्पतिमिश्रमते पूर्वाचार्याणामेव केषाञ्चिदिमे श्लोका इति गम्यते । आचार्यसुन्दरपाण्ड्यस्य श्लोका इमे इति तु सूतसंहिताव्याख्याता(सू.सं. ४-४-१३, पा. २७९) । तत्तु सुविमृश्य श्रद्धेयम् ; यत्कारणं शैवपुराणेभ्यः शैवनिबन्धेभ्यो वा प्रमाणवाक्यानि कुत्रचिदपि प्रस्थानत्रयभाष्ये समुद्धृतानि नोपलभामहे । यो वा को वा भवत्वयं पूर्वाचार्यः श्लोकत्रयस्य निर्माता ; भगवता भाष्यकारेण त्विमे संप्रदायविदां वचनत्वेनोदाहृता इत्यत्र तु नास्ति विप्रतिपत्तिरित्यास्तां तावदशक्यनिर्धारणवक्तृविशेषगवेषणचिन्तायासः । श्लोकाभिप्रायमेव तु यथाशक्ति विवरीतुं प्रयतामहे ॥

१२७. **गौणमिथ्यात्मनोऽसत्त्वे** – इत्यादिश्लोकस्यायमर्थः। पुत्रदेहादिबाधनाद् गौणमिथ्यात्मनोऽसत्त्वे – इत्यादियोजना। कथं तु पुत्रदेहादीनां आत्मत्वं कथं च तेषां बाध इति ? उच्यते। कर्मनिमित्तं हि पितापुत्र-पतिपत्नी-बन्धुमित्रादिसंबन्धः। तद्यथा जनयितृत्वात् पितृत्वं पुत्रं प्रति ; एवं पतिपत्न्यादिष्वपि कर्मनिमित्तः संबन्धो वेदितव्यः। तदेवं जागरितेऽनुवृत्ते कर्मनिमित्ते संबन्धे, पुत्रादिषु स्नेहनिमित्ता 'अहमेव सः, तत्तद्धर्मा वा' इति तेषु अहंबुद्धिः, आत्मनः तत्तद्धर्मवत्त्वबुद्धिश्च तदा तदोदेति सत्यपि पुत्रादीनां स्वतोऽन्यत्वज्ञाने। तस्मात्, ते गौणात्मानः। सोऽयं गौणात्मतद्धर्माध्यासः पूर्वमेवाध्यासभाष्ये समुदाहृतः। "तद्यथा पुत्रभार्यादिषु विकलेषु सकलेषु वा 'अहमेव विकलः सकलो वा' इति, बाह्यधर्मानात्मन्यध्यस्यति" (सु.) इति। एतेषां च पुत्रादीनां पुत्रादित्वं सुषुप्ताद्यवस्थास्वदर्शनवृत्तिषु कामकर्मलक्षणनिमित्ताभावान्निवर्तत इति ज्ञानात् बाध्यते। श्रूयते हि 'अत्र पिताऽपिता भवति माताऽमाता लोका अलोकाः देवा अदेवा वेदा अवेदाः' (बृ. ४-३-२२) इत्यादि। एवं देहादिषु देहप्राणमनोबुद्ध्यहङ्कारेषु आत्मनोऽविविक्तप्रत्ययविषयत्वेनाभिज्ञायमानेषु 'अहम्' इति निरुपचरितः प्रत्ययो जायते इत्यतस्ते मिथ्यात्मानः। भ्रान्तिनिमित्तमेव हि तेष्वात्मत्वाभिमान इति। यथा चेदं तथा युक्त्यनुभवानुसारेण समुपपादितम् अशरीरत्वविमर्शनभाष्ये। वितत्य दर्शितश्चायं मिथ्याध्यासोऽप्यध्यासभाष्ये – "तथा देहधर्मान् (आत्मन्यध्यस्यति) 'स्थूलोऽहम्', 'कृशोऽहम्', 'गौरोऽहम्', 'तिष्ठामि', 'गच्छामि', 'लङ्घयामि च' इति। तथा इन्द्रियधर्मान्

'मूकः', 'काणः', 'क्लीबः', 'बधिरः' 'अन्धोऽहम्' इति। तथाअन्तःकरण-धर्मान् कामसङ्कल्पविचिकित्साऽध्यवसायादीन्" (सु.खं. ७, पा. ८०) इत्यादिना। एतेषां देहादीनामात्मत्वबाधः सशरीरत्वस्य मिथ्याभिमान-निमित्तत्वदर्शनेन, सुषुप्तादिषु स्वरूपव्यभिचारदर्शनविमर्शनेन च,भवति। तदेवं पुत्रदेहादिबाधनाद् गौणमिथ्यात्मनोऽसत्त्वे सिद्धे 'सद्ब्रह्मात्माहम्, एकमेवाद्वितीयं ब्रह्मात्माहमस्मि' इति बोधो जायते। जातायां चाद्वितीयब्रह्मात्मावगतौ हेयोपादेयाभावे क्रियाकारकफलाभावे च सुनिश्चिते सति – सत्येव हि देहादौ मिथ्यात्मनि स्वात्मार्थम् आत्मीयपुत्राद्यर्थं च कार्यं किञ्चिद् सम्भवति । तदभावे तु – कार्यं कथं भवेत्? एतादृशनिष्क्रियाद्वैतात्मभावे स्थितस्य कथमपि किञ्चिदपि कार्यं नावशिष्यते – इत्यभिप्रायः ॥

अत्रैके तु व्याचक्षते – 'पुत्रदारादिष्वात्माभिमानो गौणः। यथा स्वदुःखेन दुःखी यथा स्वसुखेन सुखी, तथा पुत्रादिगतेनापीति सोऽयं गुणः, न त्वेकत्वाभिमानः; भेदस्यानुभवसिद्धत्वात्। तस्मात्, 'गौर्वाहीकः' इतिवद्गौणः। देहेन्द्रियादिषु त्वभेदानुभवान्न गौण आत्माभिमानः, किं तु शुक्तौ रजतज्ञानवन्मिथ्या। तदेवं द्विविधोऽय-मात्माभिमानो लोकयात्रां वहति। तदसत्त्वे तु न लोकयात्रा, नापि ब्रह्मात्मैकत्वानुभवः। तदुपायस्य श्रवणमननादेरभावात्। तदिदमाह– पुत्रदेहादिबाधनात्। गौणात्मनोऽसत्त्वे पुत्रकलत्रादिबाधनम्, मम-काराभावः – इति यावत्। मिथ्यात्मनोऽसत्त्वे देहेन्द्रियादिबाधनम्, श्रवणादिबाधनं च। ततश्च न केवलं लोकयात्रासमुच्छेदः, 'सद्ब्रह्माहम्'

इत्येवं बोधशीलं यत्कार्यम्, अद्वैतसाक्षात्कार इति यावत्। तदपि कथं भवेत्? '(वा.भा.पा. १५४) इति। 'एवंबोधि कार्यम्' इति तेषामभिमतः पाठः।अत्रास्माकं त्वेवं प्रतिभाति। 'गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादीनां बाधनात् बोधलक्षणं कार्यं न भवेत्' इति प्रतिपादयितुं श्लोको न प्रवृत्तः —इति। न हि गौणमिथ्यात्मभ्यामेव लोकनिर्वहणम्, श्रवणादिसाधनं च निष्पद्यते यतः, अतस्ताभ्यामवश्यं रक्षिताभ्यां भाव्यम्—इत्यनिष्टोऽर्थः सांप्रदायिकाचार्यस्य विवक्षितो भवेत्। यदि पुनः कर्तव्यबुद्धेरात्मात्मीय-बुद्धिनिबन्धनत्वात् तदभावे अद्वितीयात्मबोध एवावशिष्यते; ततश्च योऽवगतब्रह्मात्मभावः, तस्य कथमपि किञ्चिदपि कार्यं न भवतीति कृतकृत्य एव सः—इत्यर्थकत्वेन श्लोकोऽङ्गीक्रियते, तदा प्रकृताधिकरण-द्वितीयवर्णकपूर्वपक्षनिरासः, 'अहं ब्रह्मासीत्येतदवसाना एव सर्वे विधयः' इति भाष्यार्थदृढीकारश्च भवतीति स एव श्लोकाभिप्राय इत्यवगम्यते। अतः 'एवंबोधि कार्यम्' इत्यपपाठो नादरणीयः, 'सद्ब्रह्माहम्' इत्येवं बोधे जाते न कथञ्चिदपि कार्यं भवेदित्येव सम्यग्व्याख्यानं श्लोकस्येति मन्तव्यम्॥

१२८. **'अन्वेष्टव्याऽऽत्मविज्ञानात्' इत्यादिश्लोकस्याभिप्रायः** — अथैवं गौणमिथ्यात्मनोः सर्वथाप्यसत्त्वे कथं 'सद्ब्रह्माहम्' इति बोधः? यावता बोद्धारं प्रमातृत्वयुक्तमन्तरेण वेदान्तानां प्रमाणत्वमेव तावन्न सङ्गच्छत इति दूरे संकथा वेदान्तप्रमाणजन्य-ब्रह्मात्मबोधस्य — इति शङ्कायां तत्परिहारत्वेन **द्वितीयः श्लोकः 'अन्वेष्टव्यात्मविज्ञानात् प्राक्'** इति। अत्रेयं श्रुतिः परामृष्टा

श्लोकेन ' य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच ' (छां. ८–७–१) इति । अत्र प्रजापतिवाक्ये अपहतपाप्मत्वादिधर्मकः परमात्मा अन्वेष्टव्यो विजिज्ञासितव्यश्चेत्युपदेशोऽस्ति । तत्रान्य एव परमात्मा य अन्वेष्टव्योऽपहतपाप्मत्वादिधर्मा, अन्य एव तु तस्यान्वेष्टा जीवो जरामृत्य्वाद्याक्रान्तः – इत्येवार्थः कल्पयितुं युक्त इति प्रतिभाति ; एकस्मिन्नेवात्मनि अन्वेष्टव्यत्वान्वेष्टृत्वयोः सहावस्थितेरनुपपत्तेः । तस्मात्, अन्वेष्टुर्जीवस्यास्त्येव कार्यान्तरं ब्रह्मोपासनालक्षणं यदनुष्ठानादेव तस्य ब्रह्मात्मभावरूपो मोक्षः सिध्येत् इति यदाहुर्ध्याननियोगवादिनः, तदेव युक्तियुक्तं भाति । यदा पुनरद्वैतात्मबोधे सति तावन्मात्रेण कार्यान्तरं नावशिष्यते, तस्मिन् पक्षे योद्धृत्वमेव नास्त्यन्वेष्टुरित्यापद्येत । ततश्चान्वेषणाया एव शास्त्रविहिताया नात्मलाभः स्यात्, अन्वेष्टुरभावेऽन्वेषणायास्तदाश्रितायाः प्राणधारणानुपपत्तेः । किञ्च, 'अन्वेष्टव्यः' इति यः श्रूयते अपहतपाप्मत्वादिधर्मकः परमात्मा, स एव स्वातन्त्र्येणापि शास्त्रप्रमाणादेव प्रमीयते, तावतैवाद्वितीयात्मभावलक्षणो मोक्षः सेत्स्यतीति ब्रुवती विरुद्धव्यवहारा श्रुतिरित्यप्यापद्येत भवत्पक्षे । तत्कथमिदं सङ्गमनीयम् इति चेत् –

नायं दोषः ; गौणात्ममिथ्यात्मधियोरिव प्रमातृत्वधिया अप्याविद्यकत्वात् । न हि एकस्यैव युगपदन्वेष्टव्यत्वम् अन्वेष्टृत्वं च ब्रूते श्रुतिरित्यभ्युपगच्छामो येनेत्थमभियोगः शोभेत, किं तर्हि,

प्रागेवान्वेष्टव्यात्मविज्ञानात् प्रमातृत्वं तस्येति । अयमभिप्रायः । यथैव गौणात्मनः प्रागेव बोधादात्मत्वमभिमन्यते अविद्यया, बोधादूर्ध्वं तु नैव स आत्मा भवति यथा, तथैव मिथ्यात्मनोऽप्यन्वेष्टव्यात्मविज्ञानात् प्रागेव प्रमातृत्वं जीवात्मनः, अन्वेष्टव्यत्वं च परमात्मनो विभाव्यते । तावदेव चान्वेषणा कार्यत्वेनानुवर्तते । अन्विष्टस्तु स एव प्रमाता पाप्मदोषादिवर्जितः परमात्मा स्यात् । अन्वेषणापरिसमाप्तेरूर्ध्वं तु अविद्याया अपगतत्वात्, नैव प्रमातृप्रमेयविभागः, नैव चान्वेष्ट्रन्वेष्टव्यात्मविभागो वा अवशिष्यते; स्वप्नगतग्राह्यग्राहकविभागस्येव प्रबोधे सर्वस्याप्यविद्याकृतविभागस्य समूलं बाधितत्वात् । यावद्धि मघवान् सशरीरत्वाभिमानदोषान्न विजज्ञौ पाप्मदोषादिवर्जितात्मानम् 'अयमहमस्मि' इति, तावत् तदेवात्मतत्त्वं भूयो भूयः 'एतदमृतमभयमेतद् ब्रह्म' इति साक्षान्निर्दिष्टमप्यवस्थात्रयदोषकलुषकलङ्कितमेव मेने; यदा पुनः शरीराद्यभिमानाद् व्युत्थापितः, तदा शरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स प्रागपि तथारूप एव सन् । एवं सर्वस्यापि प्रमातृत्वं कार्यकरणसङ्घाताभिमानकृतं मिथ्यैव सदपि प्रागात्मान्वेषणकार्यविज्ञाननिष्पत्तेः सत्यवदाभाति । अतः शास्त्रजन्यविज्ञानात् प्रागविद्याकल्पितः प्रमाता अनुवर्तत एवेति अविद्याबाधकबोधापेक्षया सम्यगेवोक्तं 'बोधे कार्यं कथं भवेत्?' इति – इत्यभिप्रायः ॥

अत्र साक्षात्कारवादिनस्तु " 'सद्ब्रह्मात्माहमित्येवंबोधि कार्यं कथं भवेत्?' इति स्वोत्प्रेक्षितपाठतद्व्याख्यानानुगुण्येन 'साक्षात्कारलक्षणं

कार्यं कथमपि न भवेदित्युक्तम् ; कुतस्तदसंभव इत्यत आह – '**अन्वेष्टव्यात्मविज्ञानात् प्राक्प्रमातृत्वमात्मनः**' । उपलक्षणं चैतत् । प्रमातृप्रमेयप्रमाणविभागः– इत्यपि द्रष्टव्यम् । एतदुक्तं भवति – एष हि विभागोऽद्वैतसाक्षात्कारकारणम् , ततो नियमेन प्राग्भावात् ; तेन तदभावे कार्यं नोत्पद्यत इति । न च प्रमातुरात्मनोऽन्वेष्टव्य आत्मा अन्य इत्याह – '**अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्जितः**' उक्तं ग्रीवास्थग्रैवेयकनिदर्शनम् " (त्रा.भा. पा. १५५) इति । तदेतत् तदीयपूर्वश्लोकव्याख्यानविमर्शनेनैव विमृष्टप्रायमिति न पृथग्वक्तव्यमवशिष्यते । अस्मद्व्याख्यानरीत्या तु '(प्रमात्रभावे) अप्रमातृकाणि प्रमाणानि न भवितुमर्हन्ति' – इति भाष्यवाक्यार्थसंवादी श्लोको भवतीति तदुदाहरणमात्रसामञ्जस्येन सङ्गच्छत इति ध्येयम् ॥

## १२९. '**देहात्मप्रत्ययो यद्वत्**' इतिश्लोकस्यार्थः –

**अथ तृतीयश्लोकस्याभिप्रायो वर्ण्यते** । जिज्ञास्यब्रह्मणः प्रमेयत्वं जिज्ञासोः प्रमातृत्वेन साकमेव ब्रह्मात्मावगतेरूर्ध्वं बाधितं भवतीत्युक्तम् । तर्हि, कथङ्कारं वेदान्तानां प्रमाणत्वं ब्रह्मणि ? न हि तेषामपि निवृत्तिरिष्टा, नित्यत्वाद्वेदानाम् इत्याशङ्कयाह '**देहात्मप्रत्ययो यद्वत्**' इत्यादिना ॥

अयमभिप्रायः– देहात्मप्रत्ययं प्रमाणत्वेन प्रकल्प्यैव हि गौणात्मनि पुत्रादौ आत्मात्मीयभावं प्रत्येति । बाधिते तु देहात्मप्रत्यये शास्त्रजनितदेहादिव्यतिरिक्तात्मबुद्ध्या नान्तरीयकतया गौणात्मबुद्धिरपि बाध्यत इति सर्वसंप्रतिपन्नमेतत् । तदेवं यथा प्राकृतैर्जनैः पुत्रादिष्वात्मीय-

बुद्ध्याविष्टैः शास्त्रजनितव्यतिरिक्तात्मप्रत्ययजनेः प्राक् मिथ्यैव सन्नपि प्रमाणत्वेन कल्पितः देहात्मप्रत्ययः एवं लौकिकमपि प्रत्यक्षादिप्रमाणं मिथ्यैव सदपि प्रमाणत्वेन कल्पितम्। इह शास्त्रकारकल्पितः प्रमाणप्रमेयव्यवहारः सर्वोऽपि लौकिकत्वेनैवाभिप्रेतः। अविद्यापुरःसरत्वाविशेषात्। उपलक्षणमेतत् शास्त्रीयप्रमाणप्रमेयव्यवहारस्यापि। उक्तं ह्यध्यासभाष्ये 'प्राक्च तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रम् अविद्यावद्विषयत्वं नातिवर्तते' (सु.खं. ६, पा.७१) इति। एवं वेदान्तशास्त्रकल्पितप्रमाणप्रमेयव्यवहारोऽपि। तदप्युक्तमध्यासभाष्ये '**तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि**' (सु. खं. ५, पा. ५१) इति। यत्तु शङ्क्यते 'कथं नित्यस्यापि वेदस्य बाधः?' इति। नैष दोषः; नित्यस्यापि सतो वेदस्याविद्याप्रत्युपस्थापितत्वेन मिथ्यात्वे सति बाध्यत्वोपपत्तेः। इयांस्तु विशेषः-लौकिकैः प्रत्यक्षादिप्रमाणानि स्वात्मनः प्रमातृत्ववत् सत्यत्वेनैव प्रकल्पितानि परमार्थाद्वैतात्मतत्त्वनिश्चयाभावात्। वेदेन तूपदेशोपायत्वेनाध्यारोपदृष्ट्या प्रमाणत्वेन कल्प्यते, तत्त्वप्रबोधनानन्तरं तु वेदानां वेदत्वमप्यपोद्यत एव। तथा ह्युदर्के वक्ष्यति भगवान् भाष्यकारः- 'प्रत्यक्षाद्यभावे श्रुतेरप्यभावप्रसङ्गः - इति चेत्; न, इष्टत्वात्। 'अत्र पिताऽपिता भवति' (बृ.४-३-२२) इत्युपक्रम्य 'वेदा अवेदाः' (बृ. ४-३-२२) इतिवचनादिष्यत एवास्माभिः श्रुतेरप्यभावः प्रबोधे' (४-१-३, पा. ४६५) इति। तदिदं सर्वमनुसंधायेहापि

यावदात्मनिश्चयमित्युच्यते ' प्रमाणं त्वाऽऽत्मनिश्चयात् ' इति । अतः सर्वमनवद्यम् ॥

१३०. तृतीयश्लोकाभिप्रायवर्णनं व्याख्यानप्रस्थानीयरीत्या — व्याख्यानप्रस्थानावलम्बिनस्तु श्लोकार्थमन्यथा अन्यथा वर्णयन्ति । कथम् ? (१) आत्मसाक्षात्कारवादिनां व्याख्यानं तावदित्थम् — " अप्रमाणात् कथं पारमार्थिकाद्वैतविद्योत्पत्तिरिति । अत आह — ' देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः । लौकिकं तद्वदेवेदं प्रमाणं तु... ॥ ' तस्यावधिमाह—'आऽऽत्मनिश्चयात्'। आ ब्रह्मस्वरूपसाक्षात्कारात् इत्यर्थः । एतदुक्तं भवति—पारमार्थिकप्रपञ्चवादिभिरपि देहादिष्वात्माभिमानो मिथ्येति वक्तव्यम् , प्रमाणबाधितत्वात् । तस्य च समस्तप्रमाणकारणत्वं भाविकलोकयात्रावाहित्वं चाभ्युपेयम् । सेयमवस्थाऽस्माकमपि आत्मसाक्षात्कारे त्रिधा भविष्यति । न चायमद्वैतसाक्षात्कारोऽप्यन्तःकरणवृत्तिभेद एकान्ततः परमार्थः । यस्तु साक्षात्कारो भाविकः, नासौ कार्यः; तस्य ब्रह्मस्वरूपत्वात् । अविद्या तु यद्यविद्यानिवर्तिका ज्ञानयोः । न तत्र काचिदनुपपत्तिः । तथा च श्रुतिः ' विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते '(ई.) इति । तस्मात , सर्वमवदातम्" (वा.भा.पा.१५५) इति ॥

तदेतत् प्रकृतानुपयुक्तं भाष्यबहिर्भूतं च व्याख्यानमिति मन्महे वयम् । न हि तत्रत्यसूत्रे क्वचिदपि भाष्यकारेण साक्षात्कारविचारः प्रवर्तितः, येनेत्थं श्लोकत्रयं साक्षात्कारकारणोपपादनपरत्वेनोदाह्रियेत सञ्ज्ञानार्थम् । न च क्वचित् सूत्रभाष्ये भाष्यान्तरे वा वाक्यात् परोक्षज्ञाने

जाते तदनन्तरं साक्षात्कारार्थं यत्नः करणीयः स्यात् – इति वादः समाहृतो येनेत्थमपि भाष्याक्षरानुगुणं व्याख्यानमित्यवगच्छेम। वेदान्तवाक्यादेव ब्रह्मात्मावगतिरिति तु पदेपदे लिखितं तत्रोपलभ्यते, तदनन्तरं कार्यान्तरं नावशिष्यत इति च। अतो भाष्यबहिर्भूतम्, अप्रकृतप्रक्रिया चेत्थं व्याख्यानमित्यवगम्यते ॥

अन्ये तु (२) यथा देहात्मत्वप्रत्ययः कल्पितो भ्रमोऽपि व्यवहाराङ्गतया मानत्वेनेष्यते वैदिकैः, तद्वल्लौकिकमध्यक्षादिकमात्मबोधावधि व्यवहारकाले बाधाभावात् (तस्य ?) व्यावहारिकं प्रामाण्यमिष्यताम्, वेदान्तानां तु कालत्रयाबाध्यबोधित्वात् तत्त्वावेदकं प्रामाण्यम्–इति तुशब्दार्थः" इति व्याचक्षते। एतदप्ययुक्तमिति वयं प्रतीमः। न हीहाध्यक्षादिलौकिकप्रमाणापेक्षया वेदान्तानां प्रामाण्यातिशयः प्रतिपिपादयिषितः, किं तु प्रमाणव्यवहारमात्रस्यैवात्मनिश्चयावधिकत्वं विवक्ष्यत इति ॥

अपरे पुनः (३) 'तत्त्वसाक्षात्कारपर्यन्तं व्यवहाराङ्गत्वाद् व्यवहारे बाधाभावाच्च, अध्यक्षाद्यतत्त्ववेदकमपि व्यावहारिकं मानम्, श्रुतेस्तु वर्णदैर्घ्यादिवदात्मधीहेतोः तात्त्विक्येव मानता' इति व्याचक्षते। एतदप्यप्रकृतप्रक्रियैव। अध्यक्षादीनां श्रुतेर्वा कथं मानता ? – इति विचारस्यात्राप्रकृतत्वात् – इति मन्तव्यम् ॥

१३१. **पूर्वाचार्योक्तेर्निर्गलितार्थः** – अलमप्रकृतार्थविमर्शनायासेन, यथोदाहृतश्लोकत्रयस्य निर्मथितार्थसार एवात्र संगृह्यते। 'सदेकमेवाद्वितीयं ब्रह्माहम्' इति वेदान्तार्थे विज्ञाते सति,

'अहमिदम्, ममेदम्' इतिलक्षणस्य सर्वस्यापि स्वाभाविकव्यवहारस्य बाधनात् कर्तृत्वभोक्तृत्वयोरभावे न पुनः कर्तव्यमवशिष्यते किञ्चिदपि इति प्रथमश्लोकार्थः। कर्तृत्ववत् प्रमातृत्वस्यापि बाधितत्वाज्जिज्ञासा-परिसमाप्तेः, अवगतब्रह्मात्मतत्त्वस्य न विज्ञातव्यं किञ्चिदप्यवशिष्यते इति द्वितीयश्लोकार्थः। यथोक्तनीत्या प्रमात्रभावे प्रमेयाभावे च सति प्रमाणानां सर्वेषामपि सह वेदान्तप्रमाणेनाभाव एव फलतीत्यतो ब्रह्मात्मावगती सत्यां सर्वव्यवहाराभाव एव–इति तृतीयश्लोकार्थः॥

तदेवं वेदान्तविज्ञानसुनिश्चितार्थानां दृष्ट्या अविद्यापुरःसराणां सर्वेषां प्रमाणानां प्रमाणत्वस्य सर्वेषामपि शास्त्राणां शास्त्रत्वस्य चात्यन्तमेव बाधः, स्वरूपभूताद्वैतात्मन्यवस्थानं च – इति यदुपन्यस्त-मध्यासभाष्ये, उपसंहृतं च समन्वयाधिकरणभाष्ये तत्सर्वं यथोदाहृत-श्लोकत्रयेणैव पिण्डीकृत्य संगृहीतमिति सर्वं शिवम्॥

इति समन्वयाधिकरणभाष्यार्थतत्त्वविवेचन्यां द्वितीयवर्णकविवेचनम्॥

---

# अथ समन्वयाधिकरणे परिशिष्टचिन्ता

—: ∽ :—

## १. अधिकरणभाष्यार्थसारः

१३२. अधिकरणे विचारविषयः – शास्त्रयोनित्वाधिकरणे द्वितीयवर्णके यदुक्तं शास्त्रप्रमाणकत्वं ब्रह्मणः, तस्यानेनैवाधिकरणेन संबन्धात्, भाष्ये प्रथमवर्णकस्यैव समनन्तरपूर्वाधिकरणेन साक्षात्संबन्धाभिधानाच्च, अधिकरणविषयविचारो यथावर्णकं पृथक्पृथगेव कर्तव्यतया प्राप्तः । द्वितीयवर्णके प्रतिज्ञातस्य च ब्रह्मणः शास्त्रप्रमाणकत्वस्यास्मिन्नेवाधिकरणे स्थापयितव्यत्वात् प्रकृताधिकरणविचारेणैव तस्यापि वर्णकार्थस्य विचारितप्रायत्वं भवति । तत्र शास्त्रयोनित्वाधिकरणे यत् प्रतिज्ञातम् – 'शास्त्रादेव प्रमाणाज्जगज्जन्मादिकारणं ब्रह्माधिगम्यत' इति, तदिहाक्षिप्य समाधीयत इत्यधिकरणयोः सङ्गतिर्बोध्या ॥

१३३. विषयवाक्यानि, तद्विषये संशयश्च – 'सदेव सोम्येदमग्र आसीत्' (छां. ६-२-१), 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ. १-१-१), 'तदेतद्ब्रह्मापूर्वमनपरम्' (बृ. २-५-१९) इत्यादीनि वेदान्तवाक्यानि **विषयः** । तत्र **संशयः**, किमेतादृशानि वाक्यानि ब्रह्मस्वरूपे प्रमाणं, न वा ? – इति । लोके

भूतवस्तुबोधकवाक्यानां प्रमाणान्तरगोचरविषयानुवादकत्वदर्शनात्, भूतवस्तुप्रतिपादने प्रयोजनाभावाच्च, न तानि ब्रह्मणि प्रमाणम् इति भाति ; स्वाध्यायाध्ययनविधिपरिप्राप्तत्वात् तेषां प्रामाण्यं युक्तं प्रतिपत्तुम् इत्यपि भाति । अतः संशयः ॥

११४. पूर्वः पक्षः – उक्तहेतोरेव न भूतवस्तुनि वेदान्तवाक्यानां प्रामाण्यम् ; अथवा क्रियाविध्यपेक्षितकर्तृदेवतादिस्वरूपप्रकाशनेन स्ववाक्यगतोपासनादिविधिपरत्वेन वा वेदान्तशास्त्रस्य प्रामाण्यं वक्तव्यम् । अत एवार्थवादानां विध्यर्थस्तावकत्वेन, मन्त्राणां च क्रियातत्साधनाभिधायित्वेन प्रामाण्यमुपपादितं पूर्वतन्त्रे । न च विधिसंस्पर्शमन्तरेण वेदवाक्यानाम् अर्थवत्ता दृष्टा उपपन्ना वा । न च वस्तुस्वरूपे विधिः सम्भवति । तस्मात्, न ब्रह्म शास्त्रप्रमाणकम् – इति प्राप्नोति ॥

११५. सिद्धान्तः – जगज्जन्मादिकारणं ब्रह्म सर्वज्ञं सर्वशक्तिसमन्वितं च वेदान्तशास्त्रप्रमाणकम् । सर्वेष्वपि वेदान्तेषु वाक्यानाम् एतस्यैवार्थस्य प्रतिपादकत्वेन समन्वयात्, तद्गतानां पदानां च ब्रह्मस्वरूपविषये निश्चितस्य समन्वयस्यावगम्यमानत्वाद् वाक्यानामन्यार्थकल्पनाया अन्याय्यत्वाच्च ॥

(१) न हि तेषां विधिपरत्वं कल्पयितुं युक्तम्, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् । (२) नापि कर्तृपरत्वं शक्याध्यवसानम्, 'तत्केन कं पश्येत्' (बृ. ४–५–१५) इत्यादिक्रियाकारकफल-

निराकरणश्रुतिविरोधात् । (३) न च भूतवस्तुस्वरूपत्वेऽपि ब्रह्मणः प्रमाणान्तरविषयत्वम्, तत्त्वमसीत्यादिवाक्यावगतब्रह्मात्मवस्तुनोऽद्वितीयत्वेन प्रमाणान्तराविषयत्वात् । (४) न च हेयोपादेयशून्यभूतवस्तुप्रतिपादने प्रयोजनाभाव इति शङ्क्यम् ; हेयोपादेयशून्यब्रह्मात्मत्वावगमादेव सर्वक्लेशप्रहाणात् पुरुषार्थसिद्धेः । (५) न च देवतादिस्वरूपप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानाम् ; उपासनादिक्रियाविधिवाक्येषु देवतादिप्रतिपादनस्य क्रियार्थत्वेऽपि क्रियाकारकफलभेदरहिताद्वितीयब्रह्मणस्तथा क्रियाविधिशेषत्वासम्भवाद् ब्रह्मवाक्यानां क्रियाविध्यर्थत्वानुपपत्तेः । (६) यद्यपि कर्मकाण्डे विधिसंस्पर्शं विना वेदवाक्यानां प्रमाणत्वं न दृष्टम्, तथापि ब्रह्मात्मैक्यविज्ञानस्य परमपुरुषार्थलक्षणफलपर्यन्तत्वान्न तत्प्रतिपादकवाक्यानां प्रामाण्यमनुपपन्नमिति शक्यशङ्कम् । न हि वेदान्तानां प्रामाण्यं शास्त्रत्वसामान्येनानुमीयते, किं तु दृष्टफलत्वात् प्रामाण्यमङ्गीक्रियत इति ॥

तस्मात्, सिद्धं ब्रह्मणो वेदान्तशास्त्रप्रमाणकत्वमिति ॥

इति प्रथमवर्णकानुसारी अधिकरणभाष्यवाक्यसारः ॥

## २. अथ द्वितीयवर्णकरीत्या अधिकरणसारः

१३६. **ग्रन्थसंबन्धः** – वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रामाण्यादृष्टेः, ब्रह्मणश्च भूतवस्तुत्वात् तत्प्रतिपादने प्रमाणान्तरगोचरानुवादेन हेयोपादेयरहितत्वेन च तत्प्रतिपादनस्यानर्थक्यप्रसङ्गाच्च

न शास्त्रप्रमाणकत्वं ब्रह्मणः – इति वदतां भाट्टानां पूर्वपक्षः पराकृतः प्रथमवर्णके। अथ द्वितीयवर्णके ब्रह्मणः शास्त्रप्रमाणकत्वमङ्गीकृत्यापि कार्यविधिशेषत्वेनैव ब्रह्मणः शास्त्रयोनित्वं न स्वातन्त्र्येण– इति प्रवदतां **प्राचीनवृत्तिकाराणां** पूर्वपक्षो निराकरिष्यते ॥

१३७. **विषयवाक्यानि**–तत्र वेदान्तवाक्यानि ब्रह्मविषयाणि द्विप्रकाराणि दृश्यन्ते। विधिरूपलिङादिक्रियापदघटितानि, ब्रह्मस्वरूपमात्रवर्णनपराणि च। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ. ४–५–६), 'आत्मेत्येवोपासीत' (बृ. १–४–७), 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' (छां. ३–१४–१) इत्यादीनि विधिविभक्तिघटितानि क्रियाशब्दसंयुतानि ; 'विज्ञानमानन्दं ब्रह्म' (बृ. ३–९–२, २८–७), 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २–१), 'स एष नेतिनेत्यात्मा' (बृ. ३–९–२६) – इत्यादीनि विधिशब्दरहितानि ब्रह्मस्वरूपमात्रबोधकानि चेति। तानीमानीह विचारविषयः ॥

१३८. **तत्र संशयः** – किमेतयोर्द्विप्रकारयोर्मध्ये ब्रह्मस्वरूपबोधकान्येव वाक्यानि स्वप्रधानानि, विधिवाक्यानि तु कथञ्चित् स्वरूपबोधकवाक्यानुसारेण व्याख्येयानि, ब्रह्मस्वरूपसमर्पकवाक्यार्थश्रवणजन्यमेव च ज्ञानं पुरुषार्थदायकम् ; किं वा विधिवाक्यान्येव स्वप्रधानानि, तथा च विहितज्ञानानुष्ठानेनैव पुरुषार्थो लभ्यः ; स्वरूपसमर्पकवाक्यानि तूपासनाविध्यपेक्षितोपास्यस्वरूपसमर्पणेनैवोपक्षीणानि ? – इति ॥

१३९. पूर्वः पक्षः – तत्र प्राचीनवृत्तिकारा वेदान्ताचार्या मन्यन्ते – उपासनालक्षणकार्यविधिपरमेव सर्वं वेदान्तशास्त्रम्, प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य । किं तदुपास्यम् ? – इत्याकाङ्क्षायाम्, उपास्यस्वरूपसमर्पणेनैव ब्रह्मस्वरूपबोधका वेदान्ता उपयुक्ताः ; तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षो भविष्यति । कर्तव्यविध्यननुप्रवेशे वस्तुमात्रकथने तु हानोपादानासम्भवाद् वेदान्तवाक्यानामानर्थक्यमेव स्यात् । न च वस्तुमात्रकथनेऽपि संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्याद् वाक्यानामिति युक्तम् ; श्रवणमात्रेण संसारित्वभ्रान्तिनिवृत्त्यदर्शनात्, श्रवणोत्तरयोरपि मनननिदिध्यासनयोर्विधिदर्शनाच्च । वस्तुतस्तु प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण केवलवस्तुवादी वेदभागो नास्त्येव । तस्मात्, उपनिषत्सु ब्रह्मोपासनाविधिवाक्यानामेव स्वप्रधानत्वम् ; तच्छेषतयैव विनियोगो ब्रह्मवस्तुबोधकवाक्यानाम् । एवं च यथा स्वर्गादिकामोऽग्निहोत्रादिसाधने नियुज्यते, एवम् अमृतत्वकामो ब्रह्मज्ञानानुष्ठाने नियुज्यत इत्येव युक्तमिति ॥

१४०. सिद्धान्तः – ब्रह्मस्वरूपप्रतिपादनपरमेव वेदान्तशास्त्रम्, न कार्यविधिशेषत्वेनोपास्यब्रह्मस्वरूपसमर्पणमात्रपर्यवसितम् । ब्रह्मवस्तुप्रतिपादकत्वेनैव समन्वयाद् वाक्यानां सर्वेष्वपि वेदान्तेषु । वस्तुप्रतिपादनेनापि हि सप्रयोजनत्वे शास्त्रस्य शास्त्रत्वं न हीयते । न च वेदान्तानां ब्रह्मात्मवस्तुप्रतिपादकानां नास्ति प्रयोजनम्, 'रज्जुरियं नायं सर्पः' इतिवद् ब्रह्मवस्तुमात्रकथनेनापि संसारित्वनिवर्तनेन सप्रयोजनत्वोपपत्तेः । अतो यथा भूतवस्तूनां विधिकाण्डे

अज्ञातार्थज्ञापकत्वेनोपदिष्टानां नानर्थक्यम्, एवम् अनवगतब्रह्मात्मवस्तूपदेशस्यापि मिथ्याज्ञाननिवर्तनेन सप्रयोजनत्वान्नात्रानर्थक्यशङ्कावसरः। अक्रियाया अक्रियासाधनभूतायाश्च सत्याः, 'ब्राह्मणो न हन्तव्यः' इत्यादिरूपाया निवृत्त्युपदेशो यथा नानर्थक इतीष्यते, तथा इहापि ब्रह्मात्मकक्रिया-तत्साधनत्वान्यतराभावेऽपि तदुपदेशो नानर्थक इत्यनवद्यम्। न च श्रवणमात्रेण संसारित्वभ्रान्तिर्न निवर्तेत इति दृष्टान्तवैषम्यं शङ्क्यम्; निपुणमतीनां श्रोतृणां तावतैवावगतब्रह्मात्मतत्त्वानां संसारित्वबुद्धिनिवृत्त्युपपत्तेः। न च श्रवणोपदेशोत्तरयोर्मनननिदिध्यासनोपदेशयोर्वैयर्थ्यम्, तयोरपि श्रवणोपदेशस्येवावगत्यर्थत्वात्। केवलवस्तुबोधको वेदभागो नास्त्येवेति तु साहसमात्रम्; औपनिषदपुरुषस्य सर्वसाक्षिणोऽनन्य-शेषत्वात्। स्वात्मभूतस्य सर्वसाक्षिभूतात्मनोऽप्रत्याख्येयत्वाच्च। उत्पाद्यादिचतुर्विधद्रव्यविलक्षणत्वात्, अविषयत्वात्, कूटस्थनित्यत्वात्, आत्मरूपेण नित्यसिद्धत्वाच्च ब्रह्मणः, तत्स्वभावस्य मोक्षस्य वा न कथञ्चिदपि क्रियाविधिशेषत्वं शक्यं कल्पयितुम्। न च ब्रह्मात्मैकत्व-ज्ञानं संपदादिरूपम्, येन विधिशेषत्वं कल्प्येतापि ब्रह्मणः। नापि तद् ध्यानवत् क्रिया, प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद् वस्तुतन्त्रत्वात्। 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि विधिच्छायानि वचनानि तु न ज्ञानविध्यर्थानि, पुरुषतन्त्रत्वाभावाच्चोदनातन्त्रत्वाभावाच्च ब्रह्मात्मज्ञानस्य; किं तर्हि, स्वाभाविककार्यकरणसङ्घातप्रवृत्तिगोचराद् विमुखीकृत्य मुमुक्षून् प्रत्यगात्मस्रोतस्तया चित्तप्रवर्तनार्थानि। जाते तु प्रत्ययप्रावण्ये आत्मतत्त्वमेवोपदिश्यते, ब्रह्मात्मावगतौ सत्यां ब्रह्मात्म-

स्वरूपेणावस्थितस्य, न किञ्चिज्ज्ञातव्यं कर्तव्यं वा अवशिष्यते। तस्मात्, साधूच्यते स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकम्, न कार्यविधि-शेषतया इति सिद्धम् – इति ॥

**१४१. पूर्वपक्षीययुक्तिः, तत्परिहारश्च व्याख्यान-प्रस्थानरीत्या** – व्याख्यानप्रस्थानानुसारिणस्तु केचित् पूर्वपक्षतत्परि-हारौ अन्यथैव व्याचक्षते। कथम्? 'अज्ञातसङ्गतित्वेन शास्त्रत्वे-नार्थवत्तया। मननादिप्रतीत्या च कार्यार्थाद् ब्रह्मनिश्चयः॥' इति श्लोकेन पूर्वपक्षयुक्तयः संगृह्यन्ते। तत्र शास्त्रत्वं तावत् प्रवृत्तिनिवृत्ति-परस्यैव, न स्वरूपपरस्य। पदानां कार्य एव च संबन्धो न स्वरूपे – इति हेतुद्वयं भाष्यवाक्येनोपपादितं 'प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य' इत्यादिना 'तत्सामान्यात्तथैवार्थवत्त्वं स्यात्' इत्यन्तेन – इति तेषामाशयः। 'अर्थवत्तया मननादिप्रतीत्या च' इत्यस्य प्रपञ्चस्तु अस्मद्दर्शितप्रकारेणैवेति मन्यते। सिद्धान्तस्तु 'कार्यबोधे यथा चेष्टा हर्षलिङ्गादयस्तथा। सिद्धिबोधेऽर्थवत्त्वेवं शास्त्रत्वं हितशासनात्॥' इति॥

तत्र 'कार्याभिधाने तदर्थस्वार्थाभिधाने वा वृद्धव्यवहारे नियमेन सामर्थ्यमवधृतं पदानाम्' – इति पूर्वपक्षयुक्तिः, 'अकार्यपरेऽपि सङ्गतिग्रहोऽस्ति कुतूहलभयादिनिवृत्त्यर्थानाम् अकार्यपराणां पदसंदर्भाणां प्रयोगस्य लोके बहुलमुपलब्धेः। 'अस्ति मेरुराखण्डलादिलोकपालवसतिः' इति, 'नैष भुजङ्गो रज्जुरियम्' इति चैवमादिस्थलेषु – इति भूतार्थ-बुद्धिर्व्युत्पन्नपुरुषवर्तिनी न शक्या समुन्नेतुम्; हर्षादेरुन्नयनहेतोः संभवात्'

– इति सिद्धान्तयुक्तिश्चेत्येतदधिकं दृश्यते व्याख्यानेषु (वा. भा. पा. १०८, १३१)। तत्र 'कार्यतदर्थाभिधाने एव पदसामर्थ्यं दृष्टं वा, भूतार्थाभिधानेऽपि तद्दृश्यते वा?' इत्येतद्गता चिन्ता न प्रकृतविचारे किञ्चित्करी – इत्यस्माकं प्रतिभाति; भूतार्थत्वेऽपि पदवाच्यत्वानभ्युपगमाद् वेदान्तिनये। भूतार्थप्रतिपादने सप्रयोजनत्वलक्षणार्थवत्त्वमस्ति वा न वा?–इत्येतावता चिन्तितेन सर्वाभीष्टसिद्धेश्च–इति ॥

## ३. समन्वयसतत्त्वविचारः, शास्त्रप्रामाण्यसतत्त्वविमर्शश्च

**१४२. भाष्ये विमर्शनीयांशः** – अत्राधिकरणोपक्रमे भाट्टमतानुसारिपूर्वपक्षोपन्यासानन्तरं सूत्रार्थसंग्राहकम् 'तद् ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेवावगम्यते। कथम्? समन्वयात्' इति। तत्र 'समन्वयात्' इति हेतुसमर्पकं वाक्यम् इत्थं विव्रियते – "सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि 'सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्' (छां), 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ.), 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः' (बृ.), 'ब्रह्मैवेदममृतं पुरस्तात्' (मुं.)–इत्यादीनि। न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वये ऽवगम्यमाने अर्थान्तरकल्पना युक्ता। श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्" इति ॥

**अत्रेतच्चिन्त्यम्** (१) कोऽयं वाक्यानां पदानां च समन्वयो नाम? (२) कुत्र वा एतेषां समन्वयः? किं जगत्कारणे ब्रह्मणि

किं वा निषिद्धसर्वविशेषे ? (३) कथं चावाङ्मनसगोचरे ब्रह्मणि वाक्यानां पदानां च तत्प्रतिपादकत्वेन समन्वयः ? – इति ॥

**१४३. समन्वयपदार्थविवेचनं प्राचीनटीकाकारमतेन–** तत्र टीकाकारा व्याचक्रुः–' सम्यगन्वयः समन्वयः । अथ केयं सम्यक्ता अन्वयस्य ? पदानां परस्परानवच्छिन्नार्थानामनन्याकाङ्क्षाणामव्यतिरिक्तैक-रसप्रातिपदिकार्थमात्रान्वयः ' (पं. पा. ९९८) इति । अस्य वाक्य-स्याभिप्राय इत्थं **विवृतष्टीकाविवरणकर्तृभिः**–"तत्र क्रियाकारकसंसर्ग-विषयतया पदानामन्वयं व्यावर्तयति ' परस्परानवच्छिन्नार्थानाम् ' इति । तत्र, उद्भिदादिशब्दस्य यजतिसामानाधिकरण्येन उद्भिद्याग-मात्रवर्तिनोरुद्भिद्यागशब्दयोरनवच्छिन्नार्थत्वेऽपि नियोगाकाङ्क्षा विद्यते, तथेहापि स्यादिति, नेत्याह –'अनन्याकाङ्क्षाणाम्' इति । एवं शब्दानां क्रियावाक्येभ्यो वैलक्षण्यमुक्त्वा, अर्थवैलक्षण्यं दर्शयितुम , तत्र क्रिया-कारकसंसर्गेभ्यो वैलक्षण्यमाह–'अव्यतिरिक्त' इति । ननु नीलोत्पलवद् भेदाभेदविषयतयाप्यभिधेयाव्यतिरेक इति ; नेत्याह 'एकरस' इति । तत्र उद्भिद्यागशब्दयोर्यागविशेषैकरसार्थवर्तिनोरप्यर्थस्य नियोगा-काङ्क्षावदिहाप्यन्याकाङ्क्षेति । नेत्याह – 'प्रातिपदिकार्थ' इति । तत्रापि लिङ्गसङ्ख्ययोरवश्याभ्युपगमनीयतेति । नेत्याह – 'मात्रान्वय' इति । जगत्कारणसामान्यानुवादेन तत्र ज्ञानानन्दशब्दौ आनन्दविशेषं गमयतः। एकसत्यानन्तशब्दाः भेदमिथ्यात्वद्वैताभावाभिधानद्वारेण तत्र लक्षणया वर्तन्ते । ' सर्वज्ञः, सर्वशक्तिः ' इत्यादिशब्दाश्चानिर्वचनीय-श्चोपाधितया तत्र वर्तन्ते । 'अयमात्मा', 'तत्त्वमसि' – इत्यादि-

शब्दाश्च मुख्यलक्षणाभ्यां ब्रह्मण्येव वर्तन्ते इति सर्वे जगत्कारण-विषयाः शब्दाः मुख्यलक्षणोपाधिभिरेकरसमेव ब्रह्म प्रतिपादयन्ति । न चानिर्वचनीयभेदाभावयोः शब्दप्रवृत्तिनिमित्तयोः परमार्थसत्यैक-रसभेदनिमित्ततेति ॥ ' (पं.वि. पा. ९९८–१०००) इति । तदेतदपि विशदयन्तोऽपरे प्राहुः – " 'मुख्यलक्षणोपाधिभिः' इति । अयमर्थः – मुख्यवृत्त्या, लक्षणावृत्त्या, जहदजहल्लक्षणया, उपाधिना च – इति-विभागो द्रष्टव्यः। ज्ञानानन्दशब्दौ व्यक्त्यंशापरित्यागेन मुख्यवृत्त्या वर्तेते, एकादिशब्दास्तु जहल्लक्षणया, तत्त्वमस्यादयो जहदजहल्लक्षणया, सर्वज्ञादयस्तु उपाधितः–इत्यर्थः । भेदाद्यभावाभिधानद्वारेण ब्रह्मण्ये-कादिशब्दानां वृत्तिपक्षे भेदादेर्व्यावर्त्यसद्भावादद्वैतविहतिमाशङ्क्याह– न चेति ॥ " (त.दी. पा. १०००–१००८) इति ॥

तदेवं समन्वयपदार्थं निरूप्य टीकाकाराः स्वाभिप्रेतार्थे दृष्टान्तत्वेन लौकिकं वाक्यद्वयम् उदाजह्रुः ' सोऽयं देवदत्तः ', ' प्रकृष्टप्रकाशश्चन्द्रः ' इति च । व्याकृतं चेदं विवरणकारैः " अनेकेषां पदानां लक्षणादिद्वारेणैकरसवृत्तितायाम् उदाहरणमाह । तत्र द्विविधा वाक्यप्रवृत्तिः । एका ब्रह्मात्मनोरेकत्वविषया ; अपरा सत्यज्ञानादिलक्षणब्रह्मविषया । तत्र प्रथमं ब्रह्मात्मैकत्वे दृष्टान्तमाह – ' सोऽयमित्यादिवाक्यस्थपदानामिव ' इति । तत्र ' सोऽयं देवदत्तः '– इति पदत्रयस्यैकस्मिन् देवदत्ते पर्यवसानं दृश्यते । ........ इदानीं सत्यज्ञानादिवाक्यस्योदाहरणमाह ' प्रकृष्टप्रकाशशब्दयोरिव ' – इति ........ " (पं. वि. पा. १००८–१०१२) इति च ॥

अथ कुत्र कथं समन्वयो वेदान्तवाक्यानाम् ? – इत्यत्र टीकाकाराः प्राहुः प्रसक्तं 'तद्भूतेन क्रियार्थेन समाम्नायः' (जै. १–१–२५) इति पूर्वमीमांसानुसारिवृत्तिकारमतं परिजिहीर्षन्तः –

> " 'क्रियार्थेन समाम्नायः' इति तु धर्मजिज्ञासाप्रतिज्ञानुसारेण सूत्रितम् । इह पुनः 'तत्तु समन्वयात्' इति विशेषणविशेष्यात्मकमपि गौणमपि सामानाधिकरण्यं विहायैकस्मिन् निरंशे अधिकरणे 'तत्त्वमसि' इति समन्वयो मुख्यः प्रदर्शितः । तथा च भगवान् पाणिनिरव्यतिरिक्ते प्रातिपदिकार्थमात्रे प्रथमां स्मरति, नास्तिक्रियाकर्तर्येवातिरिक्तेऽर्थे । तेन च कात्यायनस्य 'अस्तिर्भवन्तीपरः' इतिमतं नानुमन्यते । दृश्यते च 'फलिता अमी द्रुमाः', 'राज्ञोऽयं पुरुषः' इत्यस्तिक्रियाशून्यः समन्वयः । नात्रापि 'ये फलिता द्रुमाः, ते सन्ति', 'यो राज्ञः पुरुषः, सोऽस्ति' इति विवक्षितम् ; अपि तु 'एते द्रुमाः फलिताः', 'अयं पुरुषो राज्ञः' इति संबन्धमात्रावसितं वाक्यम् । एवं सामान्यतः सिद्धस्य जगत्कारणस्य सर्वज्ञत्वादिस्वभावत्वे, त्वंपदार्थस्य च ब्रह्मात्मतायां समन्वयो वेदान्तवाक्यानां सिद्धः । न तत्रास्तिक्रियायाः वस्तुस्वरूपान्तर्वर्तिन्या अप्यनुप्रवेशो दूरत एव बाह्यायाः "
> (पं. पा. १२०९–१२१०)

इति ॥

१४४. टीकाकारमतपरिशीलनम् – इदमत्र नः प्रतिभाति– भाष्यसूत्रश्रुतिभिरसङ्गतेयं व्याख्या–इति । कथम् ? भाष्येणासङ्गतिस्तावत् । "तद् ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेवावगम्यते, कथम् ? समन्वयात् । सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि । 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' .... इत्यादीनि । न च तद्गतानां पदानां

ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमाने अर्थान्तरकल्पना युक्ता " इति हि भाष्यम् । अत्र जगज्जन्मादिकारणभूते ब्रह्मणि तत्प्रतिपादकत्वेन वेदान्तवाक्यानां तद्गतपदानां च समन्वयः – इत्युद्घोषयति भाष्यकारः, टीकाकारस्तु विवरणकाराद्युक्तयुक्त्युपबृंहणपूर्वकं सामान्यतः सिद्धस्य जगत्कारणस्य सर्वज्ञत्वादिस्वभावत्वे त्वंपदार्थस्य च ब्रह्मात्मतायां समन्वय इति व्याचष्टे । तेन स्फुटं भाष्यतट्टीकयोर्विगानं समन्वयसतत्त्वविषये, कुत्र कथं समन्वयः – इत्यंशे च ॥

सूत्रेणासङ्गतिः खल्वपि 'शास्त्रयोनित्वात्', 'तत्तु समन्वयात्' इति च बादरायणीयं सूत्रद्वयम् । अत्र समन्वयात् शास्त्रयोनित्वं ब्रह्मणः साध्यते सूत्रकारेणेति स्फुटम् । शास्त्रयोनित्वं चात्र शास्त्रप्रमाणकत्वम् । तत्र यदि जगत्कारणत्वेन सिद्धस्य ब्रह्मणः सर्वज्ञत्वादिस्वभावत्वे समन्वयः, यदि वा त्वंपदार्थस्य ब्रह्मात्मतायाम्, कथङ्कारं ब्रह्मणः शास्त्रयोनित्वं साधितं भवेत्, येन सूत्रितः समन्वयलक्षणो हेतुर्ब्रह्मणः शास्त्रप्रमाणकत्वं प्रसाधयेदपीति न टीकाकारैः कण्ठरवेणोक्तम्, नापि न्यायबलेन विज्ञायते । तेन सूत्रेणासङ्गतिस्तथैव तिष्ठति ॥

अथ श्रुतिभिरसङ्गतिः खल्वपि – 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्' (बृ. २–५–१९), 'अस्थूलमनणु' (३–८–८) इत्यादिश्रुतयस्तावन्निरस्तसर्वविशेषं ब्रह्मेति प्रतिपादयन्तीति सर्वसंप्रतिपन्नम् । न च ताः, जगत्कारणभूतब्रह्मणः सर्वज्ञत्वादिकं प्रतिपादयन्ति । नापि तद्गतानि पदानि निदर्शितवाक्यद्वयस्थपदानीव परस्परानवच्छिन्नार्थान्यनन्याकाङ्क्षाणि सन्त्यव्यतिरिक्तैकरसवस्तुनि

समन्वितानि। न चात्र टीकाविवरणकारोक्तनयेन मुख्यलक्षणोपाधिद्वारेणैकरसवस्तुप्रतिपादनं संभवति। यतो ब्रह्म तावन्न पदार्थः, नापि वाक्यार्थः। तत्रैवं स्वरूपे मास्तु नाम विशेष्यविशेषणभावेनान्वयः पदानाम्, मा च क्रियाकारकभावेन, तथापि कथं तत्र पदानां यादृशंतादृशमप्यन्वयः, कथंतरां च वाक्यानामन्वयः? असंभवति चान्वये 'समन्वयात्' इति हेतोरेवासिद्धेः कथङ्कारं ब्रह्मणः शास्त्रप्रमाणकत्वलक्षणस्य साध्यस्य सिद्धिः? – इति तु वक्तव्यं टीकाकारानुसारिभिः। श्रुतिस्तु सुस्पष्टमाह ब्रह्मणो वाङ्मनसागोचरत्वम् 'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह' (तै. २–९) इति। न हि वागप्राप्यस्य शास्त्रज्ञाप्यत्वं संभवति, अमनोगोचरस्य शास्त्रोपदेशजनितज्ञानप्रमेयत्वं वा। तस्मात्, श्रुतिविरुद्धः प्रतिभाति वेदान्तवाक्यानां ब्रह्मणि समन्वयः, वेदान्तशास्त्रैकप्रमाणकत्वं च ब्रह्मणः प्राचीनटीकाकारमतरीत्या – इत्यस्मन्मतिः॥

**१४५. ब्रह्मसिद्धिकारमतं तद्विमर्शश्च** – अत्र ब्रह्मसिद्धिकारो मण्डनमिश्र आह – सामान्येन पदार्थत्वे सिद्धेऽसाधारणैर्गुणैः। शक्याऽपूर्वविशेषस्य लोकवत् प्रतिपादना॥ (ब्र. सि. ४–२) यथा लोके 'द्वीपविशेषे एवंनामानो मरकतमयपादाः पद्मरागमयचञ्चवः, सौवर्णराजतपक्षाः पक्षिणः' इति पक्षिसामान्यं प्रमाणान्तराधिगतम् अनन्यसाधारणेन धर्मकलापेन संसृज्यमानं प्रमाणान्तरानधिगतं विशेषरूपमासादयति, वाक्येन च प्रमीयते प्रमाणान्तरानधिगतेन विशेषरूपेण। सर्वस्यैव हि वाक्यस्यानधिगतो विशेष

एव प्रमेयः ; तथा कारणसामान्यं वा सत्सामान्यं वा 'यतो वा इमानि भूतानि जायन्ते' इति 'अस्थूलमनण्वह्रस्वम्' इत्यादिपदार्थैः संसर्गाद्, भेदाच्च प्रमाणान्तरानधिगतं विशेषरूपम् आसादयति, वाक्यस्य च प्रमेयं भवति । तदेवं लोकसिद्धपदार्थान्वयेनैवापूर्वार्थप्रतिपत्तेः, नानवबोधकत्वम् अनुवादकत्वं वा – इति ॥

नैतदस्ति । ब्रह्मणि कारणत्वलक्षणसामान्यस्य वा सत्तासामान्यस्य वा असंभवात् । कारणत्वं हि तावद् देशकालनिमित्तापेक्षं मृदादिषु दृष्टं सावयवेषु, परिणामसहेषु च पदार्थेषु । न तु ब्रह्म देशकालनिमित्ताद्यपेक्षं सावयवं परिणामसहं वा । 'अपूर्वमनपरम्' (बृ. २-५-१९), 'अन्यत्र भूताच्च भव्याच्च' (का. २-१४), 'निष्कलं निष्क्रियं शान्तम्' (श्वे. ६-१९), 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म' (बृ. ४-४-२५) इत्यादिश्रुतिभ्यः । कालाकाशादेरपि ब्रह्मकार्यत्वश्रवणाच्च । सत्तासामान्यं खल्वपि द्रव्यत्वगुणत्वाद्यवान्तरसामान्यविशेषाक्रान्तेषु प्रमेयेष्वेव बाह्यपदार्थेषु वर्तमानं दृष्टम्, ब्रह्म तु द्रव्यत्वादिधर्मातिक्रान्तमिति न तत्र सत्तासामान्यसंभवः । सामान्यविशेषभावश्च खल्वपि ब्रह्मणि नैव प्राणान् धारयति, 'अस्थूलमनणु ....' (बृ. ३-८-८), 'यत्तदद्रेश्यमग्राह्यम्' (मुं. १-१-६) – इत्यादिश्रुतिभिस्तत्र सर्वविशेषनिराकरणात्, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां. ६-२-१) इति प्रागुत्पत्तेरपि द्रव्यादिविशेषरहितस्य जगतः सद्ब्रह्मात्मनैवास्तित्वश्रुतेः । न हि सत्तासामान्याभ्युपगन्तृभिः काणादादिभिः प्रागुत्पत्तेरपि निर्विशेष-

सदस्तित्वमनुमन्यते । न च यथाश्रुतस्य कारणस्य सतो वा समस्तीतर-संसर्गो वा भेदो वा, येन लोकसिद्धकारणसामान्यस्यैव सत्सामान्यस्यैव वा पदार्थान्तरैः संसर्गात् भेदाच्च प्रमेयान्तरानधिगतविशेषत्वं वाक्य-प्रमेयत्वं वा साध्येत । न च 'अस्थूलमनणु' इत्यादिश्रुतिसमर्पितेऽक्षरे स्थूलभिन्नपदार्थत्वं विवक्ष्यत इति शक्यं वक्तुम्, स्थूलत्वनिषेधेनैव नञश्चरितार्थत्वात् । न चेदं ब्रह्म लोकसिद्धप्रमेयसजातीयम्, येन पक्ष्यादिनिदर्शनं स्थाने स्यात् ; 'एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम्' (बृ. ४–४–२०) इति श्रुतेः । तस्मात्, न साध्विदमुच्यते "सामा-न्येन पदार्थत्वे सिद्धेऽसाधारणैर्गुणैः । शक्यापूर्वविशेषस्य लोकवत् प्रतिपादना ॥' इति । तस्मात्, 'सामान्यतः सिद्धस्य जगत्कारणस्य सर्वज्ञत्वादिस्वभावत्वे समन्वयः' इति टीकाकारमतमिव इदमपि मतमनादेयम् – इति स्थितम् ॥

**१४६. ब्रह्मसिद्धिकारस्य कल्पनान्तरं तद्विमर्शश्च –** कल्पनान्तरमस्ति मण्डनस्यैव विम्रष्टव्यमत्र–' सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थिते । प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते । प्रविलीनप्रपञ्चेन तद्रूपेण न गोचरः । मानान्तरस्येति मतमाम्नायैकनिबन्धनम्' (ब्र. सि. ४–३, ४) इत्यर्थसंग्राहकश्लोकः । एतद्विवरणं त्वेवं तत्रैव "न लोकेऽत्यन्तमप्रसिद्धं ब्रह्म । सर्वप्रत्ययवेद्यत्वात् । ब्रह्मणो व्यतिरेकेण प्रत्येतव्यस्याभावात् । विशेषप्रत्ययानां च सामान्यरूपानुगमात् । भेदोपसंहारावशिष्टं च सत्यं ब्रह्म – इति प्रतिपादनात् ; 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां.) इति दृष्टान्तात् ।

किं तर्हि शब्देन प्रतिपाद्यते ? प्रपञ्चाभावः । तत्र प्रपञ्चपदार्थोऽपि सिद्धः, निषेधोऽपि सिद्धः ; तयोः संसर्गात् तदभावप्रतिपत्तिः । आम्नायैकनिबन्धनत्वं तु तस्योच्यते प्रत्यक्षादीनामविद्यासंभिन्नत्वात्, प्रत्यस्तमितनिखिलभेदेन रूपेणाविषयीकरणात्, भेदप्रत्यस्तमयस्याम्नायावगम्यत्वात् " इति ॥

एतदपि मन्दम् ; ब्रह्मणि शब्दप्रत्ययवेद्यत्वस्यासंभवादेव । यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह' (तै.२–९), 'यद्वाचाऽनभ्युदितम्' (के. १–५), 'यन्मनसा न मनुते' (के. १–६) – इति चैवं हि ब्रह्मणः शब्दप्रत्ययविषयत्वं सर्वप्रत्ययवेद्यत्वं च निषेधति । यदुच्यते तद्व्यतिरेकेण प्रत्येतव्याभावः – इति । अस्त्वेवम्, तेन ब्रह्मणि प्रत्येतव्याभाव एवोच्यतां श्रुत्या । यद्यद्धि प्रत्येतव्यतया विभाव्यते तत्सर्वं नास्त्येव ब्रह्मणि प्रतीताकारेणेत्येव खलूच्यते 'यत्तदद्रेश्यम्' (मुं. १–१–६) इत्यादिना । तत्स्वरूपेण प्रतिष्ठामेव तु पुरुषार्थहेतुमाह श्रुतिः 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति' (तै. २–७) इति । तस्मात्, प्रत्येतव्यप्रतिषेधिनी श्रुतिः प्रतिषेधमात्रेणोपक्षीणा, न तु ब्रह्मप्रत्यायनेऽपि व्याप्रियत इत्यनवद्यम् । अत एव प्रपञ्चतदभावयोः संसर्गोऽपि नास्ति प्रतीयमानो ब्रह्मणीति, न भेदप्रत्यस्तमयस्याम्नायावगम्यत्वं ब्रह्मणः । तस्मात्, वाक्यस्यपदार्थानां संसर्गदर्शनमात्रादाम्नायैकप्रमाणकत्वं ब्रह्मणः – इति कुदर्शनमेतदिति सिद्धम् ॥

**१४७. व्याख्यानप्रस्थानीयानां मतभेदाः, तद्विमर्शश्च–**

येऽपि व्याख्यानप्रस्थानीयाः केचिन्मन्यन्ते – कार्यान्विते एव

शक्तिमिच्छतां प्राभाकराणामनुयायी वृत्तिकारः, यतः स ब्रूते—कार्यविधि-प्रयुक्तस्यैव ब्रह्मणः प्रतिपादनाय वेदान्ताः प्रवृत्ता इति। सिद्धान्ती त्वाह भूतार्थेऽवधृतशक्तयः शब्दाः क्वचित् स्वनिष्ठभूतविषया दृश्यमानाः, न कथञ्चित् क्रियानिष्ठतां गमयितुमुचिताः। वर्तमानापदेशा अस्ति-क्रियोपहिताः, अकार्यार्था अप्यटवीवर्णकादयो लोके बहुलमुपलभ्यन्ते, अक्रियानिष्ठा अपि संबन्धमात्रपर्यवसायिनः 'राज्ञः पुरुषः' इत्यादयः। तथा प्रातिपदिकमात्रनिष्ठाः 'वृक्षाः फलिनः' इत्यादयः। न च 'ब्राह्मणो न हन्तव्यः' इत्यादीनां वाक्यानां कार्यपरता शक्या आस्थातुम्' इति। तथा येऽपि मन्यन्ते—'अर्थान्तरसंसर्गपरतामात्रेण वाक्यार्थप्रतिपत्तौ न कार्यसंसर्गपरत्वमात्रमिति नियन्तुं युक्तम्। एवं च कूटस्थनित्यब्रह्मरूपपरत्वेऽप्यदोषः' इति, तेऽप्येतेन प्रत्युक्ता भवन्ति; यतः कार्यान्विते शक्तिः, योग्येतरान्विते वा शक्तिरस्तु पदानां लोके, ब्रह्मणि तु न कस्यचित् पदस्य कथञ्चिदपि शक्तिः समस्तीत्यतो न भेदसंसर्गरहितं ब्रह्म कयापि युक्त्या वाक्यार्थतां गमयितुं शक्यम्॥

तदेवं ब्रह्मणि भेदसंसर्गाद्यभावान्न तत्पदार्थः, अत एव तन्न वाक्यार्थः – इत्यत्र वार्तिककारसम्मतिरप्यस्ति। एवं ह्युक्तं बृहद्वार्तिके-'भेदसंसर्गहीनत्वात् पदवाक्यार्थताऽऽत्मनः। दुःसम्भाव्याऽत आत्माऽय-मात्मनैवानुभूयते॥' (बृ. वा. १–४–१४०८) इति। अत्र भेदः संसर्गश्च पदार्थत्वे वाक्यार्थत्वे च हेतू भवतः, न तु तौ ब्रह्मणि संस्त इत्युक्तम्। 'द्विधेतं द्वीतमित्याहुस्तद्भावो द्वैतमुच्यते। तन्निषेधेन चाद्वैतं

प्रत्यगवस्त्वभिधीयते ॥ द्विधा त्रिधा वा बहुधा कारणं सद्भवेदिह । तस्यात्मनि निषिद्धत्वादात्माऽद्वैतो भवेदिह ॥ भेदसंसर्गहानार्थमेवं-यत्नामपि श्रुतिम् । अनादृत्यान्यथा प्राहुरहोऽविद्या महीयसी ॥ ' (बृ. वा. ४-३-१८०७, १८०८, १८०९) इति च । 'एकमेवा-द्वितीयम्' इति श्रुतिः, भेदसंसर्गहीनत्वं ब्रह्मणः ख्यापयतीत्युक्तमत्र । एवं 'अव्यावृत्ताननुगतं निःसामान्यविशेषतः । ब्रह्मेति मुख्यवृत्त्येह वस्तु श्रुत्याऽभिधीयते ॥ ' (बृ.वा. ४-३-१८१५) इति ब्रह्मणो निःसामान्य-विशेषत्वमप्युदीरितं वार्तिके ॥

एतेन यच्चाहुः केचित् – 'पुंवाक्यनिदर्शनेन हि भूतार्थतया सापेक्षत्वमाशङ्क्यते । तत्र यदि पुंवाक्यानां भूतार्थत्वेन सापेक्षत्वम्, ततः प्रत्यक्षादीनामपि परस्परापेक्षत्वेनाप्रामाण्यप्रसङ्गः ; अथ पुरुषबुद्धि-प्रभवतया पुंवाक्यं सापेक्षम्, एवं तर्हि तदपूर्वकाणां वेदान्तानां भूतार्था-नामपि नाप्रामाण्यम् । न चानधिगतगन्तृता नास्ति येन प्रामाण्यं न स्यात् जीवस्य ब्रह्मताया अन्यतोऽनधिगमात् ' (वा. भा. पा. १०५-१०६) इति, 'समस्तोपाध्यनवच्छिन्नानन्तानन्दचैतन्यैकरसम्, उदासीनम्, एकम्, अद्वितीयम्, आत्मतत्त्वं श्रुतिस्मृतीतिहासपुराणेषु गीयते । न चैतान्युपक्रमपरामर्शोपसंहारैः क्रियासमभिहारेणेदृगात्मतत्त्वमभिदधति तत्पराणि सन्ति शक्यानि शक्रेणाप्युपचरितार्थानि कर्तुम् ' (वा.भा.पा. ८) इत्यादि च, तत्रेदं वक्तव्यम्–किम् अपौरुषेयाण्यपि वाक्यानि वाक्य-धर्मगतिमागच्छन्ति, येनावाङ्मनसगोचरमपि तत्त्वं वाग्गोचरीकर्तुमीहन्ते ? नो चेत् किमायातम् उपक्रमोपसंहारादिलिङ्गप्रपञ्चनाडम्बरेणेति ?

यदपि व्याख्यानप्रस्थानान्तरीयाणां मतम्–'यदवगमयत्याम्नायः, तदर्थः सः ; तस्माद् यथा कार्यमवगमयंस्तदर्थः, एवमैकात्म्यमप्यवगमयंस्तदर्थो भवितुमर्हति ; प्रतीतिकृतत्वात् प्रामाण्यस्य, प्रतीतिस्तु कार्यैकात्म्ययोस्तुल्या । प्रत्यक्षादिष्वप्येतदेव प्रमाणवृत्तम्, यदनवगतमवगम्यते' (पं. पा. १०३७, १०३८) इत्यादि, तदपि व्याख्यातं भवति। तत्र कार्यमवगमयन् वेदः, स्वदृष्टं मोक्षम् अवगमयेदपि, प्रत्यक्षादिप्रमाणान्तरागोचरत्वान्मोक्षस्य; संसारित्वं तु जीवस्य भ्रान्तमिति केन प्रमाणेनावगम्यते ? शास्त्रेणेति चेत्, कथमवाङ्मनसगोचरे ऐकात्म्ये वाक्यानां प्रवृत्तिः ? अपौरुषेयत्वादिति चेत्, अपौरुषेयाणामपि वाक्यानां वाक्यत्वं कथमपगच्छति ? नापगच्छति चेत्, कथं स्वागोचरस्य गोचरीकरणमिति ? तस्मात्, यावद्वेदान्तवाक्यानामवाग्गोचरे समन्वयो नोपपाद्यते, तावद् वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यं न साधितं भवतीत्यत्रापि दोषस्तदवस्थ एवेत्यलं वाक्यधर्मविचारायासेन ॥

१४८. **पदवाक्यसमन्वयवाचोयुक्त्या किं विवक्षितं भाष्ये ?** – तदेवं नास्ति पदार्थत्वं वाक्यार्थत्वं वा ब्रह्मणः, भेदसंसर्गहीनत्वात्, निःसामान्यविशेषत्वाच्च – इति स्थितम् । कथं तर्हि ब्रह्मणि वेदान्तवाक्यानां समन्वयः, कथं वा तत्स्थपदानां निश्चितसमन्वयो भाष्यकारमते ? कीदृशं च वेदान्तशास्त्रस्याप्रमेयेऽद्वितीये प्रमाणत्वमभिमतं भगवतः ? – इति निरूपणीयमेतत् ॥

अत्रोच्यते – यथैवाविषये ब्रह्मण्यविद्याकल्पितं जिज्ञास्यत्वमध्यारोपदृष्ट्या अभ्युपगम्य ब्रह्मजिज्ञासा कर्तव्यत्वेनोपदिश्यते आदिमे

सूत्रे ब्रह्मात्मविज्ञानस्यैव परमपुरुषार्थहेतुत्वात् तत्प्रतिपादकवेदान्तवाक्य-मीमांसाशास्त्रारम्भणमर्थवत्, यथैव च सकलकार्यकारणभावादिसंबन्ध-विवर्जितस्यापि ब्रह्मणोऽविद्याकल्पितं मिथ्यारूपविशेषमप्यभ्युपगम्य जगज्जन्मादिकारणत्वं लक्षणत्वेन सूत्रितमध्यारोपदृष्ट्यैव, एवमेवेहापि ब्रह्मण्यवाङ्मनसगोचरे पदार्थत्वं वाक्यार्थत्वं चाध्यारोपदृष्ट्या अभ्युपगम्य वेदान्ततत्त्वपदार्थान्वयः प्रदर्श्यते परमार्थतत्त्वे चित्तावतारोपायत्वेनैव । तं च समन्वयं हेतूकृत्य शास्त्रस्य प्रमाणत्वं ब्रह्मणश्च वेदान्तशास्त्रैकगम्यत्वं प्रोच्यते । परमार्थतस्तु स्वयंसिद्धसर्वात्मस्वरूपत्वान्निर्विशेषत्वात् सर्वप्रमाणागोचरत्वाच्च न तस्मिन् जिज्ञास्यजिज्ञासुत्वविभागः, न च कार्यकारणविभागो नैव च प्रमाणप्रमेयादिविभागो वा समस्तीति विज्ञातव्यम् इत्यवधातव्यम् । तथा हि श्रुतिः 'एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् । विरजः पर आकाशादज आत्मा महान् ध्रुवः' (बृ.४-४-२०, २१) इति, अविक्रियात्मत्वात्, कूटस्थनित्यस्वरूपत्वात् अव्याकृताकाशादपि सूक्ष्मतरत्वात्, जन्मादिविक्रियारहितत्वेन कार्यकारणविभागानर्हत्वात् सर्वमहत्त्वाच्च अत्र शास्त्राचार्योपदेशमनुसृत्यैकधैवानुद्रष्टव्यम्, अनु-भाव्यम् – इत्यादि । न यत्राभिधानाभिधेयविभागो वा वाक्यवाक्यार्थ-विभागो वा तस्य न पदार्थोऽस्तीति ॥

कथं तर्हि शास्त्रप्रवृत्तिः, वाक्यस्थपदप्रवृत्तिर्वा ब्रह्मात्मनि, 'तरति शोकमात्मवित्', 'अयमात्मा ब्रह्म', 'तत्त्वमसि', 'अहं ब्रह्मास्मि' – इत्यादिवाक्ये ; यावता अभिधानाभिधेयविभागस्याप्यभाव एव तत्रेष्यते ? अत्राभिधीयते – अध्यारोपितनामरूपकर्मविभागद्वारेण

ब्रह्म निर्दिश्यते 'आत्मा', 'ब्रह्म' इत्यादिभिः शब्दैः । तथा हि — देहवति प्रत्यगात्मनि भेदविषये प्रयुज्यमान आत्मशब्दः, देहादीनामात्मत्वे प्रत्याख्यायमाने यत् परिशिष्टम्, तदवाच्यमपि प्रत्याययति । तत्र श्रोतुरात्मत्वादेव प्रतिपत्ता ब्रह्मात्मानं स्वानुभूत्यैव प्रत्येति, शब्देनापि व्यवहरति 'ममाऽऽत्मा' इति । एवं बृहत्तमवस्तुवाचकोऽपि ब्रह्मशब्दः, लौकिकेषु ब्रह्मशब्दवाच्येष्वब्रह्मत्वेन प्रत्याख्यायमानेषु यत् सर्वविकल्पास्पदं तत्त्वम्, तदवाच्यमपि प्रत्याययति 'ब्रह्मैवेदं विश्वम्' (मुं. २–२–११) इत्यादिवेदान्तवाक्यस्थम् । तथा 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति .... तदितर इतरमभिवदति .... तदितर इतरं विजानाति' (बृ. ४–५–१५) इत्यादीनि वेदान्तवचनान्यविद्याकल्पितद्वैतक्षेत्रे एवाभिधानाभिधेयप्रमाणप्रमेयादिविभागमनुज्ञाय 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् ....' (बृ. ४–५–१५) इत्यादिना वाङ्मनसयोर्व्यवहारं सर्वथा प्रतिषेधन्ति ब्रह्मात्मैकत्वावस्थायाम् । तस्मात्, प्रमाणप्रमेयादिविभागप्रतिषेधेनैव श्रुतयो विज्ञापयन्त्यप्रमेयमपि परमार्थतत्त्वमिति ज्ञेयम् ॥

'तत्त्वमसि' इत्यादीन्यपि संसारिणो ब्रह्मात्मभावबोधकानीव लक्ष्यमाणानि वाक्यानि अन्यात्मभावनिषेधमात्रेणोपक्षीणानि न तु स्वतःसिद्धं ब्रह्मात्मभावं वाक्यधर्ममाश्रित्य साक्षाद्बोधयन्तीत्यदोषः ; स्वतःसिद्धस्य हि तस्य न ज्ञापनाकाङ्क्षा समस्तीति । यथाह भाष्यकारः— 'पारमेश्वरमेव हि शारीरस्य पारमार्थिकं स्वरूपम् ; उपाधिकृतं तु शारीरत्वम्, 'तत्त्वमसि' (छां. ६–८–७), 'नान्यदतोऽस्ति द्रष्टृ'

(बृ. ३-८-११) इत्यादिश्रुतिभ्यः। (३-४-८, पा. ४३६) इति। 'न खल्वीश्वरस्य संसार्यात्मत्वं प्रतिपाद्यत इत्यभ्युपगच्छामः, किं तर्हि संसारिणः संसारित्वापोहेनेश्वरात्मत्वं प्रतिपिपादयिषितमिति। एवं च सत्या अद्वैतेश्वरस्य अपहतपाप्मत्वादिगुणता; विपरीतगुणता त्वितरस्य मिथ्या – इति व्यवतिष्ठते' (४-१-३, पा.४६४, ४६५) इति। "स्वयंप्रसिद्धं ह्येतच्छारीरस्य ब्रह्मात्मत्वमुपदिश्यते, न यत्नान्तरप्रसाध्यम्, अतश्चेदं शास्त्रीयं ब्रह्मात्मत्वम् अवगम्यमानं स्वाभाविकस्य शारीरात्मत्वस्य बाधकं संपद्यते, रज्ज्वादिबुद्धय इव सर्पादिबुद्धीनाम्। बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति" (२-१-१४, पा. १९७) इति चैवमसकृत्। शास्त्रस्य च प्रामाण्यम् अविद्याकल्पितानात्मभावनिवर्तकत्वेनैव, न तु व्याख्यानप्रक्रियाभिमतरीत्या, पदानां मुख्यलक्षणोपाधिभिरात्मबोधकत्वेनेति गीताभाष्ये सुस्पष्टमुक्तम् "शास्त्रं त्वन्त्यं प्रमाणम् अतद्धर्माध्यारोपमात्रनिवर्तकत्वेन प्रामाण्यमात्मनः प्रतिपद्यते, न त्वज्ञातार्थज्ञापकत्वेन; तथा च श्रुतिः 'यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' (बृ. ३-४-१) इति" (गी.भा. २-१८, पा.१६) इति, 'न ह्यात्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्यवहारः सम्भवति। प्रमातृत्वं ह्यात्मनो निवर्तयत्यन्त्यं प्रमाणम्। निवर्तयदेव चाप्रमाणीभवति स्वप्नकालप्रमाणमिव प्रबोधे' (गी. भा. २-६९, पा. ३०) इति च। तस्मात्, अविद्याध्यारोपितानात्मभावनिवर्तनमात्रेण प्रामाण्यं वेदान्तवाक्यानाम्, न तु ब्रह्मणो वाक्यार्थत्वाङ्गीकारेण इति सिद्धम्॥

एवं वाक्यगतपदान्यपि ब्रह्मस्वरूपप्रतिपादकत्वेन समन्वितानीव प्रतिभासमानान्यपि न ब्रह्म साक्षाद् वाच्यविधया बोधयन्ति, कथं तर्हि, सामानाधिकरण्येन प्रयुक्तानि स्वविवक्षितार्थानां विशेष्यविशेषण-भावमिवापाद्य स्वस्ववाच्यार्थात्, लोकसिद्धार्थान्निवर्तयन्त्येव । न पुनः कयाचिद् वृत्त्या ब्रह्म बोधयन्ति । ततश्च श्रोतुरात्मभूतं ब्रह्म स्वतःसिद्धं निर्विशेषमनुभवरूपत्वात् , स्वयमेव निष्प्रत्यूहं प्रकाशते । यत्तु 'सत्य-शब्देन लक्ष्यते सत्यं ब्रह्मेति, न तु सत्यशब्दवाच्यमेव ब्रह्म' (तै. भा. २-१) इति भाष्यम् , तत्तु वाच्यत्वव्यावृत्त्यैव तात्पर्यवत्, न तु ब्रह्मणो लक्षणावृत्त्या शब्दबोध्यत्वेऽपि; यस्मात् तत्रैव वाक्यशेषे एवं लिखितमस्ति "सत्यादिशब्दा इतरेतरसंनिधानादन्योन्यनियम्यनियामकाः सन्तः सत्यादिशब्दवाच्यात्तन्निवर्तकाः, ब्रह्मणो लक्षणार्थाश्च भवन्तीत्यतः सिद्धं 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह', 'अनिरुक्तेऽनिलयने' इति चावाच्यत्वं नीलोत्पलवदवाक्यार्थत्वं च ब्रह्मणः" (तै. भा. २-१, पा. २८५) इति ॥

१४९. तत्त्वमसीत्यादिवाक्यानां ब्रह्मणि प्रमाणत्वं कथम् ? – तदेवं न पदार्थत्वं न च वाक्यार्थत्वं ब्रह्मणः कथञ्चिदपीति स्थितम् । कथं तर्हि तत्त्वमसीत्यादिभिर्वाक्यैः परमात्मप्रतिपत्तिः ? उक्तोत्तरोऽयं प्रश्नः—अध्यारोपितानात्मभावप्रतिषेधेनेति । प्रदर्शितश्चाय-मभिप्रायो तत्त्वमसिवाक्यार्थप्रतिपत्तिप्रकारमवबोधयता भाष्यकारेण । एवं हि लिखितं तेनावृत्त्यधिकरणे –

"अपि च 'तत्त्वमसि' इत्येतद् वाक्यं त्वंपदार्थस्य तत्पदार्थभाव-माचष्टे । तत्पदेन च प्रकृतं सद् ब्रह्म ईक्षितृ- जगतः जन्मादिकारणम्

अभिधीयते। 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २-१), 'विज्ञानमानन्दं ब्रह्म' (बृ. ३-९-२८), 'अदृष्टं द्रष्टृ........अविज्ञातं विज्ञातृ' (बृ. ३-८-११), 'अजमजरममरम्' (बृ. ४-४-२५), 'अस्थूलमनण्वह्रस्वमदीर्घम्' (बृ. ३-८-८) – इत्यादिशास्त्रप्रसिद्धम्। तत्र, अजादिशब्दैर्जन्मादयो भावविकारा निवर्तिताः, अस्थूलादिशब्दैश्च स्थौल्यादयो द्रव्यधर्माः; विज्ञानादिशब्दैश्च चैतन्यप्रकाशात्मकत्वमुक्तम्। एष व्यावृत्तसर्वसंसारधर्मको अनुभवात्मको ब्रह्मसंज्ञकस्तत्पदार्थो वेदान्ताभियुक्तानां प्रसिद्धः। तथा त्वंपदार्थोऽपि प्रत्यगात्मा श्रोता देहादारभ्य प्रत्यगात्मतया सम्भाव्यमानश्चैतन्यपर्यन्तत्वेनावधारितः। तत्र येषामेतौ पदार्थौ, अज्ञानसंशयविपर्ययप्रतिबद्धौ, तेषां 'तत्त्वमसि' इत्येतद् वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति; पदार्थज्ञानपूर्वकत्वाद् वाक्यार्थज्ञानस्येत्यतः तान् प्रत्येष्टव्यः पदार्थविवेकप्रयोजनः – शास्त्रयुक्त्यभ्यासः। यद्यपि च प्रतिपत्तव्य आत्मा निरंशः, तथाप्यध्यारोपितं तस्मिन् बह्वंशत्वं देहेन्द्रियमनोबुद्धिविषयवेदनादिलक्षणम्, तत्रैकेनावधानेन एकमंशमपोहति, अपरेणापरम् – इति युज्यते तत्र क्रमवती प्रतिपत्तिः। तत्तु पूर्वरूपमेवात्मप्रतिपत्तेः। येषां पुनर्निपुणमतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबन्धोऽस्ति, ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुमिति तान् प्रत्यावृत्त्यानर्थक्यमिष्टमेव। सकृदुत्पन्नैव ह्यात्मप्रतीतिरविद्यां निवर्तयतीति नात्र कश्चिदपि क्रमोऽभ्युपगम्यते॥ (४-१-२, भा. ५९२)"

इति॥

अत्र तात्पर्यमवधार्य भाष्यवाक्यानि पर्यालोचयतामिदं स्पष्टं भवेद् यत् त्वंपदार्थतत्पदार्थयोरज्ञानादिप्रतिबद्धत्वमेव हेतुरनवगमे, तयोः स्वयंसिद्धानुभवात्मत्वात्, प्रतिबन्धनिवृत्त्यर्थमेव तु श्रवणमननाद्युपदेश इति; ततश्च न पदार्थत्वं नापि वाक्यार्थत्वं ब्रह्मात्मनः–

इत्यतः, शास्त्रवाक्यानां न वाक्यधर्माङ्गीकारेण प्रमाणत्वं ब्रह्मात्मनि, किं त्वविद्याकल्पितातद्धर्मनिवर्तकत्वेनैवेति च । स्फुटतरं चेहापि समन्वयभाष्ये समुद्घोषितम् "अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेत्, न ; अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य, न हि शास्त्रमिदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति, किं तर्हि प्रत्यगात्मत्वेनाविषयतया प्रतिपादयत्, अविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति " (१-१-४, पा. १४६) इति ॥

तदेवम् अवाङ्मनसगोचरमपि ब्रह्मात्मतत्त्वम् विषयमिव अध्यारोपदृष्ट्या प्रकल्प्य तस्य शास्त्रैकप्रमाणकत्वमुच्यते अस्मिन्नधिकरणे प्रत्यक्षादिप्रमाणविषयत्वनिराकरणार्थम् । अपदार्थम्, अवाक्यार्थमपि च ब्रह्म पदवाक्यविषयमिव प्रकल्प्य वेदान्तवाक्यानां तत्रैव समन्वयः, वाक्यस्थानां पदानां च तत्प्रतिपादकत्वेन समन्वय उपपाद्यते, वेदान्तानामेव तस्मिन् प्रमाणत्वनिर्धारणार्थम् । अपवाददृष्ट्या तु ब्रह्म निर्विशेषम्, अद्वितीयम्, अविषयभूतं च वाङ्मनसयोरित्युपदिश्यत इति सर्वमनाकुलम् ॥

## ४. अध्यारोपापवादप्रक्रिया

**१५०. प्रक्रियास्वरूपम्** — अथ केयम् अध्यारोपापवादप्रक्रिया नाम, यामाश्रित्य वेदान्तवाक्यानां ब्रह्मणि समन्वयः प्रतिपाद्यते ? कीदृशसमन्वयाश्रयेण च वेदान्तशास्त्रस्य ब्रह्मणि प्रामाण्यं साध्यत इति ?

प्रत्यस्तमितसर्वविशेषेऽपि परब्रह्मणि युष्मदस्मत्प्रत्ययगोचरत्वेन विषयविषयिविभागं लोकसिद्धमभ्युपगम्य तयोश्च विषयविषयिणोः

परस्परात्मतां परस्परधर्मत्वं चाध्यारोप्य नैसर्गिको लोकव्यवहारः प्रवर्तते तत्त्वस्वरूपविवेकाभावनिमित्तमिथ्याज्ञानवशतः । तच्च मिथ्याज्ञानम् 'अध्यासः', 'अविद्या' – इत्यादिशब्दैः परिभाष्यते वेदान्ते । तामेतामविद्यां पुरस्कृत्य प्रमाणप्रमेयव्यवहारः, कर्तृत्वभोक्तृत्वव्यवहारः शास्त्रशिष्यादिविभागव्यवहारश्चेत्यादयः सर्वे लौकिकवैदिकव्यवहाराः प्रवर्तन्ते – इति स्थितिः । तदीदृशव्यवहारावस्थायाम् अविद्याकल्पितायां निर्विशेषेऽपि ब्रह्मणि चित्तावतारोपायत्वेन क्वचित् कश्चिद् विशेषमध्यारोप्यैव विशेषान्तरं तत्र नास्तीत्युपदिश्यते वेदान्तेषु । तत्त्वजिज्ञासासमाप्तौ तु यदपि पूर्वमध्यारोपितं शिष्योपदेशोपायत्वेन तदपि परमार्थतो नास्तीत्येवोपपाद्यते, श्रोतापि तथैव तत्त्वं प्रतिपद्यते । सेयं तत्त्वप्रतिपत्त्युपायत्वेन परिकल्पिता अध्यारोपापवादप्रक्रियेति व्यपदिश्यते संप्रदायविद्भिः ॥

**१५१. विद्याविद्याविभागभाष्ये प्रकृतप्रक्रियाश्रयणम् –** तामिमां प्रक्रियामवलम्ब्यैव सर्वत्र वेदान्तेषु तत्त्वनिरूपणं क्रियते – इत्येतत्प्रदर्शनार्थं भगवता भाष्यकारेण **विद्याविद्याविभागं** तावदध्यारोपदृशा समवलम्ब्योक्तम् 'एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः, कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः' (सू. ८, पा. ५.७) इति । अस्यार्थः – अयम् 'अहमिदम्, ममेदम्' इति च अविचारदशायां लोके स्वभावेनानुभूयमानोऽध्यासः, मिथ्याप्रत्ययरूपः, यथारूप एव लोके शुक्तिकायां रजतप्रत्ययः, एकस्मिन्नेव चन्द्रे वा सद्वितीयत्वप्रत्ययः, तथारूप एव मृषैव, न तु

वस्तुतो विद्यमानार्थविषयः स्वयं प्रतीयमानरूपेण वस्तुतो विद्यमानो वा ; अनादिरनन्तः, न कादाचित्कः क्वचित्कालविशेषे देशविशेषे वा समुद्भूय विनाशी । अनुभूयमानावस्थायां वस्तुसन्निवेवावभासमानोऽपि विद्योदयादूर्ध्वं बाधितोऽपि न तथ्यत एवास्तंगमितः, यथा तैमिरिकदृष्टो द्वितीयश्चन्द्रः । न हि तस्य चन्द्राभासस्य तथ्यत एवात्मलाभो विनाशो वा समस्ति । तद्वदेवायम् – इत्यनादिरनन्तश्च । स एवंभूतोऽपि कर्तृत्वभोक्तृत्वप्रवर्तको दरीदृश्यते । कर्तृत्वभोक्तृत्वे अपि स्वप्रवर्तकाध्यासवन्मिथ्यारूपे एव सती अनादी अनन्ते च ; अथ चाद्यन्तवतीव प्रथेते इति भावः । सोऽयमविद्याख्योऽध्यासः स्वयं मिथ्याप्रत्ययरूपोऽपि सन् यथार्थबुद्ध्या गृह्यमाणः सर्वेषां प्रमाणप्रमेयव्यवहाराणामर्थानर्थव्यवहाराणां शास्त्रशिष्यादिव्यवहाराणां च हेतुत्वं भजत इव सर्वैरनुभूयत इत्यतः 'सर्वलोकप्रत्यक्षः' इत्युच्यते, अनुभव एव ह्येको व्यवहारे विषयसत्यत्वबुद्धिमावहतीति, न तु 'मिथ्याप्रत्यय एवैषः' – इति सर्वैर्लोकैर्गृह्यत इत्यभिप्रायेण । विद्याविधूताविद्यैरेव हि मृषात्वेन निश्चीयते ॥

तदेवमविद्यायाः स्वरूपं कार्यं चादर्श्य भाष्यकारः प्राह **'अस्यानर्थहेतोः प्रहाणायाऽऽत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते'** इति । अयमभिप्रायः – यद्यप्यात्मैकत्वमेव परमार्थः, तथापि नैसर्गिकया यथावर्णितया अविद्यया प्रभाविता लौकिका जनाः, क्रियाकारकफलभेदरूपं द्वैतमेव सत्यम्, आत्मानश्च बहवः स्वभावत एव कर्तृभोक्तृरूपाः–इत्येवं प्रतिपन्नाः । तामिमां तेषां भ्रान्तिम् अपनुद्य

तत्त्वं बोधयितुं वेदान्तानां प्रवृत्तिः । यद्यपि विद्याविद्याविभागोऽप्ययं मिथ्यैव, द्वैतलक्षणत्वात्; तथापि तमिमं विभागं नित्यसिद्धवत् परे ब्रह्मणि निर्विभागे नित्यनिर्द्वैते चाध्यारोप्य 'विद्यया अविद्या निवर्त्यते' इति बोधयन्ति वेदान्ताः। प्रतिवुद्धास्तु विज्ञास्यन्ति 'आत्मा विद्याविद्यादि-द्वैतरहित एव नित्यदा, अत एव न तस्मिन् विद्या तथ्यत एव निष्पादयितव्या, अविद्या वा निवर्तयितव्या विद्यया' इति । यथोक्तं **नैष्कर्म्यसिद्धौ** – 'देशकालाद्यसंबन्धात् देशादेर्मोहकार्यतः । नानुत्पन्नमदग्धं वा ज्ञानमज्ञानमस्त्यतः ॥' (नै.सि. ४-५८) इति । **संबन्धवार्तिकेऽपि** 'तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः । अविद्या सह कार्येण नासीदस्ति भविष्यति ॥' (सं. वा. १८३) इति ॥

'अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये' इत्यपि अविद्याविद्यमानविद्याविद्याविभागमुररीकृत्यैवेति स्पष्टम् । न हि वस्तुतो विद्यमानस्यैव धर्मस्य कर्त्री वा अपोढ्री वा विद्या दृष्टा क्वचिदपि; तथेहापि समारोपितामेवाविद्याश्रयतां विद्याविद्याविभागं च प्रजहाति सा – इत्येव युक्तं कल्पयितुम् ।ये पुनः प्रवदन्ति "आत्मैकत्वविषये विद्या उदितापि न प्रतिष्ठां लभते, असम्भावनाभिभूतविषयत्वात्, तथा च लोके 'अस्मिन् देशे काले चेदं वस्तु स्वरूपत एव न संभवति' इति दृढभावितम्, यदि तत्कथञ्चित् दैववशादुपलभ्येत तदा स्वयमीक्षमाणोऽपि तावन्नाध्यवस्यति यावत् तत्संभवं नानुसरति । तेन सम्यग्ज्ञानमपि स्वविषये अप्रतिष्ठिता अनवाप्तमिव भवति ।" (पं पा. पा. ५०२-५०३) इति, ते साहसिकतराः, प्रतपत्यपि सवितरि मध्याह्ने

तत्राप्यन्धकारस्यानुवृत्तिं सद्भावसम्भावनायुक्तिकाङ्क्षां चाभ्यूहन्त इव । न ह्यात्मैकत्वप्रतिपत्तौ समुदितायामपि, सा नोत्पन्ना भ्रान्तिर्वा इति सम्भावयितुं शक्यम् । वेदान्तवाक्यश्रवणेन जनितायां तस्यां सर्वाकाङ्क्षानिवृत्तेः । तथा चोपसंहरति प्रतिज्ञापूर्वकं भगवान् भाष्यकारः ' यथा चायमर्थः सर्वेषां वेदान्तानाम्, तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः ' इतीति ॥

**१५२. ब्रह्मजिज्ञासासूत्रेऽपि समाहतेयं प्रक्रिया** — अथ यथैषा प्रक्रिया जिज्ञासासूत्रभाष्येऽप्यनुगता तथा प्रदर्श्यते । तत्र सूत्रावतरणिकेयं भाष्यकृतः साभिप्राया —' वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम् ' इति । वेदान्तवाक्यार्थाध्यवसानार्थमेवेदं मीमांसाशास्त्रमारभ्यते । वेदान्तेषु च तावत्, ' ब्रह्मविदाप्नोति परम् ' (तै. २–१), ' स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानाति ' (छा. ८–७–१) — इत्यादिभिर्वाक्यैर्ब्रह्मात्मैकत्वविद्यातः परमपुरुषार्थप्राप्तिर्भवतीत्युपदिष्टम् । अतो ब्रह्मजिज्ञासा कर्तव्या इति सूत्रे उपन्यस्तम् । तत्रादिमसूत्रे एवाविद्याद्यनर्थनिवृत्तिरुद्दिष्टेति गम्यते यथैव प्रतिज्ञातमस्माभिरिति भाष्यकाराशयोऽवतरणिकावाक्यादस्मादवगम्यते ॥

इतश्चैवम् – ' तत्पुनर्ब्रह्म प्रसिद्धम् अप्रसिद्धं वा स्यात् ' (जि. भा. ६५) इत्यादिना ब्रह्मणः सामान्यतः प्रसिद्धिम्, विशेषतोऽप्रसिद्धिं च जिज्ञास्यत्वोपपादनायोपक्षिप्य, तत्र देहेन्द्रियमनोविज्ञानशून्यसंसारिष्वात्ममतिं लोकसिद्धां वादिविप्रतिपत्तिदर्शनव्याजेनोपप्रदर्श्य

गर्भस्य मोक्षेऽपीश्वरस्यैव तटस्थेश्वरवादिसम्मतस्य संसारिणो मोक्षानुरूपात्मकेन वेदान्तोपदिष्टस्यैव परमार्थात्मत्वेन निश्चेतव्यमन्ते सम्प्रदायपथेन भाष्यकार एतदाविष्करोति यत्सूत्रकारस्य ब्रह्मजिज्ञासोपन्यासे अयमेवाशयो यद्वेदान्तवाक्यैरध्यारोपदृष्ट्या देहादिष्वात्मबुद्धिमभ्युपगम्योत्तरोत्तरात्मोपदेशेन तदपवाद एव विवक्षित इतीति । अयमेव हि वेदान्तवाक्यविचारो नाम यत्तत्राध्यारोपितात्मभावेष्वात्मबुद्धिं क्रमक्रमेण प्रविहाय परमार्थात्मन्येवात्मत्वनिश्चयपर्यन्तानुधावनं वाक्यार्थालोचनानुकूलतर्केणेति । यथोक्तं जिज्ञासासूत्रभाष्योपसंहारे — 'एवं बहवो विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयाः सन्तः। तत्राविचार्य यत्किंचित् प्रतिपद्यमानो निःश्रेयसात् प्रतिहन्येत, अनर्थं चेयात् । तस्मात्, अथातो जिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते । (जि. १-१-१, पा. ९०) इति ॥

१५३. जन्मादिसूत्रेऽपि स्वीकृतेयं वेदान्तप्रक्रिया — यथैव विद्याविद्याश्रयत्वं तद्विषयत्वं चात्मनोऽध्यारोपदृष्ट्यैव, यथा चाविद्यावत्पुरुषाभिमानजिज्ञासुत्वजिज्ञास्यत्वभेदोऽप्यध्यारोपदृष्ट्यैव समाश्रितो वेदान्तेषु, एवमेव जगज्जन्मादिकारणत्वमध्यारोपदृष्ट्यैव ब्रह्मणो लक्षणत्वेनोपादायैव परमार्थब्रह्मात्मैकत्वमुपदिश्यते — इत्यभिप्रायेण सूत्रकारेण सूत्रं प्रणीतं ' जन्माद्यस्य यतः ' इति । तदिदमित्थं व्याख्यातं भाष्यकारेण " अस्य जगतो नामरूपाभ्यां व्याकृतस्य, अनेककर्तृभोक्तृसंयुक्तस्य, प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्य-

रचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणाद् भवति, 'तद् ब्रह्म' – इति वाक्यशेषः" (जन्म. १–१–२, पा. ८) इति ॥

अयं हि वेदान्तोपदिष्टार्थो न प्रत्यक्षादिप्रमाणैः शक्यावगमः । प्रमाणप्रमेयविभागस्यापि जगदन्तःपातित्वात् । न चेदं जगज्जन्मादि-लोकसिद्धघटादिजन्मादिसलक्षणम्, प्रतिनियतदेशकालनिमित्तापेक्ष-कारणसाध्यत्वाभावात्, कूटस्थनित्ये च ब्रह्मणि कुलालादिवत् तत्कर्तृत्वानुपपत्तेः, मृदाद्यचेतनपदार्थवत् तदुपादानत्वानुपपत्तेश्च । अथ च वेदान्तेषु 'इदं सर्वमसृजत' (तै. २–६) इति जगन्निमित्त-कारणत्वम् श्रूयते, 'तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत' (छां. ६-२-३) इत्युपादानकारणत्वं च । जगतश्च ब्रह्मकार्यत्वं मृन्मय-घटादिविकारदृष्टान्तेनैवोपपाद्यते । अतोऽवगम्यते नात्र कार्यकारणभाव उपदिदिक्षितः, किं त्वजाद्वयब्रह्मात्मतत्त्वाधिगमनोपायत्वेनैव सर्वमिद-मुपदिष्टमिति । विवक्षितं साम्यं त्वेवं विशदीकृतं श्रुत्या – 'यथा सोम्येकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छां. ६–१–४) इति दृष्टान्तः, 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छां. ६–८–४), 'स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' (छां. ६–८–७) इति च दार्ष्टान्तिकभूतं ब्रह्म । यथा दृष्टान्ते एकेन मृत्पिण्डेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृन्मयं मृदात्मकत्वाविशेषान्मृदेवेति विज्ञातं स्यात्, सर्वं मृत्तिकेत्येव तु सत्यम् – इति च, एवं कार्यभूतं जगत् सर्वमपि वाचारम्भणं

नाममात्रेणैव प्रतिरूपेण, ब्रह्मैव तु केवलं तद्वस्तुतः—इत्येव सत्यम् । ब्रह्मव्यतिरेकेण नैव सन्ति जीवाः, अचेतनरूपं जगद्वा – इति ॥

एवं च 'जन्माद्यस्य यतः' इति न जगज्जन्मादिप्रतिपादनपरं सूत्रम्, जगतोऽत्र विचार्यत्वेनाप्रकृतत्वात्, किं तर्हि ब्रह्मलक्षणप्रदर्शनपरम् । लक्षणं चात्र नाव्याप्त्यतिव्याप्त्यसंभवाख्यदोषत्रयविवर्जितः सकलेतरवस्तुव्यावर्तको धर्मविशेषः, ब्रह्मेतरवस्तुन एवाभावात् । 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां. ६-२-१) इति हि श्रुतिः । तस्मान्न लोकसिद्धं कारणत्वं लक्षणवत्त्वं वा विवक्षितं ब्रह्मण इति स्थितम् ॥

अथ किमिति जगज्जन्मादिकारणत्वाध्यारोपेणैव ब्रह्मणो लक्षणं दर्शयति श्रुतिः, न पुनस्तत्स्वरूपमेव साक्षान्निर्दिशति 'एवंरूपं ब्रह्म' इति । अशक्यनिर्देशस्वरूपत्वाद् ब्रह्मणः – इति ब्रूमः । अजमद्वयं च सदेव हि ब्रह्म व्यवहारदृष्ट्या जनियोगं प्राप्नोति, ग्राह्यग्राहकलक्षणरूपेण च प्रतीयते । तयैव च दृष्ट्या सर्वज्ञं सर्वशक्तिमदिति च व्यपदेशभाग् भवति । यथोक्तं **माण्डूक्यकारिकाभाष्ये** – 'अजमपि जनियोगं प्रापदैश्वर्ययोगादगति च गतिमत्तां प्रापदेकं ह्यनेकम्' – इति । किञ्च, 'नामरूपाभ्यां व्याकृतं जगत्, सर्वज्ञः सर्वशक्तिमान् ईश्वरश्च' इति यावदेव मायिको विभागः, तावदेव तु जिज्ञास्यजिज्ञासुविभागः; जिज्ञासुजनचित्तव्युत्पादनार्थमेव च लक्षणप्रणयनम्, प्रमाणाकाङ्क्षा च प्रमाणः, न तु ब्रह्मात्मैकत्वावगत्यवस्थायामित्यतोऽपि जगज्जन्मादिकारणत्वाध्यारोपद्वारेणैव लक्षणं प्रणीयत इति श्लिष्यते ।

अपि च व्याकृतनामरूपजगदात्मना प्रतीयमाने एव परमार्थतत्त्वे 'ब्रह्म' 'जगत्' इति च व्यपदेशद्वयभाक्त्वं भवेत् तस्य। भवति चाऽऽशङ्का,'यदि तथ्यत एवैकमेवाद्वितीयं ब्रह्म, कथमियं जगत्प्रतीतिस्तद्व्यतिरेकेण ?' – इति ; तत्रैव च परिहारो वक्तव्यः 'नास्त्येव तावद् ब्रह्मव्यतिरिक्तं जगन्नाम, 'ब्रह्मैवेदं विश्वम्' इति । तस्मात्, व्याकृतजगत्प्रतीत्यवस्थायामेव ब्रह्मलक्षणं प्रणीयते 'जन्माद्यस्य यतः' इति, जगतो ब्रह्मानन्यत्वावधारणाय । तथा हि श्रुतिर्वरुणवेषेणाऽऽह – 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति' (तै. ३–१) इति । तत्र हि ब्रह्म जिज्ञासोर्भृगोर्न जगत्कारणं विचिचारयिषितम्, किं तर्हि ब्रह्मस्वरूपमेव । 'अधीहि भगवो ब्रह्म' इति हि तेन पृच्छयते । वरुणस्तु पिता 'अन्नं प्राणम्' इत्यादिब्रह्मोपलब्धिद्वाराण्युपदिश्य ब्रह्मलक्षणं प्राह – 'यतो वा इमानि भूतानि जायन्ते ........ तद्विजिज्ञासस्व । तद्ब्रह्म' इति । एतदुक्तं भवति – 'उत्पत्तिस्थितिलयावस्थासु यदात्मतां न जहति भूतानि, तद् ब्रह्म' इति । श्रुत्यन्तरेऽपि चैवमेव ब्रह्मोपदेशो भवति – 'अन्नेन शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ । सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छां. ६–८–४) इति । तत्रापि ह्यन्नादिकार्याणां सद्ब्रह्मानन्यत्वमेवावधारितम्, न तु कार्यकारणभावः सज्जगतोः । अत एव च तत्र यथैव विकारस्य वाचारम्भणत्वमुक्त्वा दृष्टान्ते 'मृत्तिकेत्येव सत्यम्' (छां. ६–१–४) इति कारणस्य सत्यत्वमवधारितम्, तथैव दार्ष्टान्तिके ह्युद्दालक आरुणिः

प्रतिपर्यायं ' ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो ' (छा. ६-८-७, ६-९-४, ६-१०-३, ६-११-३, ६-१२-३, ६-१३-३, ६-१४-३, ६-१५-३, ६-१६-३) इति वाक्यान्यपि जगतः सदात्मत्वम्, सत एव सत्यत्वं परमार्थात्मत्वं च, जीवानां च तदैकात्म्यमित्याद्यात्मैकत्वप्रतिपत्त्यर्थतामेवोपदेशस्य दर्शयति । तदेवं सिद्धमिदं यत् ' जन्माद्यस्य यतः ' इत्येतत् सूत्रं जगतो वस्तुतो ब्रह्मव्यतिरिक्तस्यैव सतो जन्मस्थितिभङ्गं ब्रह्मणः सकाशादित्यध्यारोप्य ब्रह्मस्वरूपं निर्धारयति । निर्धारिते तु तस्मिन् सकलकार्यकारणभाव-वर्जितमेव निर्विशेषचिन्मात्रं ब्रह्म–इत्यपवाददृष्ट्या निगमयति – इति । सूत्रकारोऽपि ' आह च तन्मात्रम् ' (३-२-१६), 'दर्शयति चाथो अपि स्मर्यते ' (३-२-१७) इत्याह । संप्रदायविदां वचनं च भवति– ' उपलम्भात् समाचारादस्तिवस्तुत्ववादिनाम् । जातिस्तु देशिता बुद्धैरजातेस्त्रसतां सदा ॥ ' (गौ. का. ४-४२) इति, ' मृल्लोह-विस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा । उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥ ' (गौ. ३-१५) इति च ॥

१५४. **कार्यस्य जगतोऽनिर्वचनीयत्वं प्रतीत्या, कारणानन्यत्वं तु वस्तुतः** – यदपि कार्यस्य जगतः कारणब्रह्मानन्यत्वं सूत्रयिष्यति ' तदनन्यत्वमारम्भणशब्दादिभ्यः ' (२-१-१४) इति, तदपि न कार्यस्य वस्तुतोऽनन्यत्वमभिप्रेत्य, कथं तर्हि, नामरूपात्मकस्य जगतो ब्रह्मणि विकल्पितस्य प्रतीत्यवस्थायां जलफेनवदनिर्वचनीयत्वं परमार्थदृशा च ब्रह्मव्यतिरेकेणाभावः – इत्यावेदयितुम् । तथा हि

**भाष्यवचनम्** ' सर्वज्ञस्येश्वरस्याऽऽत्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य 'माया', 'शक्तिः', 'प्रकृतिः' – इति च श्रुतिस्मृत्योरभिलप्येते (२–१–१४, पा. २०१), ' यथा घटकरकाद्याकाशानां महाकाशादनन्यत्वम्, यथा च मृगतृष्णिकोदकादीनाम् ऊषरादिभ्योऽनन्यत्वम्, दृष्टनष्टस्वरूपत्वात्, स्वरूपेणानुपाख्यत्वात्, एवमस्य भोग्यभोक्त्रादिप्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभावः –इति द्रष्टव्यम् । ' (२–१–१४, पा. १९७) इति, 'तस्मात्, क्षीरादीन्येव द्रव्याणि दध्यादिभावेनावतिष्ठमानानि कार्याख्यां लभन्ते इति न कारणादन्यत् कार्यं वर्षशतेनापि शक्यं निश्चेतुम् । तथा मूलकारणमेव आ अन्त्यात् कार्यात् तेन तेन कार्याकारेण नटवत् सर्वव्यवहारास्पदत्वं प्रतिपद्यते ' (२–१–१८, पा. २१७) इति च ॥

तस्मात्, जगज्जन्मादिकारणत्वसूत्रणमध्यारोपदृष्ट्या, ब्रह्मस्वरूपसमर्पणमेव तु तत्र यतःशब्देन – इति सर्वमवदातम् ॥

**१५५. शास्त्रयोनित्वाधिकरणेऽपीयं प्रक्रिया स्वीकृता –** एतेन शास्त्रयोनित्वाधिकरणमपि व्याख्यातम् । यथैव नामरूपाभ्यां व्याकृतस्य जगतो जन्मादिकारणं ब्रह्म – इति सूत्रणं जगतो ब्रह्मानन्यत्वविवक्षयैव, न तु कार्यकारणभावस्य तथ्यतामप्यभिप्रेत्य, तथैव जगदन्तःपातिनामप्रपञ्चैकदेशभूतस्य ऋग्वेदादिशास्त्रस्यापि सर्वज्ञकल्पितस्य ब्रह्मकार्यत्वमुच्यमानं न तस्य कार्यत्वविवक्षया, किं तर्हि सर्वज्ञब्रह्मानन्यत्वविवक्षयैवेति स्फुटम् ॥

यद्यपि कृत्स्नजगत्कारणत्वोपन्यासेनैव नामधेयप्रपञ्चस्यापि कारणत्वमुक्तकल्पमेव भवति, तथापि ग्राह्यरूपधेयापेक्षया ग्राहक-नामधेयस्य स्वविषयप्रकाशकत्वलक्षणातिशयदर्शनात् नामधेयजगद्विशेष-रूपस्य ऋग्वेदादिशास्त्रस्य ब्रह्मकारणत्ववर्णनं ब्रह्मणः सर्वज्ञत्वं विशेषे-णोपपादयतीति पृथक् शास्त्रयोनित्ववचनमर्थवत् । नामप्रपञ्चान्तर्गता हि शब्दाः स्वस्वविषयभूतानां भावानां स्वरूपस्थितिगुणकर्मादिवर्णनेन स्वात्मभूतस्य ब्रह्मणोऽपि ज्ञानशक्तिप्रभावं व्यञ्जन्ति । यद्यपि रूपात्मक-प्रपञ्चस्यापि प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य महतामपि सिद्धपुरुषाणामचिन्त्यरचनारूपस्य स्रष्टृत्वं ब्रह्मणः सर्वज्ञत्वम् उपपाद-यत्येव ; तथापि तु महत ऋग्वेदादिलक्षणस्य वेदस्य सर्वज्ञानाकरस्य पुरुषनिःश्वासवदप्रयत्नेन यत् प्रकटीकरणम्, तन्महाशास्त्रनिबद्धृणामपि ऋषीणां विस्मापकं निरतिशयं सार्वज्ञ्यं गमयतीत्यप्रत्याख्येयम् । तादृशस्यैव शास्त्रस्य स्वरूपस्थितिविषयप्रकाशनसामर्थ्यादिहेतुभूतं तदभिव्यक्तिस्थित्यदर्शनावस्थासु नित्यदैव तदात्मभूतं ब्रह्म सर्वज्ञान-शक्तिसंपन्नमित्यवगम्यत इत्यतोऽपि शास्त्रयोनित्वसूत्रणं जगत्सामान्य-जन्मादिकारणत्ववचनोपक्षिप्तं सर्वज्ञत्वं सुदृढीकरोति ॥

तदिदमपि शास्त्रयोनित्वं ब्रह्मणः सर्वज्ञतायाः सर्वशक्तिमत्तायाश्च प्रतिपत्त्युपायत्वेनैव सूत्रितं शास्त्रब्रह्मणोर्यत्किञ्चित्कार्यकारणसंबन्धा-ध्यारोपणेनेत्येतत् स्पष्टमेव । ब्रह्मैव हि वास्तवेन वृत्तेन वेदो नाम । तदनुग्रहेणैव च महर्षयोऽपि वेदविदस्त्रिकालज्ञाश्च भवन्तीति स्मर्यते – ' न मे विदुः सुरगणाः प्रभवं न महर्षयः । अहमादिर्हि देवानां

महर्षीणां च सर्वशः ॥ (गी. १०-२) इति । अवगते तु ब्रह्मस्वरूपे न सन्त्येव वेदा अपि प्रतीतेन रूपेण ब्रह्मव्यतिरिक्ता इत्यवसीयते । '(अत्र) ........ वेदा अवेदाः ' (बृ. ४-३-२२) इति श्रुतेः-इति सर्वमवदातम् ॥

१५६. वेदान्तवाक्यसमन्वयोऽप्यध्यारोपदृष्ट्यैव, वेदान्तशास्त्रप्रामाण्यवाचोयुक्तिरपि तथैव – 'वेदान्तवाक्यानां ब्रह्मणि समन्वयात् वेदान्तशास्त्रमेव तत्र प्रमाणम् ' इत्युक्तिरप्येतामेव प्रक्रियामवलम्ब्यैवेति दर्शितं प्राक् । सर्वशब्दप्रवृत्तिनिमित्तरहितेऽपि हि पदार्थत्वं वाक्यार्थत्वं चाध्यारोप्यैव तत्र वेदान्तानां ब्रह्मणि समन्वयप्रदर्शनम् । एवं प्रमाणप्रमेयव्यवहारातीतेऽपि, प्रमेयतामध्यारोप्यैव हि वेदान्तशास्त्रस्य तत्र प्रमाणत्ववाचोयुक्तिः । अपवाददृष्ट्या तु 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह'(तै.२-९) इत्येवावाक्यार्थता अप्रमेयता च ब्रह्मणः – इति वास्तविकी स्थितिः । अत एव हि ' अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्ति ' (बृ. २-३-६) इति प्रपञ्चप्रतिषेधरूपात् आदेशनात् अन्यत् परमादेशनं ब्रह्मणो नास्त्येवेत्याह श्रुतिः । आहुश्चाभियुक्ताः – ' स एष नेतिनेतीति व्याख्यातं निह्नुते यतः । सर्वमग्राह्यभावेन हेतुनाजं प्रकाशते ॥ ' (गौ. का. ३-२६) इति । तत्रायं कारिकाभिप्रायः – आत्मनो वाङ्मनसागोचरत्वेन दुर्विज्ञेयत्वं मन्यमाना श्रुतिः तस्यैवाऽऽत्मनः प्रकारान्तरेण प्रतिपिपादयिषया यद्यद् व्याख्यातं तत्सर्वं निह्नुते । उपायस्योपेयनिष्ठतामजानन् उपायस्याप्युपेयवत् सत्यत्वमेव मा गृह्णीयात्

[illegible]: 'नेति नेत्यात्मा' इत्यनेन वाक्येन । तथा ह्यपोदितसर्वाध्यारोपम् ब्रह्मात्मतत्त्वं स्वयं प्रकाशेत — इतीति ॥

१५७. **प्रक्रियासतत्त्वविचारोपसंहारः** — तदेवं नित्य-निरस्तसर्वविशेषस्य कूटस्थनित्यावगतिरूपस्य स्वात्मभूतस्यापि परमार्थ-तत्त्वस्य स्वरूपं निश्चित्य निर्धारयितुमसमर्थानां तत्त्वजिज्ञासूनामर्थाय ब्रह्मात्मन्यविद्याश्रयत्वविषयत्वविभागम्, जिज्ञास्यत्वजिज्ञासुत्वविभागम्, कार्यकारणविभागम्, प्रमाणप्रमेयविभागं चाध्यारोप्य प्रवृत्ता वेदान्ता व्युत्पादनावसाने यद्यदध्यारोपितम् उपदेशोपायत्वेन, तत्सर्वमप्यपोद्य नित्यशुद्धबुद्धमुक्तस्वभावे ब्रह्मात्मस्वरूपे एव प्रतिष्ठापयन्ति जिज्ञासून् । तस्मान्नाध्यारोपापवादप्रक्रियां मुक्त्वा नान्योऽस्ति तत्त्वविज्ञापनप्रकारः — इति भगवता भाष्यकारेण चतुःसूत्रीव्याख्यानव्याजेनादर्शि ॥

तस्मात्, सर्वप्रत्ययाविषयत्वात्, सर्वशब्दप्रवृत्तिनिमित्तरहितत्वाच्च ब्रह्मात्मवस्तुनः, तत्स्वरूपनिरूपणपराणाम्, विज्ञानात्मपरमात्मैकत्वोप-देशपराणां च वाक्यानां अज्ञानोत्थसर्वविकल्पनिषेधेनैव चारितार्थ्य-मित्यवगम्यते । न चाध्यारोपितनिषेधे निषेध्याभावस्य, तद्भिन्नस्य, तद्विरुद्धस्य वा अवशेषो ब्रह्मणि शक्यशङ्कः । निषेध्यस्य निषेधानां च व्यावहारिकावस्थायामेवलब्धस्थितिकत्वात्, परमार्थसंस्पर्शासंभवात् । न च लौकिकानां स्वात्मनि संसारित्वविभावनादशायाम्, शास्त्राचार्योप-देशेन स्वात्मयाथात्म्यप्रबोधदशायां वा वस्तुनः कश्चन विशेषः स्यादिति कल्पयितुं शक्यम् । यथाह भाष्यकारः 'तत्रैवं सति यत्र यदध्यासः, तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न संबध्यते' (सु.४, पा.३७)

इति । " यावद्धयविद्या न निवर्तते तावद् धर्मादिगोचरत्वं जीवस्य जीवत्वं च न निवर्तते ; तन्निवृत्तौ तु प्राज्ञ एव 'तत्त्वमसि' इति श्रुत्या प्रत्याय्यते । न चाविद्यावत्त्वे तदपगमे च वस्तुनः कश्चिद् विशेषोऽस्ति " (१-४-६, पा. १५४) इति च ॥

सेयं प्रक्रिया यद्यपि जिज्ञासाधिकरणभाष्यार्थतत्त्वविवेचन्यां जन्माद्यधिकरणभाष्यार्थतत्त्वविवेचन्यां च सङ्क्षेपतो विमर्शितैव, तत्फलं च तत्र तत्र निर्दिष्टमेव च, तथापि वेदान्तशास्त्रस्य शास्त्रत्वम्, अन्त्यप्रमाणत्वं च नैव तावत् सुविशदीकृतं भवेद् यावदियं समग्रतया न चिन्तिता स्यात् – इति मन्वानैः पुनरुक्तिभयमपि संपरित्यज्य विस्तरेण परिशीलितात्र । कृत्स्नस्य वेदान्तशास्त्रस्यात्मैकत्वप्रतिपादनपरत्वं यावन्नोपपाद्यते, तावन्नैव शाङ्करप्रस्थानस्यासाधारणा विशेषा जिज्ञासूनां हृदयमागच्छेयुरिति हेतोरपि शारीरकमीमांसायां सर्वत्र यथेयं प्रक्रिया प्राधान्येनाश्रिता तथा विवेचितं च यथाशक्ति प्रकृताधिकरणे इति क्षन्तव्यमिदं धाष्ट्र्यं स्वतन्त्रप्रज्ञैः सुधीभिरिति शम् ॥

## ५. श्रवणादीनां स्वरूपकृत्यादिगता चिन्ता

१५८. **वृत्तिकारमतम्** – ' यद्यपि शास्त्रप्रमाणकं ब्रह्म, तथापि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते ' इति स्वमतोपस्थापनाय प्रवृत्तो वृत्तिकारः प्रतिपत्तिशब्देन किं विवक्षति ? – इति शङ्कायां ' सति च विधिपरत्वे, यथा स्वर्गादिकामस्याग्निहोत्रादिसाधनं विधीयते, एवम् अमृतत्वकामस्य ब्रह्मज्ञानं विधीयत इति युक्तम् '

इत्यनुवदन् प्रतिपत्तिज्ञानशब्दौ पर्यायत्वेन प्रयुङ्क्ते – इत्यतो ज्ञानं विधेयमभिप्रेतं नान्यदिति गम्यते । परेण च ' नन्विह जिज्ञास्यवैलक्षण्यमुक्तम्, कर्मकाण्डे भव्यो धर्मो जिज्ञास्यः, इह तु भूतं नित्यनिर्वृत्तं ब्रह्म जिज्ञास्यम् इति ; तत्र कर्मज्ञानफलादनुष्ठानापेक्षाद् विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति ' इति चोद्ये समानीते " नार्हत्येवं भवितुम्, कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात् । ' आत्मा वा अरे द्रष्टव्यः ' .... इत्यादिविधानेषु सत्सु ' कोऽसौ आत्मा ? ', ' किं तद् ब्रह्म ? ' इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः " इति प्रत्याख्यानाद् दर्शनादयः कार्यत्वेनैवाभिप्रेतास्तस्य–इत्युन्नीयते ॥

तत्रेदं चिन्त्यम् – किं दर्शनवच्छ्रवणादीन्यपि तथ्यत एव विहितानीति मन्यते वृत्तिकारः, किं वा तेन विधित्सितत्वेन विवक्षितं कार्यं तद्व्यतिरिक्तं यत्किञ्चिदन्यदेवेति ? भगवत्पादप्रस्थाने च दर्शनश्रवणादीनां सतत्त्वं कीदृशम् ? – इति ॥

१५०. पञ्चपादिकाकारमतम् – तत्र पञ्चपादिकायां तावदेवं विवृतमुपलभ्यते –

" यः पुनः ' तस्मात्, प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यम् ' इति भाष्ये पूर्वपक्षोपसंहारः, तत्र प्रतिपत्तिशब्दः सर्व एव मनोव्यापारः प्रमाणात्मक इतरो वा ब्रह्मसंस्पर्शित्वेन विधेयः कैश्चित् कर्माङ्गं कल्पितः, तस्य सर्वस्य संग्रहार्थो द्रष्टव्यः (पा. १०५०) इति । "

इति ॥

अत्र प्रतिपत्तिविधिवादोपलक्षितास्त्विमे पक्षाः –(१) शब्दजन्यं ज्ञानं विधीयते (पा. १०५१); (२) शब्दजन्यस्यैव ज्ञानस्याभ्यासो

विधीयते (पा. १०५१); (३) साक्षात्करणाय ज्ञानसन्तानविधिः (पा. १०५२); (४) शाब्दज्ञानाभ्यासजाज्ज्ञानान्तरात्साक्षात्कारो भविष्यति (पा. १०५२); (५) शब्दात् प्रतिपन्नस्य यथाप्रतिपत्ति ध्यानं नाम मनोव्यापारो विधीयते (पा. १०५३); 'द्रष्टव्य' इति दर्शनमनूद्य 'निदिध्यासितव्यः' इति ध्यानं दर्शनफलं विधीयत इति (पा.१०५४); (६) शाब्दज्ञानादन्यदेव ज्ञानान्तरमलौकिकं वेदान्तेषु कर्तव्यत्वेन विधीयते (पा. १०५५); (७) 'अथ यदतः परो दिवो ज्योतिः' इति प्रपञ्चातिरिक्तब्रह्माभ्युपगमे देवताविग्रहवत्त्वन्यायसंभवात् मोक्षकामस्य ब्रह्मोपासनं विधीयते (पा. १०६३) – इति ॥

अत्र सप्तमपक्ष एव भाष्यपरामृष्ट इत्युन्नीयते 'तदुपासनाच्च, शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यति' इति तन्मतव्याख्यानानुरूप्यदर्शनात् । एतदनन्तरमेव च भाष्यकारसिद्धान्तोपपादनोपक्रमदर्शनाच्च । अत्र च दर्शनादीनि ब्रह्मोपासनशब्देनैव संगृहीतानीत्यतो वृत्तिकारमते दर्शनश्रवणमनननिदिध्यासनानि विहितत्वेन विवक्षितानीत्यनुमीयते । टीकाकारस्तु न स्पष्टमुल्लिख्य किञ्चिदपि परामृशति स्मेति ॥

ब्रह्मजिज्ञासारम्भणसमर्थनाय अन्यथान्यथा उपपत्तिं प्रदर्शयन्तोऽपि **वृत्तिकाराः केचित् परामृष्टाः पञ्चपादिकायाम्** – (१) कर्माभिधायिनो कृत्यप्रत्ययान्नियोगसंप्रत्ययात्, नियोक्तृत्वं न निराकर्तुं शक्यते । द्रव्यपरत्वेऽपि शास्त्रस्य समस्त्येव प्रयोजनम् अविद्योच्छेदः (पा. ५४०); (२) इहापि सर्वेष्वेवात्मज्ञानविधानेषु कार्यनिष्ठतां वर्णयन्ति समाम्; तत्त्वावबोधश्च कार्यम् अधिकारनियोगविषयतया अवगमात् (पा. ५४०); (३) सर्वस्यात्मभावता

विधीयते ; अनात्मस्वरूपविलयेन हि वस्तुनोऽवगतिर्दृष्टा (पा. ५४५, ५४६) ; (४) ज्ञानाभ्यासो विधीयते साक्षात्करणाय (पा. ५५७) ; (५) ज्ञानाभ्यासः शास्त्रश्रवणादौ साक्षात्करणे हेतुः (पा. ५६०) ; (नहि विधिरेव मास्तु स्वयं प्रवर्तते—इति टीकाकारेणायं पक्षो निरस्तः) — इति ॥

एते सर्वेऽपि नियोगवादिन एव वृत्तिकाराः ; परं तु ते भगवत्पादोदाहृतवृत्तिकारवन्नादृष्टफलकनियोगवादिन इति विशेषः ॥

१६०. भामतीकारमतम् — वाचस्पतिमिश्रस्तु "अज्ञातसङ्गतित्वेन शास्त्रत्वेनार्थवत्तया । मननादिप्रतीत्या च कार्यार्थाद् ब्रह्मनिश्चयः ॥" (वा.भा. पा. १०८) इतिश्लोकेन वृत्तिकारमतं संजग्राह । तद्विवरणावसरे च 'न खलु वेदान्ता सिद्धब्रह्मरूपपरा भवितुमर्हन्ति । तत्राविदितसङ्गतित्वात्' इत्यादि यल्लिखितं तेन, तत्र भाष्येण सारूप्यं न दृश्यते । न हि लौकिकशब्दप्रयोगमाश्रित्यैव सङ्गतिग्रहोऽभ्युपगन्तव्यः इति युक्तिं क्वचिदपि समानीतवान् भाष्यकारः ; 'प्रवृत्तिनिवृत्तिप्रयोजनत्वाच्छास्त्रस्य' इत्येतावत्तु वृत्तिकारमतत्वेनोपस्थाप्य "कर्तव्यविध्यननुप्रवेशे वस्तुमात्रकथने हानोपादानासंभवात् 'सप्तद्वीपा वसुमती', 'राजाऽसौ गच्छति' — इत्यादिवाक्यवत् वेदान्तवाक्यानामानर्थक्यमेव स्यात" (खं.३, पा. १०२-१०३) इति सिद्धान्तिपक्षेऽनिष्टापादनं वृत्तिकारमुखेन कृतवान् । किञ्च, 'अज्ञातसङ्गतित्वेन' इति पूर्वपक्षं प्रकल्प्य 'तत्र तावदेवमकार्येऽर्थे न सङ्गतिग्रहः ; यदि तत्परः प्रयोगो न लोके दृश्येत, तत्प्रत्ययो वा व्युत्पन्नस्योन्नेतुं न शक्येत'(वा.भा. पा. १११) इति समाधानप्रयासो नैव वृत्तिकारमतसमालोचनेन सङ्गतः,

यतः प्रवृत्तिनिवृत्तिपरत्वं शास्त्रस्यातिष्ठमानो वृत्तिकारः लौकिकप्रयोगप्रदर्शनेनैव न समाहितो भवेत्, न च सर्वशब्दप्रवृत्तिनिमित्तरहिते ब्रह्मणि शब्दसङ्गतिः साधिता भवेत् ॥

" 'आत्मा वा अरे द्रष्टव्यः ........' इत्यादिविधानेषु सत्सु 'कोऽसावात्मा? ........' इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः........तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यति " इतिवृत्तिकारमतमेवं व्याख्यातं भामत्याम् –

" अत्र चात्मदर्शनं न विधेयम् । तद्धि श्रोत्रोपलब्धिवचनत्वात् श्रावणं वा स्यात्, प्रत्यक्षं वा । प्रत्यक्षमपि लौकिकमहंप्रत्ययो वा, भावनाप्रकर्षपर्यन्तजं वा । तत्र श्रावणं न विधेयम्, स्वाध्यायविधिनैवास्य प्रापितत्वात्, कर्मश्रावणवत् । नापि लौकिकं प्रत्यक्षम्, तस्य नैसर्गिकत्वात् । न चौपनिषदात्मविषयं भावनाधेयवैशद्यं विधेयम्, तस्योपासनाविधानादेव वाजिनवदनुनिष्पादितत्वात् । तस्मात्, औपनिषदात्मोपासना अमृतत्वकामं नियोज्यं प्रति विधीयते । 'द्रष्टव्यः' इत्यादयस्तु विधिसरूपा न विधयः इति । तदिदमुक्तं–तदुपासनाच्चेति "
भा. पा. ११२–११३.

इति ॥

तत्र 'द्रष्टव्य' इत्यादयो विधिसरूपा न विधय इति कथं कुतस्त्याद् वचनादवगतमिति न ज्ञायते । ननु वृत्तिकारः कण्ठरवेण ब्रूते 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि विधानानीति, विहितोपासनाविषयस्वरूपसमर्पणाय सर्वे वेदान्ता उपयुक्ताः–इति च । इतश्च दर्शनश्रवणादीनां विहितत्वमेव मनुते वृत्तिकार इति गम्यते । यत्कारणं 'तद्विषये लिङादयः श्रूयमाणा अप्यनियोज्यविषयत्वात् कुण्ठीभवन्ति, उपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत्' इति सिद्धान्तिनोक्तमसहमानो

वृत्तिकारोऽयमाक्षिपति " किमर्थानि तर्हि ' आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादीनि विधिच्छायानि वचनानि ? " (पा. १७८) इति। तस्मात्, न साध्विदमध्यवसीयते यद् वृत्तिकारमते 'द्रष्टव्यः' इत्यादीनि विधिसरूपाणीति ॥

यदप्यनुवर्णितं भामत्यां सिद्धान्त्याशयत्वेन –

" एतदुक्तं भवति–त्वयाऽप्युपासनाविधिपरत्वं वेदान्तानामभ्युपगच्छता नित्यशुद्धबुद्धत्वादिरूपब्रह्मात्मता जीवस्य स्वाभाविकी वेदान्तगम्या आस्थीयते। सा चोपासनाविषयस्य विधेर्न फलम्। नित्यत्वात्, अकार्यत्वात्, नाप्यनाद्यविद्यापिधानापनयः। तस्य स्वविरोधिविद्योदयादेव भावात्। नापि विद्योदयः, तस्यापि श्रवणमननपूर्वकोपासनाजनितसंस्कारसचिवादेव चेतसो भावात्। उपासनासंस्कारवदुपासनाऽपूर्वमपि चेतःसहकारि–इति चेत्, दृष्टं च खलु नैयोगिकं फलमैहिकमपि, यथा चित्रकारीर्यादिनियोगानामनियतनियतफलानाम् "

पा. ११४.

इति, तदप्यसुन्दरं भाति नः। किं कारणम् ? एवं हि ब्रूते वृत्तिकारः– " इत्यादिविधानेषु सत्सु कोऽसावात्मा ? किं तद्ब्रह्म ? – इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः 'नित्यः', 'सर्वज्ञः', 'सर्वगतः', 'नित्यतृप्तः', 'नित्यशुद्धबुद्धमुक्तस्वभावः', 'विज्ञानमानन्दं ब्रह्म'–इत्येवमादयः। तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यति " इति; न पुनः ' नित्यशुद्धबुद्धमुक्तत्यादिरूपब्रह्मात्मता जीवस्य स्वाभाविकी ' इति। को ह्यनुन्मत्तो ब्रूयात् स्वाभाविकी मुक्तिः, शास्त्रदृष्टा अदृष्टा चोपासनात्फलतीति च ? तस्मात्, भामत्यामनूदितं वृत्तिकारमतं न वास्तविकमित्यस्मन्मतिः ॥

१६१. विवरणप्रस्थानरीत्या वृत्तिकारमतम् – अथ पञ्चपादिकाविवरणकारमतानुवादः परीक्षणीयः । तत्र भामत्यनुसारेणैव वृत्तिकारमतमवतारितम् –

" लोके पदानां योग्येतरसंसृष्टस्वार्थप्रतिपादने सामर्थ्यमङ्गीकृत्य भूतेऽप्यर्थे प्रामाण्योपगमेन लौकिकवचसां भूतेऽर्थे प्रमाणान्तरानुसारेण प्रयोजनपर्यन्तं प्रामाण्यमङ्गीकृत्य वेदवचसां तु प्रमाणान्तराभावात् विध्यनुसारेणैव प्रयोजनपर्यन्तं प्रामाण्यं वक्तव्यम् इत्याशङ्क्य नेति प्रतिपादितम् । इदानीं कार्यसंसृष्टस्वार्थे शब्दसामर्थ्यमिति मन्वानाः कार्यशेषतयैव भूतेऽप्यर्थे प्रामाण्यमिति प्रत्यवतिष्ठन्ते इत्याह – 'अत्रापरे प्रत्यवतिष्ठन्ते' इति ॥ " पं.वि. पा. १०४३–१०४४.

इति । इयं च सर्वेषां नियोगवादप्रकाराणां प्रदर्शनाय पातनिका । ते च प्रकाराः पञ्चपादिकोदाहृताः परिगणिता अधस्तात् । तेषु च चरम एव भाष्योदितवृत्तिकारपक्ष इत्यभ्यूहितोऽस्माभिः । तस्य चेत्थमवतारिका विवरणकाराणाम् "इदानीं जीवब्रह्मणोर्भेदमङ्गीकृत्य ब्रह्मणश्च प्रदेशान्तरवर्तित्वं सर्वगतत्वं चाभ्युपगम्य 'अहं ब्रह्मास्मि' इत्यारोपितरूपेण विधीयमानादुपासनाद् यागादिव स्वर्गो मोक्षः फलिष्यति' इति ये मन्यन्ते तन्निरासायोत्तरं भाष्यमित्याह .... " (पं. वि. १०६२–१०६३) इति । इदं तावदनुरूपमेव वर्णनं वृत्तिकारमतस्येति स्पष्टम् । 'कार्यसंसृष्टे स्वार्थे शब्दसामर्थ्यम्' इति तु भामत्यामिव विवरणेऽप्यधिकावाप एव ; भाष्ये शब्दशक्तिनिरूपणादर्शनात् इति न पृथग्वक्तव्यमस्ति ॥

१९२. श्रवणादीनां स्वरूपं कृत्यं च – " 'आत्मा वा अरे द्रष्टव्यः' इत्यादिषु विधानेषु सत्सु " इत्यादिवृत्तिकारवचनात्, दर्शनश्रवणादीनां विधेयत्वमेवाभिप्रेतं स आचार्य इत्यवगम्यत इत्यवोचामाचार्यो नियोगवादिनस्तत्स्वरूपनिरूपणप्रसङ्गेन । अन्यथा हि दर्शनलक्षणान्तःकरणवैशद्यानिष्पत्तेः, निष्पन्नवैशद्यान्तःकरणायत्तत्वाच्च तन्मते मोक्षप्राप्तेरिति । अथ भाष्यकारमते यद्यपि श्रवणादयो न साक्षाद् विधीयन्ते – इत्येव युक्तं कल्पयितुम्, " किमर्थानि तर्हि 'आत्मा वा अरे द्रष्टव्यः श्रोतव्य' इत्यादीनि विधिच्छायानि वचनानि ? " (पा. १७८) इति नियोगवादिमुखेन शङ्कामुत्थाप्य प्रतिवचनोपलम्भात्, तथापि 'समाध्यभावाच्च' (ब्र. सू. २–३–३९) इति सूत्रार्थव्याख्यानावसरे " सोऽयमौपनिषदात्मप्रतिपत्तिप्रयोजनः समाधिरुपदिष्टो वेदान्तेषु 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः', 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः', 'ओमित्येवं ध्यायथ आत्मानम्' इत्येवंलक्षणः, सोऽप्यसत्यात्मनः कर्तृत्वे नोपपद्येत " (सू. भा. २–३–३९, पा. ३९१–३९२) इत्युक्तेर्गम्यते, यत् कर्तव्यतयैव श्रवणादीन्युपदिशतीति मन्यते आचार्य इति । आवृत्त्यधिकरणे च " 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः .....' इति चैवमादिषु संशयः ; किं सकृत् प्रत्ययः कर्तव्यः, आहोस्विदावृत्त्या ?– इति । किं तावत् प्राप्तम् ? सकृत्प्रत्ययः स्यात्, प्रयाजादिवत् ; तावता शास्त्रस्य कृतार्थत्वात् । अश्रूयमाणायां ह्यावृत्तौ क्रियमाणायाम् अशास्त्रार्थः कृतो भवेत् " (सू. भा. ४–१–१) इत्युपक्षिपन् कर्तव्यतयैव श्रवणादीनि शास्त्रेणोपदिश्यन्त इत्येव मन्यते भगवानिति

प्रतीयते । इतश्च 'ननूक्तं यावच्छन्दमेवावर्तनेनाधिकमिति' – इति पूर्वपक्षमनूद्य प्रतिवक्ति 'न, दर्शनपर्यवसानत्वादेषाम् । दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवन्ति । यथा अवघातादीनि तण्डुलादिनिष्पत्तिपर्यवसानानि, तद्वत् ।' इति । अनेन अवघातादिवद् यावद्दर्शनलक्षणफलनिष्पत्तिस्तावत् कर्तव्यान्येव श्रवणादीनीत्यभिप्रैतीति गम्यते ॥

समन्वयाधिकरणे 'विधिच्छायानि' इति विशेषणादानान्न साक्षाद्विधिलक्षणान्येवैतानीति मन्यते इत्यपि भाति । तत्र तु प्रकरणाद् वाक्यशेषाच्च ज्ञानस्यैव वस्तुतन्त्रस्य नियोगानर्हत्वमुच्यत इत्यवगम्यते । "अमृतत्वकामस्य साधनत्वेन ब्रह्मज्ञानं विधीयते' इति वृत्तिकारपक्षप्रत्याख्यानाय हीदं प्रकरणमुत्थितं 'तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम्' इति ज्ञानस्य ध्यानाद् वैलक्षण्यं द्योतयितुम् । वाक्यशेषे खल्वपि "तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसङ्घातप्रवृत्तिगोचराद् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि । तस्यात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चाऽऽत्मतत्त्वमुपदिश्यते 'इदं सर्वं यदयमात्मा --------' इत्यादिभिः" इत्युक्तेर्गम्यते बाह्यविषयाद् विमुखीकरणार्थानीमानि श्रोतव्यादिवचनानि प्रत्यक्प्रवणतामुत्पाद्य तावतैव कृतार्थानि भवन्ति ; प्रत्यङ्मुखीकरणायैव तु श्रवणाद्युपदेशोऽर्थवानिति ; आत्मज्ञानोन्मुख्याधानमात्रेण त्वेतेषां विधिच्छायत्ववाचोयुक्तिरिति च ॥

तदेवं श्रवणादिक्रियाणाम् आवृत्त्यावश्यकतावधारणात्, दर्शन-श्रवणादिज्ञानानां विधेयत्वनिराकरणाच्चावगम्यते श्रवणादिज्ञाने मानसिको यत्नोऽवश्यकर्तव्यतया उपदिश्यते शास्त्रेणाऽऽत्मतत्त्वजिज्ञासुभ्यः, न तु तावता श्रवणादिविधिप्रयुक्त्यैव जिज्ञासायां प्रवृत्तिर्मुमुक्षूणामिति अमितव्य-मित्येवाऽऽचार्याशय इति। युक्तं चैतत्। न हि भृगुमैत्रेय्यादयः शास्त्रविधिप्रयुक्तास्तत्त्वजिज्ञासायां प्रवृत्ताः, किं तर्हि स्वयमेव ब्रह्मज्ञाना-मृतत्वप्राप्तीच्छया गुरुमुपसन्नाः 'अधीहि भगवो ब्रह्म' (तै.), 'येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान् वेद तदेव मे ब्रूहि' (बृ.) इति। एवं बुभुत्सुभ्यस्तूपायमूचुर्वरुणयाज्ञवल्क्यादयः 'तपसा ब्रह्म विजिज्ञासस्व' (तै.), 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.) इत्यादिवाचोयुक्त्या – इति। तस्मात्, भाष्यकारप्रस्थाने दर्शनश्रवणादीनि न विधीयन्ते मुमुक्षून् प्रति, किं तु परमपुरुषार्थवाञ्छिनां तेषां तदुपायः प्रदर्श्यते शास्त्रेण। तत्रापि दर्शनश्रवणादिज्ञानं न कर्तव्यतया उपदिश्यते, किं तर्हि ज्ञानप्राप्त्यर्थं सावधानतायै। वाक्यश्रवणादौ कृतावधानानां त्वधिकारिणां स्वयमेवो-त्पद्यते ज्ञानम्, आत्मवस्तुतन्त्रत्वाज्ज्ञानस्य। तथा हि भगवत आचार्यस्य वचनम् "तम् आत्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविक-कार्यकरणसङ्घातप्रवृत्तिगोचराद् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्त-यन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि" (पा. १७८), इति, "द्रष्टव्यादिशब्दा अपि परविद्याधिकारपठितास्तत्त्वाभिमुखीकरण-प्रधानाः, न तत्त्वावबोधविधिप्रधाना भवन्ति। लोकेऽपि 'इदं पश्य',

38

'इदमाकर्णय' इति चैवञ्जातीयकेषु निर्देशेषु 'प्रणिधानमात्रं कुरु' इत्युच्यते, न 'साक्षाज्ज्ञानमेव कुरु' इति। ज्ञेयाभिमुखस्यापि ज्ञानं कदाचिज्जायते कदाचिन्न जायते। तस्मात् तं प्रति ज्ञानविषय एव दर्शयितव्यो ज्ञापयितुकामेन। तस्मिन् दर्शिते स्वयमेव यथाविषयं यथाप्रमाणं च ज्ञानमुत्पद्यते" (सू. भा. ३-२-२१, पा. ३६२, ३६३) इति च॥

**१६३. श्रवणादिविषये पञ्चपादिकाभिप्रायः** — अत्र व्याख्यानप्रस्थानीया बहुधा विप्रतिपन्नाः। तत्र पञ्चपादिकाकारस्तावदेवमाह —

> "अतः श्रूयमाणा अपि विधयः केवलप्रमाणवस्तुपरतन्त्रे ज्ञाने अकिञ्चित्करत्वात् कुण्ठीभवन्ति। अतो अर्थवादतयैवाऽऽत्मज्ञानस्तावकत्वेन तदुन्मुखीकरणात् सामर्थ्यसिद्धबहिर्मुखतानिरोधाच्च विधिकार्यलेशस्य विद्यमानत्वाद् विधय इव लक्ष्यन्ते" (पं. पा. ११६७)

इति। अत्र 'विधय इव लक्ष्यन्त' इति भाष्यानुरूपमेव, न तु 'अर्थवादतयैवात्मज्ञानस्तावकत्वेन' इत्यवधारणे निर्भरः। न हि केवलं स्तुत्यर्थत्वेनोपन्यस्तानि श्रवणादीनि, किं तु वाक्यार्थप्रतिपत्त्युपायत्वेनापि। वेदान्तवाक्यस्थपदार्थप्रतिपत्तिप्रतिबन्धनिरासाय हि श्रवणादीनामावृत्तिरुपदिश्यते इति सुस्पष्टमुच्यते भाष्यकारेण, दृष्टार्थान्येतानि — इति च। एवं दृष्टत्वाच्च। दृष्टं हि लोके यदतिसूक्ष्मं वस्तु सकृदीक्षणमात्रेण न साक्षात्कृतम् आप्तोपदेशश्रवणतदर्थमननाभ्याम् इन्द्रियविकासनैकाग्र्यपूर्वकमवलोकनेन चाध्यक्षीक्रियत इति। तस्मात्, न केवलमर्थवादत्वेनैवोपक्षीयन्ते श्रवणाद्युपदेशाः, किं तर्हि प्रत्यगात्म-

प्रतिपत्त्यनुपायदर्शनेनापीति सिद्धम् । यत्तु पञ्चपादिकाकार आह – " अपि च नैवायं विधौ कृत्यः, किं तर्हि 'अर्हे कृत्यतृचश्च' इत्यर्हे कृत्यः " (पं. पा. ११७२) इति, तत् तथा नामास्तु ; 'अनात्मभूतो विषयो न दर्शनार्हः, किं त्वात्मैव' इति प्रत्यक्प्रवणतोपदेशोपपत्तेः । एवमपि तु न केवलमर्थवादमात्राणि श्रोतव्यादिवचनानीत्यस्य पक्षस्य दृढीकरणात् ॥

श्रवणादिस्वरूपमेवं वर्णितमस्यां टीकायाम् –

" तथा च श्रवणं नामाऽऽत्मावगतये वेदान्तवाक्यविचारः, शारीरकश्रवणं च । मननं वस्तुनिष्ठवाक्यापेक्षितदुन्दुभ्यादिदृष्टान्तजन्मस्थितिलयत्राचारम्भणत्वादियुक्त्यर्थवादानुसन्धानम्, वाक्यार्थाविरोध्यनुमानानुसन्धानं च । निदिध्यासनं मननोपबृंहितवाक्यार्थविषये स्थिरीभावः । विधेयस्योपासनापर्यायस्य निष्फलत्वात् । दर्शनम्, अतो वाक्यार्थे स्थैर्यान्निरस्तसमस्तप्रपञ्चावभासविज्ञानघनैकतानुभवः "

पं.पा., पा. ११७०

इति ॥

अत्र श्रवणं वेदान्तवाक्यार्थविचार इत्यस्तु ; 'वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, नानुमानादिप्रमाणान्तरनिर्वृत्ता' (जन्म. ५, पा. ३५) इति भाष्यानुगुण्यात् । **मननं** तु न **केवलं** दृष्टान्तयुक्त्यनुसन्धानम्, किं तर्हि कार्यकारणानन्यत्वसुषुप्त्याद्यनुभवप्रमाणकश्रौतयुक्त्यनुसन्धानमपि । 'न धर्मजिज्ञासायामिव श्रुत्यादय **एव** प्रमाणं ब्रह्मजिज्ञासायाम्, किं तु श्रुत्यादयोऽनुभवादयश्च यथासम्भवमिह प्रमाणम् । अनुभवावसानत्वाद्,

भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य (जन्म. खं. ७, पा. ४३), इति भाष्यवचनात् । यत्पुनः 'वाक्यार्थाविरोध्यनुमानाद्यनुसन्धानं च' इति; तत्र यद्यनुमानशब्देन प्रत्यक्षोपजीवी प्रमाणविशेषो विवक्षितः, न तन्मर्षणीयम्, पराग्विषयत्वात्तादृशानुमानस्य । यदि तु श्रुत्यनुगृहीतानुभवानुसारियुक्तिरनुमानम्, तर्हि न कोऽपि दोषः । भाष्यकारेण तथैव स्थापितत्वात् । **निदिध्यासनं** तु यद्यपि श्रवणमननाभ्यां निर्धारिते वाक्यार्थे स्थिरीभावः, तथापि तदर्थं वेदान्तोपदिष्टोऽध्यात्मयोगोऽपि तत्रार्थेऽन्तर्भावनीयः । तथा हि श्रुतिः 'एष सर्वेषु भूतेषु गूढोऽऽत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥' (का. ३–१२, १३) इति । भाष्यं च "वैष्णवस्य परमपदस्य दुरवगमत्वमुक्त्वा तदवगमार्थं योगं दर्शयति" (सू. भा. १–४–१, पा. १४७) इति ॥

१६४. भामतीकारमतं श्रवणादिविषये – अथात्र वाचस्पतिमिश्रमतं समालोच्यते । स हि मेने –

(१) 'अन्यतः प्राप्ता एव हि श्रवणादयो विधिसरूपैर्वाक्यैरनूद्यन्ते । न चानुवादोऽप्यप्रयोजनः । प्रवृत्तिविशेषकरत्वात् । तथा हि – तत्तदिष्टानिष्टविषयेप्साजिहासापहृतहृदयतया बहिर्मुखो न प्रत्यगात्मनि समाधातुमर्हति । आत्मश्रवणादिविधिसरूपैस्तु वचनैर्मनसो विषयस्रोतः खिलीकृत्य प्रत्यगात्मस्रोत उद्घाट्यत इति प्रवृत्तिविशेषकरता अनुवादानामस्तीति सप्रयोजनतया स्वाध्यायविध्यधीनग्रहणत्वमुपपद्यत इति ॥' (वा.भा. पा. १३०)

(२) मनननिदिध्यासनयोरपि न विधिः। तयोरन्वयव्यतिरेकसिद्ध-साक्षात्कारफलयोर्विधिसरूपैर्वचनैरनुवादात् .... अथ कस्मान्मननादि विधिरेव न भवतीति ? अत आह 'यदि ह्यवगतम्' इति। न तावन्मनन-निदिध्यासने प्रधानकर्मणी अपूर्वविषये अमृतत्वफले इत्युक्तमधस्तात्। अतो गुणकर्मत्वमनयोरवघातप्रोक्षणादिवत् परिशिष्यते। तदप्ययुक्तम्। अन्यत्रोपयुक्तोपयोक्ष्यमाणत्वाभावादात्मनः, विशेषतस्त्वौपनिषदस्य कर्मानुष्ठानविरोधादित्यर्थः॥ (वा.भा. पा. १५३)
इति॥

[ 'यत्पुनरुक्तम्; श्रवणात् पराचीनयोर्मनननिदिध्यासनयोर्दर्शनाद् विधि-शेषत्वं ब्रह्मणः' इतिभाष्यवाक्यव्याख्यानप्रसङ्गेनेदं लिखितम्। एतत्तु तत्रानवसर-दुःस्थमिति ग्रन्थशरीरे एवात्र (पा. २३०-२३१) दर्शितम्॥

न ब्रह्मज्ञानमात्रं सांसारिकधर्मनिवृत्तिकारणम्; अपि तु साक्षात्कारपर्यन्तम्; ब्रह्मसाक्षात्कारश्चान्तःकरणवृत्तिभेदः, श्रवणमननादिजनितसंस्कारसचिवमनोजन्मा षड्जादिभेदसाक्षात्कार इव गान्धर्वशास्त्रश्रवणाभ्याससंस्कृतमनोयोनिः। स च निखिलप्रपञ्चमहेन्द्रजालसाक्षात्कारं समूलमुन्मूलयन्नात्मानमपि प्रपञ्चत्वाविशेषा-दुन्मूलयति" (भा. पा. १५०) इत्यसाधारणी प्रक्रिया भामतीप्रस्थानस्य।]

यद्यपि, विधिशेषता नास्ति ब्रह्मणः – इत्यंशे तौल्यं भाष्य-भामतीप्रस्थानयोः, तथापि 'अन्यतः प्राप्ता एव श्रवणादयो विधिसरूपै-र्वाक्यैरनूद्यन्ते' इत्ययं वादो न कुत्रापि दृश्यते भाष्ये। न च वाक्यजनितज्ञानादन्यदेव साक्षात्काररूपं ज्ञानं मनोजन्यं श्रवणादि-संस्कारसचिवमपेक्ष्यते मोक्षाय–इतिवादो भाष्ये आदृतोऽस्ति कुत्रचित्। प्रत्युत भाष्यप्रस्थानविरुद्ध एव त्वयं वादः; 'येषां पुनर्निपुण-मतीनां नाज्ञानसंशयविपर्ययलक्षणः पदार्थविषयः प्रतिबन्धोऽस्ति ते शक्नुवन्ति सकृदुक्तमेव तत्त्वमसिवाक्यार्थमनुभवितुम्' (सू. भा. ४–१–२, पा. ४६२) इत्यवधारणोपलम्भाद्भाष्ये इति विवेचनीग्रन्थशरीरे

एव (खं.१२०, पा.२२८) दर्शितमस्माभिरिति न पृथक्किञ्चिद्वशिष्यते वक्तव्यमत्र ॥

श्रवणादीनां स्वरूपं तु भामत्यामेवं वर्णितम् –

(१) 'अत्र चागमाचार्योपदेशाभ्यां तत्त्वस्य श्रवणम्; अथागमाविरोधिन्यायनिवेशनं मननम्; मत्वा च गुरुशिष्यसब्रह्मचारिभिरनसूयुभिः सह संवाद्य तत्त्वं श्रद्धत्ते। श्रद्धानन्तरं च विषयान्तरदोषदर्शी विरक्तस्ततो व्यावृत्तस्तत्त्वध्यानाभ्यासं करोति; सेयमस्य कृतिः प्रयत्नः। अथ तत्त्वध्यानाभ्यासे (?) अस्य निष्ठा भवति, यदनन्तरमेव तत्त्वविज्ञानमनुभवः प्रादुर्भवति॥' (बा.भा. पा. २७९)

'समाध्यभावाच्च' (वे.सू. २–३–३९) इतिसूत्रे भामत्यामित्थं लिखितमस्ति –

(२) "समाधिरिति संयममुपलक्षयति। धारणाध्यानसमाधयो हि संयमपदवेदनीयाः; यथाहुः 'त्रयमेकत्र संयमः' इति। अत्र 'श्रोतव्यो मन्तव्यः' इति धारणोपदेशः, 'निदिध्यासितव्यः' इति ध्यानोपदेशः, 'द्रष्टव्यः' इति समाधेरुपदेशः। यथाहुः 'तदेव ध्यानमर्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः' इति" (बा.भा.पा. ६१५) इति॥

अत्रौपनिषदर्शनश्रवणमनननिदिध्यासनानि योगदर्शनपरिभाषया व्याख्यातानि समाधिरवमात्रमालम्ब्य इति स्फुटम्। न हि मैत्रेय्यै धारणाध्यानसमाधय उपदिष्टा याज्ञवल्क्येनेति सकृदधीतवेदान्तानामपि व्यक्तम्॥

एवं तावदुदाहृतवाक्यार्थसमालोचनादिदमवगम्यते यद् भामतीकर्तुः श्रवणादिस्वरूपविषये न काचिन्निश्चिता मतिरस्तीति। यत्कारणं स एकत्राऽऽह 'आगमाचार्योपदेशाभ्यां श्रवणं क्रियते' इति; अन्यत्र

'उपनिषद्वाक्यश्रवणमात्रात् श्रावणप्रतिपत्तिर्भवति' इत्याचष्टे ; तृतीयस्थले तु अन्यथैव कथयति ' श्रवणमनने मिलिते योगदर्शनोक्तधारणा ' इति। किञ्च प्रथमोदाहरणे ब्रूते–आगमाविरोधिन्यायनिवेशनं **'मननम्'** इति; द्वितीयस्मिंस्तु मीमांसासहिता प्रतिपत्तिरेव मननमिति । तृतीये पुनः धारणांशभूतं तदिति । तस्मात् तद्व्याख्यानं भाष्योपदिष्टार्थविगानेन यत्र यत्र कलङ्कितं तत्र तत्र विचार्यैवादेयमिति स्पष्टम् ॥

१६५. **विवरणकारमतम्** – अत्र पञ्चपादिकाविवरणकर्तुरभिप्राया विमर्शनीयाः । अत्र प्रप्रथममिदं मनसि कर्तव्यं यत् **प्रकाशात्मयतिरयं** वेदान्तानामपि विचारं विधिप्रयुक्तमेवारब्धं मन्यते, श्रवणविधेरधिकाराद्यनुबन्धजातं निर्णेतुमेव वेदान्तमीमांसागतं प्रथमं सूत्रमारब्धम् इति चेति । पञ्चपादिकाग्रन्थाशयं विवरीतुं प्रवृत्तोऽप्ययं बहुत्र तद्विरुद्धाभिप्रायान् टीकाकाराभिप्रायत्वेनोपस्थापयति । प्रकृते तु विषये टीकायामेवं लिखितमुपलभ्यते –

> " इदमत्र प्रस्तुतम्–क्रियाकारकफलात्मकात् संसाराद् विरक्ताय नित्ये मुमुक्षवे मोक्षसाधनमात्मज्ञानं प्रतिपिपादयिषन् 'न वा अरे पत्युः कामाय पतिः प्रियो भवति' इति परमात्मन ईप्सिततमत्वं प्रति-[illegible] ईप्सिततमत्वमनात् । ननु नैवात्मन ईप्सिततमत्वमुच्यते [illegible] ईप्सिततमत्वमुच्यते 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इति । नैवम्, न हि तस्मिन्नसिद्धे तदर्थमिदं भवति । [illegible] पूर्वेप्सिततमत्वमुक्तम् । ईप्सितश्चेत् 'श्रोतव्यो मन्तव्यः' इत्येषोऽर्थवादः । एतच्च सर्वं प्रथमसूत्रेणैव सूचितम्, विवृतं च भाष्ये " (पं.पा. पा. ११७१)

इति ॥

तत्र विवरणं तु टीकाभिप्रायमन्यथैव व्याचष्टे –

(१) " ननु सम्यग्दर्शनस्य फलरूपत्वात् प्रमाणाधीनत्वाच्च अविधेयतेति युक्ता तस्यार्थवादता । श्रवणादयस्तु क्रियारूपत्वात् सम्यग्दर्शनस्य दृष्टादृष्टोपकारितया विधेया एवेति । तदाह–एतच्च सर्वं प्रथमसूत्रेणैवेति । मनननिदिध्यासनोपबृंहितस्य श्रवणस्य सम्यग्दर्शनाय विधेयत्वमङ्गीकृत्य प्रथमं सूत्रं प्रवृत्तम् इत्यर्थः " पं.वि. पा. ११७१

इति ॥

एतदनन्तरं टीकाकारेणोक्तमर्थान्तरमेवमवतारयति –

'विधीनामपि सतां स्तावकत्वमुक्तम्, इदानीं शब्दस्यार्थान्तरमाह– 'अपि च नैवायमिति' इति ॥ पं.वि. पा. ११७१–११७२.

इति ॥

अत्रेदमवधेयं यत् 'नैवायं विधौ कृत्यः किं तु अर्हे' – इत्युद्घोषयन्तीमपि टीकाम् अनादृत्यैव विवरणकारः श्रवणादीनां विहितत्वमातिष्ठते, टीकाकाराशयश्चैवमेवेत्यभिनिविशते चेति ॥

एवं प्रथमसूत्रस्थामपि टीकामेवं विपरिवर्त्य विवृणोति प्रकाशात्मा–

(२) " कः पुनरस्य सूत्रस्य प्रसङ्गः ? उच्यते नित्येनैवाध्ययनविधिना अधीतस्वाध्यायो वेदान्तवाक्येष्वापातदर्शनेनेदमवगच्छति 'आत्मनस्तु कामाय सर्वं प्रियम्' इत्युपक्रमात्, सर्वतो विरक्तस्याऽऽत्मप्रेप्सोः 'आत्मनि विज्ञाते सर्वमिदं विज्ञातम्', 'एतावदरे खल्वमृतत्वम्' इत्युपसंहारादमृतत्वसाधनमात्मदर्शनं 'द्रष्टव्यः' इत्यनूद्य तादर्थ्येन मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नामाङ्गि विधीयत इति । स च तत्र कियद्विशेषणपर्यन्तोऽधिकारी ? किंप्रमाणकश्च ? कोऽसौ वेदान्तवाक्यविचारः ? अन्यतः प्राप्तोऽप्राप्तो वा ? कथं चात्मज्ञानं मोक्षसाधनम् ? किंप्रमाणकं च तत् ? किं वा तदात्म-

सत्यम्, किंप्रमाणकं च ? – इति जिज्ञासते । तं च जिज्ञासुं पुरुषार्थकाममुपलभमानो भगवान् बादरायणः साधनचतुष्टयसंपन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारं विदधतो विधेरपेक्षिताधिकारिविषयफलानुबन्धत्रयम् आगमिकमपि न्यायेन निर्णेतुं सूत्रयामास 'अथातो ब्रह्मजिज्ञासा' इति । श्रुतिसूत्रयोरैकरूप्यावगमात् । मनननिदिध्यासनयोश्च श्रवणाङ्गत्वमुत्तरत्र वक्ष्यामः ॥ (पं·वि·पा·२८–३२)" इति ॥

अत्र टीका तु – " 'युष्मदस्मत्प्रत्ययगोचरयोः' इत्याद्यम् 'अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः' इत्यन्तं भाष्यम् 'अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते' इत्यनेन भाष्येण पर्यवस्यत् शास्त्रस्य विषयः प्रयोजनं चार्थात् प्रथमसूत्रेण सूत्रिते इति प्रतिपादयति " (पं. पा. पा. २४–२७) इत्येवमाह । न तु श्रवणादिविधानमधिकृत्य किञ्चिदाह । न च टीकायां कुत्रापि श्रवणादेर्विधित्सितत्वं सूचितं दृष्टचरम् । अथ चायं विवरणकारः " शास्त्रीयस्य विधेः शास्त्रीयमेवाधिकारनिमित्तं वक्तव्यम् इत्यभिप्रेत्याऽऽह – 'नित्यानित्यवस्तुविवेकः' इत्यादि । " (पं.वि.७२५) इत्युपक्रम्य अमुकविधिप्रकरणे नित्यानित्यवस्तुविवेको दर्शितः, अमुकविधिप्रकरणे इहामुत्रार्थभोगविरागो दर्शितः, दर्शनविधिप्रकरणे शमादयो दर्शिताः, अमुकविधिप्रकरणे गुरूपसदनं दर्शितम् – इत्येवं विधिप्रकरणेषु साधनानां दर्शितत्वेन प्रकल्पयति । 'सर्वत्र च फलश्रुतयः कामनोत्पादनद्वारेण मुमुक्षोरधिकारप्रदर्शनार्थाः ; अन्यथा साधनानुष्ठानादेव फलसिद्धौ सङ्कीर्तनवैफल्यात् । ज्ञानस्याविधेयत्वात तद्विषयोऽपि तत्साधनविधिपरः । तत्र सर्वशाखाप्रत्ययन्यायेन विधीनामेकत्वोपपत्तेः' – इति च (पं.वि. पा. ७३०) सर्वत्र विधिप्रकरणेष्वेव साधनानां दर्शितत्वं कल्पयति । उपसंहारे च ब्रवीति –

(३) "नन्वेषु वाक्येषु विचारो विधीयत इति कथमवगम्यते ? उच्यते-'विजिज्ञासितव्यः', 'विजिज्ञासस्व' इति चान्तर्णीतो विचारो विधीयते ; इष्यमाणज्ञानस्य, इच्छायाश्च विधेयत्वायोगात् । 'श्रोतव्यः' इति च स्वयमेव विचारो विहितः ; 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्' इति ज्ञानस्य साध्यतावगमात्, गुरूपसदनविधानाच्च तत्साधनश्रवणादिविधिः कल्प्यते । 'आत्मन्येवात्मानं पश्येत्' इति ज्ञानविधानायोगात् तत्साधने विधिरुपादीयते इति सर्वत्र मननिदिध्यासनाभ्यां सह श्रवणं नामाङ्गि विधीयत इति सिद्धम् ॥" (पं·वि· पा· ७३३)

इति ॥

श्रवणादीनां स्वरूपं टीकाकारोक्तं प्रदर्शितमधस्तात् । तत्र विवरणकारेण न किञ्चिदधिकं लिखितमिति तदेवानुमोदितमित्युन्नीयते । एवं श्रवणादीनां कृत्यविषयेऽपि ॥

साक्षात्कारलक्षणविद्यामधिकृत्य टीकाकार एवं लिखति – 'विद्या उदितापि न प्रतिष्ठां लभते । असंभावनाभिभूतविषयत्वात्' पं.पा. पा. ५०२) इति । तद्विवरणे त्वेवमुपलभ्यते –

"अत्र 'विद्या' इति शक्तितात्पर्यविचारसहकृतात् शब्दात् यत् प्रमाणज्ञानमुत्पद्यते, तदभिधीयते । तस्य प्रतिष्ठा स्वविषयेण सह आपरोक्ष्यम्" ॥ पं· वि· पा· ५०२

इति ॥

"यथा दूरदेशवर्तिनि आर्द्रमरीचफलादौ तथाविधवस्तुदर्शनसंस्कारशून्यतया विपरीतसंस्कारवत्तया च प्रत्यक्षदृष्टेऽपि न निश्चिनोति ! असंभावितविशेषांशापरोक्षनिश्चयो नोत्पद्यत इत्यर्थः ॥"

पं·वि· पा· ५०२

इति ॥

उत्तरत्र च विद्याप्रतिष्ठाहेतुस्तर्क इत्याह टीकाकृत् –

" क्व तर्हि तर्कस्योपयोगः ? विषयासंभवाशङ्कायां तथा अनुभवफलानुत्पत्तौ तत्सम्भवप्रदर्शनमुखेन फलप्रतिबन्धविगमे "

पं. पा. पा. ५०८.

इति । विवरणे तु –

ब्रह्मसाक्षात्कारः शब्दाद् भवति वा न वा ? – इत्यत्र मतद्वयमुपन्यस्तम् –

(१) तत्र ब्रह्मण एव सर्वसंविदुपादानत्वात् ब्रह्माकारशब्दप्रमाणजन्यसंवेदनेऽपि तदभिन्नतया वा तज्जनकतया वा ब्रह्मापि प्रथममेवापरोक्षतया अवभासते । तच्च चित्तस्य अतिसूक्ष्मे अनेकाग्रतादोषात्, विपर्ययसंस्कारदोषाच्च प्रतिबद्धं भ्रान्त्या परोक्षवदवभासते । तत्रापरोक्षज्ञानमुद्दिश्य यज्ञादीनां (शमादीनां) निदिध्यासनादीनां च विधानसामर्थ्यात् यज्ञादिनिबर्हितकल्मषप्रतिबन्धम्, शमादिनिरुद्धविपरीतप्रवृत्तिदोषम्, मननसंदर्शितप्रमेयादिसंभावनागुणप्रदीपोज्ज्वलितम्, अतिसूक्ष्मतरब्रह्मात्मविषयनिदिध्यासनप्रचयपरिनिर्मिततदेकाग्रवृत्तिगुणं चेन्द्रियं परोक्षविभ्रमनिमित्तप्रतिबन्धनिरासेन शब्दादेवापरोक्ष्यनिश्चयनिमित्तं भवतीति गम्यते । लोके चातिसूक्ष्मवस्तुनिर्धारणे चित्तैकाग्र्यविशेषापेक्षाया दर्शनात् । तर्कशब्देन चात्र एतादृशं सर्वप्रतिबन्धनिरासि चित्तदर्पणमुच्यते ॥

पं. वि. पा. ५०८–५०९

अपरमतम् –

(२) न प्रथमोत्पन्नं शाब्दज्ञानमेव प्रतिबन्धविगमापेक्षया अपरोक्षावभासं भवति, किं तु शब्द एव प्रथमं ब्रह्मणि परोक्षज्ञानमुत्पाद्य पुनर्निर्मलचित्तदर्पणसहकारिकारणापेक्षया द्वितीयमपरोक्षज्ञानम् उत्पादयति । .... न च स्वयंप्रकाशे ब्रह्मणि परोक्षज्ञानं विभ्रमः, स्वयंप्रकाशेऽपि

पुरुषान्तरसंवेदने परोक्षानुमानदर्शनादिति । सर्वथापि आपरोक्ष्यस्य प्रयत्नान्तरलभ्यत्वात्, युक्तं पृथक् प्रतिपत्तिशब्दग्रहणम् – इत्याह 'ततः प्राग् विद्योदितापि '–इति ॥ पं. वि. पा. ५१०

इति च ॥

एवमेव टीकायां विवरणे च ब्रह्मात्मापरोक्ष्यविषये विकल्पद्वयमन्यत्रापि स्वीकृतमुपलभ्यते –

(३) अवगतिरिति साक्षादनुभव उच्यते । ज्ञानं तु परोक्षेऽनुभवानारूढेऽपि संभवति । सन्निहितेऽप्यसम्भावितविषयेऽनवसितरूपमित्युक्तं पुरस्तात् ॥ पं. पा. पा. ७७३–७७४

इति टीका ॥

" शब्दाद् परोक्षतयाऽवगतेऽपरोक्षज्ञानमिष्यत इत्यर्थः । यदा पुनः शब्दादपरोक्षज्ञानमुत्पद्यते, तत्राह – 'संनिहितेऽपि' इति ॥ " पं. वि. पा. ७७३

इति विवरणम् ॥

उपरितनोदाहरणेभ्यः शब्दादेव परोक्षमपरोक्षज्ञानं वा जायते, मनननिदिध्यासनाभ्यां यथावर्णिताभ्याम् आपरोक्ष्यप्रतिबन्धो निरस्यत इत्युक्तं भवति। सर्वथापि तु मण्डनानुयायिभामतीकारपक्षः 'शब्दादेव नाविद्यानिवर्तकं ज्ञानमुत्पद्यते, किं तु निदिध्यासनहेतुकसाक्षात्कारात्' इत्येषोऽसम्मतो विवरणकारस्य । तत्र व्याख्यानप्रस्थानद्वयमपीदं साक्षात्कारादेवाविद्यानिवृत्तिरित्यत्राभिनिवेशवत् – इत्यत्र न संशीतिः । शाब्दज्ञाने जातेऽप्यसम्भावना – इति तु ब्रह्मात्मस्वभावानालोचननिबन्धनाद् भाष्यविरुद्धं च । यत आह भगवान् भाष्यकारः

" प्रत्यक्षफलत्वाच्च ज्ञानस्य फलविरहाशङ्कानुपपत्तिः । कर्मफले हि स्वर्गादौ अनुभवानारूढे स्यादाशङ्का 'भवेद्वा न वा' इति ; अनुभवारूढं तु ज्ञानफलम्, 'यत्साक्षादपरोक्षाद् ब्रह्म' (बृ. ३-४-१) इति श्रुतेः । 'तत्त्वमसि' (छां. ६-८-७) इति च सिद्धवदुपदेशात् ॥"

सू. भा. ३-३-३२, पा. ४०७

इति । वाक्यश्रवणादनुभवानुत्पत्तिस्तु नोत्पन्नेऽपि ज्ञाने परोक्षत्वभ्रमाद् हेतोः, अपि तु पदार्थविषयकाज्ञानादिप्रतिबन्धात् – इत्यपि स्पष्टमुक्तं भाष्यकृता –

" तत्र येषामेतौ पदार्थाविज्ञानसंशयविपर्ययप्रतिबद्धौ, तेषां 'तत्त्वमसि' इत्येतद्वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति, पदार्थज्ञान-पूर्वकत्वाद्वाक्यार्थज्ञानस्य इत्यतस्तान् प्रत्येष्टव्यः पदार्थविवेकप्रयोजनः शास्त्रयुक्त्यभ्यासः ॥ " सू. भा. ४-१-२, पा. ४६२

इति । श्रवणमननावृत्तिप्रयोजनमपि पदार्थविवेक एव, न तु वाक्यार्थ-गतासम्भावनादिनिवृत्तिरित्यप्येतस्मादेव भाष्यवाक्यात् स्पष्टम् ॥

१६६. वार्तिकप्रस्थानम् – अथात्र विचारणापरिपूर्तये वार्तिककाराभिप्रायोऽपि संग्राह्यः । आवेदितमिदं ग्रन्थशरीर एव यत् वार्तिककारमतेन श्रवणमननशमदमादयश्च विहितत्वेन स्वीक्रियन्ते, अन्वयव्यतिरेकलक्षणस्तर्कश्च तथैव विहितत्वेन स्वीकृतस्तत्र प्रस्थाने इति च ॥

(१) आत्मबुद्धिरियं तावत् सर्वेषां जायते स्वतः ।
अप्राप्ता सर्वमात्मेति सैवातो धीर्विधीयते ॥ बृ. वा. १-४-९६

स्वातन्त्र्यं यत्र कर्तुः स्यात् तत्र कर्ता नियुज्यते ।
अन्वयव्यतिरेकाभ्यामात्मानात्मविवेचने ॥ बृ. वा. १-४-१०७

वचोऽर्थप्रतिबोधस्य पदार्थाज्ञानमेव तु ।
यतोऽन्तरायस्तद्धानौ तेन तत्र नियुज्यते ॥ बृ. वा. २-४-१०८

कर्तुः स्वातन्त्र्यमस्ति, पदार्थाज्ञानमेव पदवाक्यार्थप्रतिबोधनेऽन्तरायः, तस्मात् पदार्थज्ञानार्थमन्वयव्यतिरेकरूपस्तर्को विधीयत इति युक्तम् इत्यर्थः ॥

अज्ञातज्ञापनं चासौ विधिरत्राभिधीयते ।
अप्रवृत्तप्रवृत्तिश्च न्यायाभावान्न युज्यते ॥ बृ. वा. २-४-११५

'द्रष्टव्यः' इत्यादिना कस्यां क्रियायां प्रवर्त्यते ? — इति पृच्छायां नात्र प्रवर्तनं कुत्रचित्, किं तर्हि, आत्मज्ञानमेवोपायोऽमृतत्वस्य इति ज्ञापनमेव विधिः इत्युक्तमत्र ॥

(२) सर्वमानप्रसक्तौ च (?) सर्वमानफलाश्रयात् ।
श्रोतव्य इत्यतः प्राह वेदान्तावरुरुत्सया ॥
दर्शनस्याविधेयत्वात्तदुपायो विधीयते ।
वेदान्तश्रवणं यत्नादुपायस्तर्क एव च ॥
श्रुतिलिङ्गादिको न्यायः शब्दशक्तिविवेककृत् ।
आगमार्थविनिश्चित्यै मन्तव्य इति भण्यते ॥
वेदशब्दानुरोध्यत्र तर्कोऽपि विनियुज्यते ।
वाच्यवाचकसंबन्धानियमे तस्य हेतुता ॥

बृ. वा. २-४-२१२, २१३, २१४, २१६

अत्र श्रवणमननयोः स्वरूपमुच्यते । वेदान्तश्रवणमेवाऽऽत्मज्ञाने साधनम् । तत्र श्रुतिलिङ्गादिन्यायानुसरणं शब्दशक्तिविवेकार्थं वेदशब्दानुरोधितर्कश्च **मननम्** इत्यर्थः । अत्र श्रुतिलिङ्गादिन्यायानुसरणं श्रवणेऽन्तर्भूतम् — इति **टीकाकृत्** ; तद्युक्तमयुक्तं वेति विपश्चिद्भिर्विनिश्चेयम् ॥

(३) अपरायत्तबोधोऽत्र निदिध्यासनमुच्यते ।
पूर्वयोग्यभित्वेन तदुपन्यास इष्यते ॥ बृ. वा. २-४-२१७
ध्यानाशङ्कानिवृत्त्यर्थं विज्ञानेनेति भण्यते ।
निदिध्यासनशब्देन ध्यानमाशङ्क्यते यतः ॥ बृ. वा.२-४-२३३

यथोदाहृतैर्वचनैरिदमवगम्यते यद् वार्तिकप्रस्थानेऽपि श्रवणादीनां विधिरभ्युपगम्यत एवेति । परं तु श्रवणादिविधिप्रयुक्त एव वेदान्तविचारः इति विवरणप्रस्थानानुज्ञानं तु नोपलभ्यते । निपुणमतीनां श्रवणमात्रेणापि वाक्यार्थज्ञानं जायेतैव— इति सूत्रभाष्यकृदभिप्रायोऽपि नोपलभ्यतेऽत्र । निदिध्यासनशब्दार्थनिर्वचने भाष्यवार्तिकयोर्वैलक्षण्यं विवेचन्यां (पा.२३१-२३२) चिन्तितमेवेति नात्राधिकं वक्तव्यमस्ति ॥

(४) सर्वमात्मेति या बुद्धिः सा प्रमेयबलाद् भवेत् ।
प्रमातृतन्त्रा सा चेत् स्यात् प्रासा लोकाग्निबुद्धिवत् ॥ २-४-१२०
अतोऽपुरुषतन्त्रत्वाज्ज्ञात्मज्ञाने विधिर्भवेत् ।
मन्वयादिक्रिया स्वस्य तत्तन्त्रत्वाद्विधीयते ॥ बृ.वा. २-४-१२१

वस्तुतन्त्रत्वाज्ज्ञानं न विधीयत इति भाष्यवदेवोक्तमत्र ॥

विशिष्टेष्टानुभूतिश्च सर्वमानफलं यतः ।
फलं च न विधेयं स्यादतो नेदं विधीयते ॥ बृ.वा. २-४-१२३

प्रमाणतन्त्रत्वादपि ज्ञानं न विधेयमिति भाष्यानुसार्येवेदं वचः ॥

## ६. उपसंहारः

१६७. तदेवं व्याख्यानप्रस्थानानां श्रवणादिस्वरूपकृत्यफलविचारो यथामति संग्रहेण निरूपितः । सूत्रभाष्यप्रस्थाने तु श्रवणमननादयो ध्यानरूपा यद्यपि न विधीयन्ते, तथाप्यात्माभिमुखीकरणार्थं यत्नः कर्तव्य इति बोधनार्थं तेषु विधिप्रत्यय आश्रीयते । श्रवणमेकमेव

निपुणमतीनां यद्यप्यवगतिफलकम्, तथापि प्रतिबद्धपदार्थज्ञानानां कृते शास्त्रयुक्त्यभ्यासोऽप्यपेक्ष्यते (सू.भा.४–१–२, पा. ४६२)। निदिध्यासनं तु सूत्रभाष्यप्रस्थाने प्रत्यक्प्रवणदृष्ट्या आध्यानम् (सू. भा. ३–३–१४, पा. ३८६) अध्यात्मयोगापरनामकं (सू. भा. १–४–१, पा. १४७), सूत्रे संराधनशब्दितमैकाग्र्यवृत्या भक्तिध्यानप्रणिधानाद्यनुष्ठानम् (सू. भा. ३–२–२४, पा. ३६७) वस्तुतन्त्रात्मज्ञानफलकम्। तत्रैतत्प्रस्थानाद्व्याख्यातारो तत्र तत्रान्यथैव प्रस्थिता इति, व्याख्यातृप्रस्थानानि श्रुतियुक्त्यनुभवानुसारिभाष्यप्रस्थानेन सङ्गमय्यैव स्वीकर्तव्यानि श्रेयोऽर्थिभिर्जिज्ञासुभिरिति तत्र तत्रोपपादितमिति सर्वं शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादशङ्करभगवत्पादचरणस्मरण-
परिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्येण
सच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां
सूत्रभाष्यार्थतत्त्वविवेचन्यां

**समन्वयाधिकरणभाष्यार्थतत्त्वविवेकः समाप्तः**

ओं तत्सत्

१०–८–१९७०—१००० अध्यात्मप्रकाशमुद्रणालयः, होळेनरसीपुरम्.

शुद्धशाङ्करप्रक्रियाप्रकाशकाः

# कतिचन वेदान्तग्रन्थाः

## BACK-TO-SHANKARA SERIES

Editor and Commentator :
**Sri Swami Satchidanandendra Saraswati**

**ईशकेनकाठकमुण्डकोपनिषदः, तैत्तिरीयशीक्षावल्ली च** – सटिप्पणभाष्ययुताः –

The **Isa, Kena, Kathaka** and **Mundaka** Upanishads and the Bhashya on **Sikshavalli** of the **Taittiriya**, critically edited separately with the Bhashya and Notes.

**तैत्तिरीया–आनन्दवल्ली भृगुवल्ली च** – सभाष्या, भाष्यार्थविमर्शिनीसहिता –

**Anandavalli and Bhriguvalli** with an elaborate original commentary; contains a Critical Review of all misinterpretations as also of objections raised by adverse schools.

**सुगमा** (1955) – अध्यासभाष्यार्थविवेचनी नवीना व्याख्या –

**Sugama** : The Adhyasa Bhashya with a new original commentary pointing out a straight and smooth way to the essentials of the Vedanta as according to S'ankara.

**सूत्रभाष्यार्थतत्त्वविवेचनी** (1964) जिज्ञासाधिकरणभाष्यस्य नूतनेयं व्याख्या –

**Sutra-Bhashyartha-Tattva-Vivechani (Part I)** – A New Original Commentary on the Jijnasadhikarana Bhashya. Brings out the salient features of Sankara's System and the Method peculiar to it. With a Summary of the Bhashya and three useful Appendixes.

**सूत्रभाष्यार्थतत्त्वविवेचनी** (1965) जन्माद्यधिकरणभाष्यस्य व्याख्या –

**Sutra-Bhashyartha-Tattva-Vivechani (Part II)** – A New Original Commentary on the Janmadyadhikarana, on the same lines as on the Jijnasadhikarana. With a Summary of the Bhashya together with four useful Appendixes.

**ADHYATMA PRAKASHA KARYALAYA**
**HOLENARSIPUR**
(Hassan District, Mysore State, India.)